* श्रीः *

श्रीमद्गणेशदैवज्ञप्रणीतो

जातकालङ्कारः ।

ीपण्डितप्रवरहरभानुशुक्लकृतसंस्कृतटीकोपेतः ।

काशीस्थ–श्रीचन्द्रमहाविद्यालयाध्यापक ज्यौतिषाचार्य्य

पं० श्रीगणेशदत्तपाठककृत-

टिप्पण्या-सान्वयभाषाटीकया च समलङ्कृतः ।

तेनैव संशोधितः ।

स च

काशीस्थभार्गवपुस्तकालयाध्यक्षेण

श्री कैलासनाथ भार्गवेण स्वकीये "भार्गवभूषण"

यन्त्रालये मुद्रयित्वा प्रकाशितः ।

द्वितीय संस्करणम्] वि० सं० १९९३ [मूल्यम् ६ आणकाः

मुद्रक—
बाबू कैलासनाथ भार्गव,
भार्गव भूषण प्रेस, बनारस सिटी।

भूमिका

अन्यानि शास्त्राणि विनोदमात्रं न किञ्चिदेषां भुवि दृष्टमस्ति ।
चिकित्सितं ज्योतिषमन्त्रवादा पदे पदे प्रत्ययमावहन्ति ॥ १ ॥

तथा च—

वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः ।
अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम् ॥ २ ॥

इत्यादि मुन्युक्त वचनों के अनुसार शुभाशुभ अदृष्ट फल कहने वाले दैवज्ञ की सभी निर्मम और निःस्पृह चराचर प्राणी को आवश्यकता रहती है ।

मुनियों ने और भी कहा है कि ऐश्वर्य की इच्छा रखने वाले मनुष्यों को ऐसे देश में नहीं रहना चाहिये जहाँ पर कोई श्रेष्ठ दैवज्ञ न हों जैसा कि वराह ने कहा है ।

ना सांवत्सरिके देशे वस्तव्यं भूतिमिच्छता ।
चक्षुर्भूतो हि यत्रैषां तत्र पापं न विद्यते ॥

यद्यपि ज्योतिषशास्त्र में अनेक जातक ग्रन्थ हैं तथापि श्रीगणेश दैवज्ञ के बनाये हुये जातकालङ्कार के ऐसा सरल और स्पष्ट फलित के व्यवसायियों के लिये दूसरा कोई जातक ग्रन्थ नहीं है । अत्युक्ति न होगी यदि कहा जाय कि इसमें कहे हुये योगावलियों के मर्म को जानने वाला अपने और दूसरों के सुख-दुःख, हानि-लाभ, मानापमान, धन-सम्पत्ति, माता-पिता, भाई-बन्धु, स्त्री-पुत्र, इत्यादि से हानि-लाभ का विचार जिस सुन्दरता और आसानी से कर सकता है वैसा अन्य किसी जातक ग्रन्थ से नहीं कर सकता । उक्त ग्रन्थ में कवि ने अपनी सरस कविता में मनुष्य के जन्म से मरण पर्य्यन्त होने वाले सम्पूर्ण विषयों का वर्णन द्वादश भावों के बलाबल के साथ ६

अध्यायों में बड़ी ही सुन्दरता से किया है। "जन्म समय में पञ्चतत्त्वों के अधिपति ग्रहों के प्रभाव के अनुसार ही मनुष्य की पाञ्चभौतिक शरीर होती है", यह आजकल के विज्ञानवादियों का भी मत है। उसीको अतीन्द्रियज्ञ ऋषियों ने अपने अनुभव-द्वारा बड़े ही परिश्रम से उन विषयों का ज्ञानकर अपने २ ग्रन्थों में लिखा है।

प्रस्तुत ग्रन्थ के कर्त्ता गणेश कवि तापी नदी के किनारे सुर्यपुर ग्राम के रहने वाले गुर्जर ब्राह्मण पं० गोपालजी के पुत्र थे। उसी ग्राम में शाके १५३५ में गणेश दैवज्ञ ने शुक मुनि के कहे हुये गद्यात्मक जातक ग्रन्थ को पद्यात्मक स्रग्धरा छन्दों में बनाया था। इसको बने हुये करीब ३२३ वर्ष हुये पर आज-तक इसके ऐसा सरल स्पष्ट कोई दूसरा ग्रन्थ नहीं बना।

यद्यपि इस ग्रन्थ की संस्कृत टीका पं० हरभानु शुक्ल ने विशदरूप से की है तथापि अल्प संस्कृत के जानने वालों का तथा छात्रों का विशेष उपकार उससे नहीं होता देखकर मैंने अत्यन्त परिश्रम से सान्वय भाषाटीका यथाशक्ति कर दिया है। यदि इस टीका से लोगों का कुछ भी उपकार हुआ तो मैं अपने परिश्रम को सफल समझूँगा। भ्रान्ति होना स्वाभाविक है अतः सज्जन महानुभावों से विनीत प्रार्थना है कि जहाँ कहीं प्रेस के असावधानी से कुछ त्रुटि रह गई हो उसे सुधारते हुये मुझे क्षमा करेंगें और सूचित करेंगें ताकि आगे उसे सुधार दिया जाय। शुभम्

विनीतः—

ज्यौ० आ० श्रीगणेशदत्त पाठकः

विषय सूची

योगाध्यायः ३ ।

विषयाः	पृष्ठाङ्काः

विषकन्याध्यायः ४ ।

आयुर्दायाध्यायः ५ ।

वैपरीत्यस्थभावफलाध्यायः ६ ।

इति ।

श्रीगणेशाय नमः ।

श्रीमद्गणेशदैवज्ञविरचितो–

जातकालङ्कारः ।

वस्वर्णब्रह्मविद्यापरिचयचतुरं श्रीशुकं व्यासपुत्रं
नत्वाऽऽचार्यं मुनीनां हरिपदकमले प्रेमविश्रामभाजाम् ।
स्वेष्टेष्टं स्वेष्टदेवं श्रुतिसमधिगतं माधवं भावयित्वा
भावैरुद्भाव्यतेऽस्मै प्रवरमतिमुदे जातकालङ्कृतश्रीः ॥ १ ॥

अथ ज्योतिर्वित्तिलकः छन्दोऽलङ्कृतिकाव्यरचनानिपुणः श्रीगणेशकविः श्रीशुकजातकानुरोधिजातकालङ्कारनामकं ग्रन्थं चिकीर्षुस्तदादौ निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारक्रमगतं भगवद्विभूतिगुरुगणेशभारतीकर्मप्रणिपातपरं वस्तुनिर्देशात्मकं मङ्गलमाचरति द्वाभ्यां शार्दूलविक्रीडिताभ्याम्—

सानन्दं प्रणिपत्य सिद्धिसदनं लम्बोदरं भारतीं
सूर्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदब्जे स्थितम् ।
येषामङ्घ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः ॥१॥

सद्भावाकलितं पदार्थललितं योगाङ्गलीलार्चितं
श्रीमद्भागवतं शुकास्यगलितं यच्छ्रीधरस्वामिना ।
सुव्यक्तं क्रियते गणेशकविना गाथोक्ति तज्जातकं
वृत्तस्रग्धरया जनादिसुफलं ज्योतिर्विदां जीवनम् ॥ २ ॥

चन्द्रमौलिं चिरं नौमि कृपया द्योतिताक्षरम् ।
तिमिरं खण्डितं येन इन्द्रनीलैः प्रतिप्रभम् ॥ १ ॥

अन्वयः—मया गणेशकविना येषामङ्घ्रिसरोरुहस्मरणतः नानाविधाः सिद्धयः सिद्धिं यान्ति, प्रत्यूहशैलव्रजाः लघु विलयं प्रयान्ति (एवम्भूतान्) हृदब्जे स्थितम् सानन्दं सिद्धिसदन लम्बोदरं भारतीं सूर्यादिग्रहमण्डलं निजगुरु भक्त्या प्रणिपत्य सद्भावाकलितं पदार्थललितं योगाङ्गलीलार्चितं जनादिसुफलं ज्योतिर्विदां जीवनम शुकास्यगलितं श्रीमद्भागवतं यत् श्रीधरस्वामिना सुव्यक्तं (कृतं तथैवाहं) गाथोक्ति तज्जातकं (जनादिसुफलं ज्योतिर्विदां जीवनं वृत्तस्रग्धरया सुव्यक्तं क्रियते ॥ १—२ ॥

सानन्दमिति । सद्भावाकलितमिति च । गणेशनाम्ना ग्रन्थकरणकुशलेन मया तज्जातकं वृत्तस्रग्धरया सुव्यक्तं क्रियते स्पष्टार्थं यथा स्यात्तथा विधीयते इत्यर्थः । किं कृत्वा भक्त्या तान् सिद्धिसदनभूतान् नत्वा नमस्कृत्य । तान् किंविधान् येषामङ्घ्रिसरोरुहस्मरणतः नानाविधा अनेकविधाः सिद्धयः कार्यसिद्धयः सिद्धिं पूर्णतां यान्ति । प्रत्यूहशैलव्रजाः विघ्नपर्वतसमूहाः 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । 'व्रजो गोष्ठाध्ववृन्देषु' इत्यमरः । लघु शीघ्रं विलयं यान्ति नश्यन्ति । 'लघु क्षिप्रमरं द्रुत' मित्यमरः । लघ्विति पदं शीघ्रतावाचकं देहलीदीपकन्यायेनोभयत्रान्वेति । तान्कान् तदाह । सिद्धिसदनं सिद्धिर्लक्ष्मीस्तस्या

सदनं गृहं निवासस्थानमिति यावत् श्रीनिवास इत्यर्थः। 'त्वं सिद्धिस्त्वं स्वधा स्वाहे'त्यादि लक्ष्मीस्तुत्यारम्भे सिद्धिशब्दस्य लक्ष्म्यां प्रयुक्तत्वात् सिद्धिर्लक्ष्मीरिति नित्यविकल्पोऽर्थः। कीदृशं सिद्धिसदनं सानन्दमानन्देन सहितं ब्रह्मण आनन्दः 'आनन्दं ब्रह्मणो विद्वानि'ति श्रुतेः। सानन्दमिति विशेषणपदं भगवतोऽन्यत्र नोपपद्यते। ततोऽन्यदार्तमिति श्रुत्या ब्रह्माणमित्यत्रार्त्तवोपदेशात्, हृदब्जे स्थितं हृदयकमलवासिनं 'सर्वस्य चाहं हृदि सन्निविष्टः' इति भगवद्वचनात्। भक्त्या प्रीतिपूर्वकानुस्मृत्या गुरुं श्रीमच्छिवाख्यं, लम्बोदरं विनायकं, भारतीं सरस्वतीं, सूर्यादिग्रहमण्डलं रव्यादीनां ग्रहाणां मण्डलं समूहं च प्रणिपत्य नमस्कृत्य शुकास्यगलितं शुकमुनिमुखात् भक्तिभूतं गलितं, गाथोक्ति गाथानां श्लोकविधुराणां उक्तिर्व्यवहारो यस्मिन् तथाभूतम्, कथं व्यक्तं क्रियते यथा शुकास्यात् गलितं श्रीमद्भागवतं महापुराणं श्रीधरस्वामिना व्यक्तं कृतमित्यध्याहारः। कथंभूतं भागवतं जातकं च सद्भावाकलितं सन् प्रशस्तो भावो विष्णुभक्तिः तेनाकलितं विशिष्टं, जातकपक्षे—सद्भावैस्तन्वादिद्वादशभावैस्तात्पर्यैर्वा विशिष्टं, पदार्थललितं पदार्थैः परमभक्त्युद्योतकैः श्रवणकीर्तनादिभिः ललितं रुचिरं जातकपक्षे—पदार्थैः सानन्दसदनादिभिर्मनोहरम्। योगाङ्गलीलार्चितं योगो भक्तियोगस्तस्याङ्गानि यमनियमप्राणायामप्रत्याहारध्यानधारणासमाधयः तेषां लीला उपदेशविशेषास्ताभिरार्चितं महितं, जातकपक्षे—योगाङ्गानि ग्रहभावादीनि तेषां लीला योग्यत्वेन घटनाविशेषास्ताभिरर्चितं प्रशस्तमित्यर्थः। जनादिसुफलं जनादीनां श्रवणपठनाभ्यां सुफलं शोभनफलदम्। जातकपक्षे—सम्यक्फलवर्णनं यस्मिन् तत्। ज्योतिर्विदां जीवनं ज्योतिः परमात्मा 'नारायणः परं ज्योति'रिति श्रुतेः, तद्विदां ब्रह्मविदां

जीवनं कालक्षेपयोग्यं, जातकपक्षे—ज्योतिर्विदां गणकानां जीविकाप्रदत्वाज्जीवनमित्यर्थः। वृत्तस्रग्धरया स्रग्धरावृत्तैरित्यर्थः। जात्यभिप्रायेणैकवचनोक्तिः। तस्य लक्षणं 'चत्वारो यत्र वर्णाः प्रथम' मित्यादि ॥ १—२ ॥

नत्वाऽवलोकितं रामं जानक्या लीलया दृशा।
जातकालङ्कृतेर्हिन्दीटीकां कुर्वे मनोरमाम् ॥

मैं गणेश कवि जिनके चरणकमल के स्मरण करने से अनेक प्रकार की सिद्धियां सिद्ध हो जाती हैं, विघ्नरूपी पर्वतों के समूह अर्थात् (बड़े से बड़े भी विघ्न) शीघ्र ही नष्ट हो जाते हैं, ऐसे आनन्द से युक्त हृदयकमल में स्थित लक्ष्मीकान्त (श्रीविष्णु) श्रीगणेश सरस्वती सूर्य्यादि ग्रह और अपने गुरु को भक्ति से प्रणाम करके, अच्छे भावों से भरे हुये, अनेक पदार्थों से शोभित योग (भक्तियोग) के अङ्गों (व्रत नियमादि) की लीलाओं (उपदेशों) से पूजनीय, मनुष्यों के शुभाशुभ फलों से युक्त, ब्रह्मज्ञानियों के समय व्यतीत करने योग्य श्रीशुकदेवजी के मुखारविन्द से कहा हुआ गूढ़ उक्तियों से युक्त श्रीमद्भागवत महापुराण को जिस प्रकार श्रीधराचार्य्य ने अपनी टीका से सरल कर दिया है वैसे ही मैं भी अच्छे २ तन्वादि द्वादश भावों से युक्त अनेक पदार्थों एवं ग्रहयोगों से संयुक्त अनेक सुन्दर फलों को देनेवाला ज्योतिषियों का जीविकास्वरूप गूढार्थों से भरे हुये उस जातक को स्रग्धराछन्द में स्पष्ट करता हूं ॥ १—२ ॥

---

१. चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि—
द्वौ तद्वद्द्वादशाद्यौ मृगमदमुदिते षोडशान्त्यौ तथान्त्यौ।
रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले वन्द्यैः कवीन्द्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥ इति ॥

ननु श्रीधरस्वामिवद्भवतापि शुकजातकव्याख्याने कर्तव्ये ग्रन्थारम्भो नोचितस्तत्राह—

यत्पूर्वं परमं शुकास्यगलितं सज्जातकं फक्किका-
रूपं गूढतमं तदेव विशदं कुर्वे गणेशोऽस्म्यहम् ।
दैवज्ञः सुतरां यशःसुखमतिः श्रीहर्षदं स्रग्धरा-
वृत्तैश्चारु नृणां शुभायनपदं श्रीमच्छिवानुज्ञया ॥ २ ॥

अन्वयः—अहं सुतरां यशःसुखमतिः गणेशदैवज्ञः श्रीमच्छिवानुज्ञया यत्पूर्वं परमं शुकास्यगलितं फक्किकारूपं गूढतमं सज्जातकं तदेव नृणां श्रीहर्षदं शुभायनपदं स्रग्धरावृत्तैश्चारु विशदं कुर्वे ॥ २ ॥

यत्पूर्वमिति । गणेशनामाहं श्रीमच्छिवानुज्ञया वेदशास्त्रसम्पन्नशिवनाम्नो गुरोराज्ञया तत्प्रीत्यर्थमिति भावः। पूर्वभावकाले शुकास्यगलितं छन्दोरहितत्वात् फक्किकारूप गूढतममतिशयेन गहनं न तु विशदं परमं सारार्थनिरूपणेनोत्कृष्टं यज्जातकं तदेव स्रग्धरावृत्तैश्चारु रुचिरं विशदं कुर्वे, फक्किकारूपस्य गूढतमस्य विशदीकरणं श्लोकैरेवोचितमित्याशयः । कथंभूतो गणेशो दैवज्ञोऽदृष्टवेत्ता कर्तव्यग्रन्थभावितवार्तादर्शीति गूढभावः। सुतरां यशःसुखमतिः अतिशयितकीर्तिजन्यसुखे मतिर्यस्य सः, प्रयोजनगर्भमिदं विशेषणं यशोऽन्यसुखार्थमिति भावः। कीदृशं तं श्रीहर्षदं श्रियं हर्षं च ददाति तत् । शुभायनपदं शुभायनानां शुभजातकानामानन्दसिद्धिसदनादीनां पदं स्थानम् ॥ ३ ॥

निरन्तर यश और सुख की इच्छा रखनेवाला मैं गणेश दैवज्ञ (अदृष्ट फल को कहनेवाला) अपने गुरु श्रीशिवजी की आज्ञा से पूर्वकाल में परम पुनीत श्रीशुकदेवजी से कहा हुआ फक्किकारूप (सूत्ररूप) अतिशय कठिन जो जातकशास्त्र है उसीको मनुष्यों को लक्ष्मी और

हर्ष तथा शुभफलों को देनेवाला स्रग्धरा छन्दों में सरल बनाता हूं ॥ ३॥

ननु सत्कवीनां हर्षप्रदं त्वदीयं जातकं न स्यादित्याह—

भूयांसः सन्ति भूमौ निजमतिरचनाशालिनः काव्यगुम्फे
सङ्ख्यावन्तस्तथापि प्रचुरपरगुणानन्दलीलां भजन्ते ।
चञ्चद्गाम्भीर्यपद्माविबुधविटपिनां जन्मसम्प्राप्तिभूतो
मर्यादां न स्वकीयां त्यजति किल महान्रत्नधामा सरस्वान् ।४।

अन्वयः—भूमौ काव्यगुम्फे यद्यपि निजमतिरचनाशालिनः भूयांसः सख्यावन्तः सन्ति, तथापि प्रचुरपरगुणानन्दलीलां भजन्ते । यथा किल चञ्चद्गाम्भीर्यपद्माविबुधविटपिनां जन्मसम्प्राप्तिभूतो महान् रत्नधामा सरस्वान् स्वकीयां मर्यादां न त्यजति ॥ ४ ॥

भूयांस इति । भूमौ यद्यपि काव्यगुम्फे गद्यरचनायां निजमतिरचनाशालिनः निजमत्या काव्यरचना तया शालन्ते ते भूयांसो निपुणाः संख्यावन्तः कवयः सन्ति तथापि प्रचुरपरगुणानन्दलीलां भजन्ते प्रकृष्टपरगुणानुभवजन्यानन्दलीलामुद्वहन्ति नोपेक्षन्त इत्यर्थः । 'परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः' इत्युक्तत्वात्कृत्यानपरगुणानुभवजन्यप्रमोद एव तेषां लीलेति भावः । उक्तमर्थमर्थान्तरन्यायेन द्रढ़यति । चञ्चद्गाम्भीर्यं च पद्मा च विबुधविटपी चेति चञ्चद्गाम्भीर्यपद्माविबुधविटपिनः चञ्चतो द्योतमाना गाम्भीर्यादयश्च एतेषां जन्म सम्प्राप्तिभूतः आश्रयोऽपि रत्नधामापि रत्नगृहमपि सरस्वान् समुद्रः स्वकीयां मर्यादां स्थितिं न त्यजति, तथैव कवयोऽपि प्रमोदैरन्विति भावः । गाम्भीर्यं निश्चलता, पद्मा लक्ष्मीः, विबुधविटपी पारिजातः । अत्र रत्नधाम इति पदं चिन्त्यम् । धामशब्दस्य नपुंसकलिङ्गत्वात् अत्र तत्पुरुषसमासे 'परवल्लिङ्गं

द्वन्द्वतत्पुरुषयोरि'त्यनुशासनेन रत्नाधामेति नपुंसकान्तत्वस्या-दन्तत्वात् अतो 'रत्नधामाप्युदन्वानि'ति पाठः समीचीनः ॥ ४ ॥

पृथिवी पर यद्यपि अपनी बुद्धि से काव्यरचना करने वाले परम-प्रवीण अनेक विद्वान् हैं तथापि दूसरों के उत्कृष्ट एवं गुणग्राही रचनाओं के अनुभव (आनन्द लीला) से प्रसन्न होते हैं। जैसे तेज और गाम्भीर्यादि गुणों का जन्मदाता एवं लक्ष्मी, कल्पवृक्ष का आश्रय. बड़े २ रत्नों का गृह होते हुये भी समुद्र अपने मर्यादा को नहीं छोड़ता। ऐसेही इस मेरी कृति को देखकर परमगुणग्राही विद्वान् लोग आनन्दित होंगे ॥ ४ ॥

अथ तन्वादीनां सामान्यविशेषसंज्ञाः कथ्यन्ते यावदध्यायम्। आदौ तावल्लग्नादीनां देहादिसंज्ञां तेषां सर्वेषां भावसंज्ञां च शार्दूलविक्रीडितेनाह—

देहं द्रव्यपराक्रमौ सुखसुतौ शत्रुः कलत्रं मृति-
र्भाग्यं राज्यपदं क्रमेण गदिता लाभव्ययौ लग्नतः।
भावा द्वादश तत्र सौख्यशरणं देहं मतं देहिनां
तस्मादेव शुभाशुभाख्यफलजः कार्यो बुधैर्निर्णयः ॥ ५ ॥

अन्वयः—लग्नतः क्रमेण देहं द्रव्यपराक्रमौ सुखसुतौ शत्रुः कलत्र मृतिर्भाग्यं राज्यपदं लाभव्ययौ द्वादशभावा गदिताः, तत्र देहिनां सौख्यशरणं देहं मतं बुधैः तस्मादेव शुभाशुभाख्यफलजः निर्णयः कार्यः॥५॥

देहं द्रव्यपराक्रमाविति। लग्नत इति ल्यब्लोपे पञ्चमी। लग्नमारभ्य क्रमेण देहादयो द्वादश भावा गदिता उक्तास्तत्र लग्नं देहो देहभावः, द्वितीयतृतीयौ द्रव्यपराक्रमभावौ, चतुर्थ-पञ्चमौ भावौ सुखसुतौ, षष्ठः शत्रुः, सप्तमभावः कलत्रम्, अष्टमो मृतिः, नवमो भाग्यम, दशमं राज्यपदम्, एकादशद्वादशौ लाभ

व्ययौ लाभव्ययनामकौ, तत्र तेषु देहिनां देहः सौख्यशरणं सुखाश्रयं मतम्, अतो बुधैर्ज्योतिर्विद्भिः तस्माद्देहादेव लग्नभावादेव शुभाशुभाख्यफलजो निर्णयो वक्ष्यमाणप्रकारेण कार्यः ॥ ५ ॥

लग्न से लेकर क्रम से देह १, द्रव्य २, पराक्रम ३, सुख ४, सुत ५, शत्रु ६, कलत्र ७, मृति ८, भाग्य ९, राज्य १०, लाभ ११, व्यय १२ ये बारह भावों के नाम हैं, जैसे लग्न को देह दूसरे भाव को द्रव्य इत्यादि। इनमें देहभाव मनुष्यों के सुख का आश्रय है इस कारण पण्डितों को चाहिये कि आगे कहे हुये प्रकार से मनुष्यों के शुभाशुभ फलों का निर्णय करैं ॥ ५ ॥

लग्नं मूर्तिस्तथाङ्गं तनुरुदयवपुःकल्पमाद्यं ततः स्वं
कोशार्थाख्यं कुटुम्बं धनमथ सहजं भ्रातृदुश्चिक्यसंज्ञम् ।
अम्बापातालतुर्यं हिबुकगृहसुहृद्वाहनं यानसंज्ञं
बन्ध्वाख्यश्चाम्बुनीरं जलमथ तनयं बुद्धिविद्यात्मजाख्यम् ॥ ६ ॥

अन्वयः—लग्नं मूर्त्तिस्तथाङ्गं तनुरुदयवपुःकल्पमाद्यम्, ततः स्वं कोशार्थाख्यं कुटुम्बं धनं, अथ सहजं भ्रातृदुश्चिक्यसंज्ञम्, अम्बापातालतुर्यं हिबुकगृहसुहृद्वाहनं यानसञ्ज्ञं बन्ध्वाख्यं अम्बुनीरञ्च अथ तनयं बुद्धिविद्यात्मजाख्यम् ॥ ६ ॥

लग्नमिति। लग्नं मूर्त्यादिशब्दवाच्यमिति मुनय ऊचुरिति तृतीयेनान्वयः। मूर्तिः अङ्गं तनुः उदयं वपुः कल्पमिति समाहारः। उदयो वपुः कल्पमाद्यं तन्वादयो लग्नपर्याया इति प्रथमभावः। ततोऽनन्तरं धनं स्वं कोशार्थाख्यं कोशश्चार्थश्च कोशार्थौ आख्या यस्य स तथा तत्तथोक्तं धनं स्वादिसंज्ञमूचुरित्यन्वयः। एवमग्रेऽपि। सहजं भ्रातृदुश्चिक्यसंज्ञं तृतीयभावः। अम्बापातालतुर्यं हिबुकगृहसुहृद्वाहनं यानसंज्ञं याननामकमेवं बन्ध्वाख्यं

बन्धुसंज्ञम् अम्बु नीरं जलमेते चतुर्थभावस्य पर्याया इति भावः । अथ तनयं बुद्धिविद्यात्मजाख्यं वाक्स्थानं पञ्चममित्यग्रिमेण संबन्धः स्यात् । पञ्चमभावस्यैते पर्यायाः ॥ ६ ॥

पूर्वोक्त देहादि द्वादशभावों की विशेषसंज्ञा को लिखते हैं—लग्न, मूर्ति, अङ्ग, तनु, उदय, वपु, कल्प और आद्य ये आठ देहभाव (प्रथमभाव) के नाम हैं। स्व, कोश, अर्थ, कुटुम्ब, और धन, ये पाँच द्रव्यभाव (द्वितीयभाव) के नाम हैं। सहज, भ्रातृ, दुश्चिक्य और पराक्रम (ये ४ पराक्रमभाव तृतीयभाव) के नाम हैं। अम्बा, पाताल, तुर्य, हिबुक, गृह, सुहृद, वाहन, यान, बन्धु, अम्बु, नीर और जल, ये १२ सुखभाव (चतुर्थभाव) के नाम हैं। तनय, बुद्धि, विद्या, आत्मज ॥६॥

वाक्स्थानं पञ्चमं स्यात्तनुजमथ रिपुद्वेषिवैरिक्षताख्यं
षष्ठं जामित्रमस्तं स्मरमदनमद्यूनकामाभिधानम् ।
रन्ध्रायुश्छिद्रयाम्यं निधनलयपदं चाष्टमं मृत्युरन्यद्
गुर्वाख्यं धर्मसंज्ञं नवममिह शुभं स्यात्तपोमार्गसंज्ञम् ॥ ७ ॥

अन्वय.—वाक्स्थानं पञ्चमं तनुजं स्यात्, अथ षष्ठं रिपुद्वेषिवैरिक्षताख्यं, आस्तं आमिलं स्मरमदनमद्यून कामाभिधानम्, अष्टमं रन्ध्रायुश्छिद्र याम्यं निधनलयपदं अन्यद् मृत्युः, इह नवम गुर्वाख्यं धर्मसंज्ञं शुभं तपो मार्ग संज्ञम् स्यात् ॥ ७ ॥

वाक्स्थानमिति । अथ षष्ठं रिपुद्वेषिवैरिक्षताख्यमूचुः, रिपुद्वेषिवैरिक्षतनामकमित्यर्थः । अथ सप्तमं जामित्रमस्तस्मरमदनमद्यूनकामाभिधानमूचु सप्तमं जामित्रास्तस्मरमदनादिनामकमित्यर्थः । अथाष्टमं रन्ध्रायुश्छिद्रयाम्यनिधनलयपदं मृत्युं अष्टमं रन्ध्रादिनामकमित्यूचुः । अतो नवममिह शास्त्रे गुर्वाख्यं धर्मसंज्ञं शुभं तपोमार्गसंज्ञमूचुः ॥ ७ ॥

वाक्, पञ्चम और तनुज, ये सात सुतभाव (पञ्चमभाव) के नाम हैं। रिपु, द्वेषि, वैरि, क्षत और षष्ठ ये पाँच शत्रुभाव (षष्ठभाव) के नाम हैं। जामित्र, अस्त, स्मर, मदन, मद, द्यून और काम ये सात कलत्रभाव (सप्तमभाव) के नाम हैं। रन्ध्र, आयु, छिद्र, याम्य, निधन, लयपद, अष्टम और मृत्यु ये आठ मृतिभाव (अष्टमभाव) के नाम हैं। गुरु, धर्म, नवम, शुभ, तप और मार्ग ये ६ भाग्यभाव (नवमभाव) के नाम हैं ॥ ७ ॥

ताताज्ञामानकर्मास्पदगगननभोव्योममेषूरणाख्यं
मध्यं व्यापारमूचुर्दशममथ भवं चागमं प्राप्तिमायम् ।
इत्थं प्रान्त्यान्तिमाख्यं मुनय इह ततो द्वादशं रिष्फमाहु-
र्ग्राह्यं बुद्ध्वा प्रवीणैर्यदधिकममुतः संज्ञया तस्य तच्च ॥ ८ ॥

अन्वयः—ताताज्ञामानकर्मास्पदगगननभोव्योममेषूरणाख्यं मध्यं व्यापारं दशममूचुः अथ भवं आगमं प्राप्तिमायम् (ऊचुः) ततो इत्थं मुनयः प्रान्त्यान्तिमाख्यं द्वादशं रिष्फं आहुः प्रवीणैः अमुतः यदधिकं तस्य तच्च संज्ञया बुद्ध्वा ग्राह्यम् ॥ ८ ॥

तातेति। अथ तनोर्दशमं तातादिनामकमूचुरिति, आज्ञा मानं कर्म आस्पदं गगनं नभो व्योम मेषूरणं मध्यं व्यापारमूचुरिति स्फुटा व्यक्तिः। अथ भवमेकादशमागमं प्राप्तिमायमूचुरित्थमुक्तम्। ततो द्वादशं प्रान्त्यान्तिमाख्यं प्रान्त्यनामकम्, अन्तिमं रिष्फं चाहुः। यदमुतः प्रोक्तात्पर्यायसमुदायादधिकं दृश्यते तस्य तस्य यन्नामोक्तं नामसंज्ञायां पर्यायं बुद्ध्वा तत्तुल्यार्थशुद्धं ग्राह्यं यथा वित्तशब्देन तत्तुल्यार्थे धनं सहोत्थशब्देन सहजभावो ग्राह्य इति ॥ ८ ॥

तात, आज्ञा, मान, कर्म, आस्पद, गगन, नभ, व्योम, मेषूरण, मध्य,

व्यापार, दशम ये १२ राज्यपद (दशमभाव) के नाम हैं। भव, आगम, प्राप्ति और आय ये तीन लाभ (एकादशभाव) के नाम हैं। ऐसे ही प्रान्त्य, अन्तिम, द्वादश और रिष्फ ये चार व्यय (द्वादशभाव) के नाम हैं। इन नामों से अधिक जो नाम (इस ग्रन्थ में) दिखाई पड़ें उनको उनकी संज्ञा (नाम पर्याय) जानकर बुद्धिमान् लोग ग्रहण करें। जैसे-द्वितीयाध्याय के ६ ठें श्लोक में अनुज शब्द से तृतीय, गृहिणी शब्द से सप्तम का और १२ वें श्लोक में विलय शब्द से अष्टम, पितृ शब्द से दशम का, १४ वें श्लोक में नन्दन शब्द से पञ्चमभाव इत्यादि का ग्रहण है ॥ ८ ॥

आद्यं तुर्यं कलत्रं दशममिह बुधैः केन्द्रमुक्तं त्रिकोणं
पुत्रं धर्माख्यमुक्तं पणफरमुदितं मृत्युलाभात्मजार्थम् ।
धर्मश्चापोक्लिमाख्यं व्ययरिपुसहजं कण्टकाख्यं हि केन्द्रं
चैतच्चातुष्टयं स्यात्त्रिकमिह गदितं वैरिरिःफान्तकाख्यम् ॥९॥

अन्वयः—इह बुधैः आद्यं तुर्यं कलत्रं दशमम् केन्द्रमुक्तं, पुत्रं धर्माख्यं त्रिकोणमुक्तम् । मृत्युलाभात्मजार्थम् पणफरमुदितम्, व्ययरिपुसहजं धर्मश्च आपोक्लिमाख्यमुक्तम्, हि केन्द्रं कण्टकाख्यं एतत् चतुष्टयञ्च स्यात्, इह वैरिरिःफान्तकाख्यम् त्रिकं गदितम् ॥ ९ ॥

आद्यमिति। इह शास्त्रे बुधैः आद्यं चतुर्थं सप्तमं दशमं केन्द्रमुक्तं तथा कण्टकाख्यं चतुष्टयं च चतुष्टयमेव चातुष्टयम्। पञ्चमं नवमं त्रिकोणमुक्तम्, मृत्युलाभात्मजार्थमष्टममेकादशं पञ्चमं द्वितीयं पणफरमुक्तम्। नवमं द्वादशं षष्ठं सहजं आपोक्लिमसंज्ञमुदितम्, वैरिरिःफान्तकाख्यं षष्ठद्वादशाष्टमं त्रिकमुक्तम् ॥ ९॥

इस शास्त्र में पण्डित लोग प्रथम, चतुर्थ सप्तम और दशम इन ४ स्थानों को .कन्द्र कहते हैं। केन्द्र ही को कण्टक और चतुष्टय भी कहते हैं। पञ्चम और नवम इन दोनों भावों को त्रिकोण कहते हैं। अष्टम, एकादश, पञ्चम और द्वितीय इन ४ भावों को पणफर कहते हैं। नवम, द्वादश, षष्ठ और तृतीय इन ४ भावों को आपोक्लिम कहते हैं। और षष्ठ, द्वादश और अष्टम इन तीन स्थानों को त्रिक कहते हैं ॥ ९ ॥

अथ मित्रशत्रूनेकेन शार्दूलविक्रीडितेनाह—

चन्द्रेज्यक्षितिजा रवीन्दुतनयौ गुर्विन्दुसूर्याः क्रमा-
च्छुक्रार्कौ रविचन्द्रभूमितनया ज्ञार्कौ सितज्ञौ मताः ।
अर्कादेः सुहृदः, समा अथ बुधः सर्वे हि शुक्रार्कजौ
भौमाचार्ययमा यमः कुजगुरू पूज्यः, परे वैरिणः ॥ १० ॥

अन्वयः—अर्कादेः क्रमात् चन्द्रेज्यक्षितिजाः, रवीन्दुतनयौ, गुर्विन्दुसूर्याः, शुक्रार्कौ, रविचन्द्रभूमितनयाः, ज्ञार्कौ, सितज्ञौ सुहृदः मताः। अथ बुधः, सर्वे, शुक्रार्कजौ, भौमाचार्ययमाः, यमः, कुजगुरू, पूज्यः अर्कादेः समाः मताः, परे वैरिणः मताः ॥ १० ॥

चन्द्रेति। चन्द्रेज्यक्षितिजादयः अर्कादेः सुहृदः, बुधादयः समाः, अन्ये वैरिणो मताः मुनिभिरिति शेषः। सूर्यस्य चन्द्रेज्यक्षितिजाः सुहृदो मित्राणि, बुधः समोऽन्ये वैरिणः। रविबुधौ चन्द्रस्य मित्रे, सर्वे अन्ये समाः। गुर्विन्दुसूर्याः भौमस्य मित्राणि, शुक्रशनी समौ, बुधः शत्रुः। शुक्रसूर्यौ बुधस्य मित्रे, भौमगुरुशनयः समाः, चन्द्रः शत्रुः। रविचन्द्रभौमाः गुरोर्मित्राणि, शनिः समः, बुधशुक्रौ शत्रू। बुधशनी शुक्रस्य मित्रे, कुजगुरू समौ, रविचन्द्रौ शत्रू। सितज्ञौ शनेर्मित्रे, गुरुः समः, रवीन्दुभौमाः शत्रवः ॥ १० ॥

(अब) ग्रहों के मित्र-शत्रु को कहते हैं—सूर्य के चन्द्रमा, बृहस्पति और मङ्गल ये तीन ग्रह मित्र हैं। चन्द्रमा के सूर्य और बुध मित्र हैं। मङ्गल के बृहस्पति, चन्द्रमा और सूर्य मित्र हैं। बुध के शुक्र और सूर्य मित्र हैं। बृहस्पति क सूर्य, चन्द्रमा और मङ्गल मित्र हैं। शुक्र के बुध और शनि मित्र हैं। शनि के शुक्र और बुध मित्र हैं। एवं सूर्य का बुध सम है, चन्द्रमा के मित्रों को छोड़कर शेष सब ग्रह (मङ्गल, बृहस्पति, शुक्र और शनि), मङ्गल के शुक्र और शनि, बुध के मङ्गल, बृहस्पति, और शनि, बृहस्पति के शनि, शुक्र के मङ्गल और गुरु, शनैश्चर क बृहस्पति सम होते हैं। उक्त ग्रहों से अतिरिक्त ग्रह, रव्यादिग्रहों के शत्रु होते हैं ॥ १० ॥

ग्रहमैत्रीचक्रम् ।

ग्रहाः	रवि	चन्द्र	मङ्गल	बुध	गुरु	शुक्र	शनि
मित्र	चन्द्र गुरु मङ्गल	र. बु.	गुरु चन्द्र रवि	शु. र.	रवि चन्द्र मङ्गल	बु. श.	शुक्र बुध
सम	बुध	मं. गु. शु. श.	शुक्र शनि	मं. गु. श.	शनि	मं. गु.	गुरु
शत्रु	शुक्र शनि	०	बुध	चन्द्र	बुध शुक्र	र. चं.	रवि चन्द्र मङ्गल

अथ दृष्टीः पृथ्वीवृत्तेनाह—

तृतीयदशमे ग्रहो नवमपञ्चमेऽष्टाम्बुनी
क्रमाच्चरणवृद्धितः स्मरगृहं ततः पश्यति ।

कुजः सितबुधौ शशी रविबुधौ सितक्ष्मासुतौ
गुरुर्यमशनी गुरुर्भवनपा इमे मेषतः ॥ ११ ॥

अन्वयः—ग्रहः ततः तृतीयदशमे नवमपञ्चमे अष्टाम्बुनी सप्तम-गृहं क्रमाच्चरणवृद्धितः पश्यति । मेषतः कुजः सितबुधौ शशी रविबुधौ सितक्ष्मासुतौ गुरुर्यमशनी गुरुः इमे भवनपाः स्युः ॥ ११ ॥

तृतीयेति । तृतीयदशमादिषु चरणवृद्धितः पश्यति तत्र तृतीयदशमे चरणदृष्ट्या पश्यति, नवमपञ्चमे द्विचरणदृष्ट्या पश्यति अष्टाम्बुनी अष्टमचतुर्थे चरणत्रयदृष्ट्या पश्यति, स्मर-गृहं सप्तमं चतुश्चरणदृष्ट्या पूर्णं पश्यतीत्यर्थः । तृतीयदशमे शनिः नवमपञ्चमे गुरुः, चतुर्थाष्टमे भौमः, पूर्णदृष्ट्या पश्यतीति जातकान्तरे सविशेषो ज्ञेयः । इमे कुजादयो मेषतो मेषमारभ्य भवनपाः राशीशाः, मेषस्य कुजः, वृषस्य शुक्रः, मिथुनस्य बुधः, कर्कस्य चन्द्रः, सिंहस्य रविरित्यादि ॥ ११ ॥

अब ग्रहों की दृष्टि कहते हैं—सभी ग्रह अपने स्थान से तीसरे और दशवें स्थान को १ चरणदृष्टि से, नवें और पाँचवें स्थान को २ चरण की दृष्टि से, आठवें और चौथे स्थान को ३ चरण की दृष्टि से और सातवें स्थान को ४ चरण (सम्पूर्ण) दृष्टि से देखते हैं । मङ्गल, शुक्र, बुध, चन्द्र, रवि, बुध, शुक्र, मङ्गल, बृहस्पति, शनि, शनि, और बृहस्पति, ये ग्रह क्रम से मेषादिक बारह राशियों के स्वामी होते हैं ॥ ११ ॥

राशिस्वामिचक्रम् ।

राशयः	मे.	वृ.	मि.	क.	सिं	क.	तु.	वृ.	ध.	म.	कुं.	मी
ग्रहाः	मं.	शु.	बु.	चं.	सू.	बु.	शु.	मं.	बृ.	श.	श.	बृ.

मतान्तर से शनैश्चर तीसरे और दशवें स्थान को, बृहस्पति नवें और पाचवें स्थान को, मङ्गल चौथे और आठवें स्थान को पूर्णदृष्टि से देखता है। और सभी ग्रह अपने से सप्तम स्थान को पूर्णदृष्टि से देखते हैं ॥

अध्यायं समापयति शालिन्या—

हृद्यैः पद्यैर्गुम्फिते सूरितोषे-
ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।
सञ्ज्ञाध्यायः श्रीगणेशेन वर्यै-
र्वृत्तैर्दिग्भिः सँय्युतोऽयं प्रणीतः ॥ १२ ॥

इति जातकालङ्कारे प्रथमोऽध्यायः ॥ १ ॥

श्रीगणेशेन हृद्यैः पद्यैर्गुम्फिते सूरितोषे अस्मिन्मञ्जुले अलङ्काराख्ये जातके वर्यैर्दिग्भिः वृत्तैः संय्युतोऽयं संज्ञाध्यायः प्रणीतः ॥ १२ ॥

हृद्यैरिति। श्रीगणेशेन विदुषा उत श्रीविशिष्टेन गणेशेन अलङ्काराख्ये अलङ्कारनामके मञ्जुले रुचिरे हृद्यैः पद्यैर्गुम्फिते मनोहरैः श्लोकैः रचितेऽस्मिन् ग्रन्थे वर्यैः श्रेष्ठैः दिग्भिर्दशभिः वृत्तैः श्लोकैः अयमादिमः प्रथमः संज्ञाध्यायः प्रणीत उक्तः रचित इत्यर्थः ॥ १२ ॥

इति श्रीहरभानुविरचितायां जातकालङ्कारटीकायां प्रथमोऽध्यायः ॥ १ ॥

श्रीगणेश कवि ने मनोरम (स्रग्धरादि) छन्दों से निबद्ध विद्वानों को सन्तुष्ट करनेवाले इस मनोहर जातकालङ्कार नामक पुस्तक में दश श्लोकों से इस सञ्ज्ञाध्याय को बनाया ॥ १२ ॥

इति जातकालङ्कारे भाषाटीकायां प्रथमोऽध्यायः ॥ १ ॥

अथ भावाध्यायः ॥ २ ॥

अथ भावाध्यायो व्याख्यायते। कविः स्वविनयं विशदयन् भावफलं वक्तुं पृथिवीवृत्तेन प्रतिजानीते—

शुकाननसरोरुहाद्गलितमत्र भूमीतले
फलं परमसुन्दरं सकलमाकलय्याधुना।
ब्रवीमि तनुभावतः प्रवरदैववित्तोषदं
यदत्र मम चापलं किमपि तत्क्षमध्वं बुधाः ॥ १ ॥

अन्वयः– अत्र भूमितले शुकाननसरोरूहाद्गलितं प्रवरदैववित्तोषदं सकलं परमसुन्दरं फलं आकलय्य अधुना तनुभावतः ब्रवीमि। यदत्र किमपि मम चापलं तद्बुधाः क्षमध्वम् ॥ १ ॥

शुकेति। शुकाननसरोरुहाद्गलितमहं तनुभावतः तत आरभ्य तत्फलं जातकफलमधुना ब्रवीमि। हे बुधाः! पण्डिताः! अत्र वचने मम किमपि चापलं स्यात्तद्यूयं क्षमध्वमिति प्रार्थना। किं कृत्वा ब्रवीमि-अत्र भूमितले शुकाननसरोरुहात् शुकमुखारविन्दाद्गलितं शिष्यद्वारा प्राप्तं परमसुन्दरं सकलं फलमाकलय्य विचार्य, कथम्भूतं फलं प्रवरदैवविदां तोषदमुत्कृष्टज्योतिर्विदामानन्ददम्, अन्यत्रोक्तमन्यतो ग्राह्यमिति न्यायेन प्रथमं ग्रहभावस्पष्टता तेषां बलं च ज्ञातव्यं ततो भावसामान्यफलान्तरं शुभपापमित्रग्रहदृष्टियोगादिकं भावषड्वर्गभावेशस्योदयास्तादिकं ज्ञातव्यम्। तदुक्तं पृथुयशसा—

'यो यो भावः स्वामिदृष्टो युतो वा
सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः।
पापैरेवं तस्य भावस्य हानि-
र्निर्देष्टव्या प्रश्नतो जन्मतो वा'।

तत्र विशेषो गर्गजातके—

'नीचस्थो रिपुगेहस्थो ग्रहो भावविनाशकृत्।
उदासीनो ग्रहो मध्यो मित्रस्वर्क्षत्रिकोणगः॥
स्वोच्चस्थश्च ग्रहोऽप्येवं भाववृद्धिकरः स्मृतः॥'

व्ययाष्टमषष्ठभावेषु विपरीतफलमाह। उशनाचार्यः—

'सौम्याः पुष्टिं पापा विपर्ययं संश्रिता ग्रहाः कुर्युः।
मूर्त्यादिषु निधनांत्यं रिपुभावे व्युत्क्रमात्फलदाः॥'

अन्यच्च—

'सौम्यवर्गाश्रिता भावाः शुभतां प्राप्नुवन्ति हि।
पापवर्गाधिका नेष्टास्तन्वाद्या नात्र संशयः॥
लग्नलग्नाधिपौ स्यातां बलाधिकतरौ यदि।
तत्फलानां प्रवृद्धिः स्याद्धीनो हानिकरः स्मृतः॥
एवं भावेषु सर्वेषु भावभावेशयोर्बलात्।
ततो जनुषि वक्तव्या हानिर्वृद्धिश्च कोविदै'रिति॥

सर्वार्थचिन्तामणौ—

लग्नादिभावाद्रिपुरन्ध्ररिःफे पापग्रहास्तद्भवनादिनाशः।
सौम्यास्तु येषूक्तफलप्रदाः स्युस्तन्वादिकानां फलमेवमाहुः॥

यद्भावनाथो रिपुरन्ध्ररिःफे
दुःस्थानपो यद्भवनस्थितो वा।
तद्भावनाशं कथयन्ति तज्ज्ञाः
शुभेक्षिते तद्भवनस्य सौख्यम्॥ २॥

तत्तद्भावात्त्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते
पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते।
भावानां पुष्टिमाहुस्त्वथ च शुभकरीमन्यथात्वे प्रणाशं
मिश्रं मिश्रैर्ग्रहेन्द्रैः सकलमपि तथा मूर्तिभावादिकानामिति॥१॥

अब भावाध्याय को लिखते हैं। इस पृथिवी पर शुकदेवजी के मुखकमल से टपका हुआ, ज्यौतिषशास्त्र के धुरन्धर विद्वानों को प्रसन्न करनेवाला, अत्यन्त सुन्दर, सम्पूर्ण फलों का संग्रह करके लग्नादि द्वादश भावों के फलों को कहता हूँ। इस मेरे कथन में जो कुछ चपलता हो उसको पण्डित लोग क्षमा करें ॥ १ ॥

अथ त्रिभिः श्लोकैस्तनुभावविशेषमाह—

देहाधीशः सपापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं
न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्ता ।
मूर्तौ चेत्क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो
नानातङ्काकुलःस्याद्व्रजति हि मनुजो व्याधिमाधिप्रकोपम् ॥

अन्वयः—चेद्देहाधीशः सपापो व्ययरिपुमृतिगस्तदा जन्तोः देहसौख्यं न स्यात्, (तथा) व्ययरिपुमृतिपः निजर्क्षे तत्फलस्यैव कर्त्ता, चेन्मूर्त्तौ क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो (तदा) मनुजः नानातङ्काकुलःस्यात् हि व्याधिमाधिप्रकोपम् व्रजति ॥ २ ॥

देहाधीश इति। देहाधीशो लग्नस्वामी सपापः पापग्रहेण युक्तः व्ययरिपुमृतिगः द्वादशषष्ठाष्टमान्यतमस्थानगतश्चेत्तदा जातस्य देहसौख्यं न स्यात्। अस्य योगस्य धनादिभावे विचार्यत्वद्योतनाय प्रथममुक्तिरिति गम्यते 'यद्भावनाथो रिपुरन्ध्ररिःफे तद्भावनाशं कथयन्ति तज्ज्ञाः' इति प्राक् लिखितत्वात्। अन्यदाह व्ययेशो व्यये, षष्ठेशः षष्ठे, अष्टमाधीशोऽष्टमे च(तत्फलस्यैव कर्त्ता देहसौख्याभावकर्ता स्यात्। अयमर्थो यवनमतेन विरुद्धः। यथा बृहज्जातके—

रिपुभवनपे रिपुस्थे नीरुग्वैरी सुखी कृपणः।
निधनपतौ निधनस्थे व्यवसायी व्याधिवर्जितोऽप्युदितः ॥

विरोधशमनाय अयमर्थो बोध्यः। देहाधीशे व्ययरिपुमृतिगे सति तद्भवनपेऽपि तत्रस्थे शुभफलं स्यादिति न वाच्यम्। पूर्वोक्तयोगे सति व्ययरिपुमृतिपः स्वभवनगतश्चेत्तत्फलस्यैव कर्तेति वाच्यम्। योगानामचिन्त्यफलत्वादिति। अथान्ययोगमाह—मूर्ताविति। मूर्तौ लग्ने क्रूरग्रहः क्रूरखेटः, तनुपतिः लग्नेशः स्वीयवीर्येण हीनः स्वकीयबलहीनश्चेत्तदा जातो मनुजः नानातङ्काकुलः अनेकरोगाकुलः व्याधिरोगमाधिप्रकोपं चिन्ताव्याप्तत्वं व्रजति प्राप्नोति। बलहीनत्वं परपुंग्रहं नीचास्तत्वादिभिर्ज्ञेयम्, तदुक्तं जातकामृते—

'स्वोच्चं मूलत्रिकोणं स्वगृहमधिसुहृद्गेहकं मित्रकं स्यादौदासीन्यं समर्क्षं रिपुभमधिरिपोर्भं च नीचाभिधानम्।
पूर्वं पूर्वं बलीयः परमपरमिदं हीनसत्त्वं तदस्मात्—

इत्यादिवत्पद्धतिप्रकाशमतेन उत्तमबलत्वं च ज्ञेयम्, अल्पे बले हीनबल इति पद्धतिवचनात्॥ २॥

तनुभाव के अनिष्ट फल देनेवाले योगों का वर्णन—जिसके जन्मकाल में लग्न का स्वामी पापग्रह के साथ बारहवें, छठें और आठवें स्थान में बैठा हो उस मनुष्य को शरीर का सुख नहीं होता है। अथवा बारहवें स्थान का स्वामी बारहवें स्थान में, छठें स्थान का स्वामी छठें स्थान में और आठवें स्थान का स्वामी आठवें स्थान में हो तो भी वही फल है अर्थात् उस मनुष्य को शरीर सुख नहीं होता है। लग्न में क्रूर ग्रह हों और लग्न का स्वामी बलरहित (निर्बल) हो तो वह मनुष्य अनेक शङ्काओं से व्याकुल होकर व्याधि (रोग), आधि (हृदय की चिन्ताओं) से व्याप्त होता है॥२॥

---

१. क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः।

क्षीण चन्द्रमा, सूर्य, मंगल, शनि ये पापग्रह हैं और इन से युक्त बुध भी पापग्रह होता है।

अथ शुभयोगानाह—

अंगाधीशः स्वगेहे बुधगुरुकविभिः संय्युतः केन्द्रगो वा
स्वीये तुंगे स्वमित्रे यदि शुभभवने वीक्षितः सत्स्वरूपः।
स्यान्नूनं पुण्यशीलः सकलजनमतः सर्वसम्पन्निधानं
ज्ञानी मन्त्री च भूपः सुरुचिरनयनो मानवो मानवानाम्॥३॥

अन्वयः—अङ्गाधीशः स्वगेहे, वा बुधगुरुकविभिः संय्युतः केन्द्रगः, वा स्वीये तुङ्गे स्वमित्रे शुभभवने यदि (शुभग्रहैः) वीक्षितः स्तदा नूनं सत्स्वरूपः पुण्यशीलः सकलजनमतः सर्वसम्पन्निधानं ज्ञानी मन्त्री भूपः सुरुचिरनयनो मानवानां मानवश्च स्यात् ॥ ३ ॥

अंगाधीशः लग्ने चेदित्येको योगः। बुधगुरुकाविभिर्युक्तो लग्नेशः केन्द्रग इति द्वितीयः। स्वीये तुङ्गे स्वोच्चे 'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गा' इत्यादयुक्तेः। स्वमित्रे स्वमित्रगृहे अथवा शुभभवने शुभग्रहैर्वीक्षितः लग्नेश इति तृतीयः। एषामन्यतमयोगे जातो मानवो मानवानां मध्ये भूपादिकः स्यात्। भूपः भूपालो, मन्त्री अमात्यः सर्वसम्पन्निधानं सर्वासां सम्पदामाश्रयः, ज्ञानी भूपत्वाद्युपयुक्तः ज्ञानवान् सत्स्वरूपः सत्त्वगुणानुरूपातश्च पुण्यशीलः सुकृती सुरुचिरनयनः सुन्दरनयनादिशरीरः, सकलजनमतः सर्वजनमान्यः, पुण्यशीलशब्देन सत्यार्जवादिद्योत्यते तदुक्तं जातकरहस्ये 'यः सात्त्विकस्तस्य दयास्थिरत्वं सत्यार्जवब्राह्मणदेवभक्ति'रिति ॥ ३ ॥

तनुभाव में अच्छे फल देनेवाले योगों का वर्णन—लग्नेश लग्न में हो, अथवा लग्नेश बुध, गुरु और शुक्र से युक्त होकर केन्द्रों में हो अथवा अपने उच्च में, वा अपने मित्र के राशि में अथवा शुभग्रह

राशि में हो और शुभग्रहों से देखा जाता हो, उक्त तीनों योगों में से कोई एक भी योग हो तो मनुष्य उत्तम स्वरूप, पुण्यशील, सभी लोगों से आदरणीय, सभी सम्पत्तियों से युक्त, ज्ञानी, राजा का मन्त्री वा राजा और मनुष्यों में श्रेष्ठ मनुष्य होता है ॥ ३ ॥

अथानिष्टयोगत्रयं श्लोकेनाह—

लग्ने क्रूरेऽथ याते खलखचरगृहं लग्ननाथे रवीन्दू
क्रूरांतःस्थानसंस्थावथ दिनपनिशानाथयोर्द्यूनयायी ।
भूमीपुत्रस्तु पृष्ठादुदयमधिगतश्चन्द्रजश्चेन्मनस्वी
स्यादन्धो दुष्टकर्मा परभवनरतः पूरुषः क्षीणकायः ॥ ४ ॥

अन्वयः—अथ लग्ने क्रूरे लग्ननाथे खलखचरगृहं याते, रवीन्दू क्रूरान्तःस्थानसंस्थौ, अथ दिनपनिशानाथयोर्द्यूनयायी भूमीपुत्रश्चेच्चन्द्रजः पृष्ठादुदयमधिगतस्तदा पूरुषः मनस्वी, अन्धो, दुष्टकर्मा परभवनरतः क्षीणकायः स्यात् ॥ ४ ॥

क्रूरे लग्ने क्रूरग्रहराशौ लग्नेशः स्थितः अयमेको योगः । पुष्पवन्तौ[1] रवीन्दू क्रूरयोर्ग्रहयोर्मध्यस्थौ क्रूरमध्यस्थौ क्रूरमध्यस्थत्वं राश्यंशापेक्षया वा ज्ञेयम् । सङ्कोचे प्रमाणाभावात् अय द्वितीयो योगः । अथ दिनपनिशानाथयोः सूर्याचन्द्रमसोः द्यूनयायी सप्तमगः भौमः, बुधः पृष्ठादुदयमधिगतः पृष्ठोदयराशौ स्थित इति तृतीयो योगः । अत्र जातः पुरुषः मनस्वी प्रशस्तमना इत्यर्थः । अन्धः दुष्टकर्मा परभवनरतः परगृहवासरतः परस्त्रीरतो वा स्यात् । क्षीणकायः क्षीणशरीरश्च मनस्वित्वं कालगतचन्द्रस्य बलत्वे बोध्यम् । एवं तनुभावस्य शुभाशुभयोगा उक्ताः । ननु क्वचिच्छुभयोगेऽपि शुभफलं नोपलभ्यते तथा

१. 'एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ' इत्यमरः ।

अशुभयोगेऽशुभफलमिति तत्र को विशेष इति चेत्सत्यं क्रूर दृष्ट्युतत्वादियोगेन अयं भावः । शुभयोगकारकग्रहोपरि क्रूरदृष्टौ सत्यां विनिश्चयप्राप्तं फलं नोपलभ्यते, अशुभयोगकारकग्रहोपरि शुभदृष्ट्याऽशुभं नोपलभ्यते । ताजिककारैरित्थशालस्य दृष्टिप्रयुतमणऊयोगेन भजन्तं कृतमुक्तम् । बृहज्जातककारेण— 'न शुभा उदिता योगा याप्या भवन्ति शुभेक्षिता' इत्युक्तम् इति तदनुभावः ॥ ४ ॥

और भी अनिष्ट योगों को कहते हैं-जिसके जन्मसमय में (१) लग्न में क्रूरग्रह बैठे हों और लग्न का स्वामी क्रूरग्रह के राशि में बैठा हो, या (२) सूर्य और चन्द्रमा (दोनों एक साथ) पापग्रहों के मध्य (बीच) में स्थित हों या (३) सूर्य वा चन्द्रमा से सप्तम स्थान में मङ्गल हो और बुध पृष्ठोदय राशि में हो तो वह मनुष्य मनस्वी (स्वेच्छाचारी), अन्धा, कुत्सित कर्म (चोरी, बदमाशी इत्यादि) करनेवाला, दूसरों के घर में रहनेवाला या पराई स्त्री से मैथुन करने वाला और शरीर से दुर्बल होता है ॥ ४ ॥

*अथ धनभावफलं श्लोकद्वयेन ब्रुवन् प्रथमं धनयोगचतुष्टयमाह-

कोशाधीशः स्वराशौ सुरगुरुसहितः सर्वसम्पत्प्रदः स्यात्
केन्द्रे वाथ त्रिके चेद्भवति हि मनुजः क्लेशभाग्द्रव्यहीनः ।
स्वान्त्याधीशौ त्रिकस्थौ कवितनुपयुतौ स्यात्तदा नेत्रहीन
श्चन्द्रः पापेन युक्तो धनभवनगतः शुक्रयुङ्नेत्रहीनः ॥५॥

---

* नोट—योगों के फल विचार में हमेशा ध्यान रखना चाहिये कि योग सम्पूर्ण है या नहीं यदि सम्पूर्ण हो तो भी यदि शुभफल देनेवाला योग हो और उस पर पापग्रह की दृष्टि हो तो शुभफल नहीं होगा और अशुभ योग हो उस पर शुभग्रह की दृष्टि हो तो अशुभफल नहीं होगा । इसको विचार कर फलादेश करना चाहिये ।

अन्वयः—कोशाधीशः सुरगुरुसहितः स्वराशौ वा केन्द्रे (तदा) सर्वसम्पत्प्रदः स्यात्, अथ (कोशाधीशः सुरगुरुसहितः) चेत्त्रिके तदा मनुजः क्लेशभाक् द्रव्यहीनश्च भवति। स्वान्त्याधीशौ कवितनुपयुतौ त्रिकस्थौ तदा नेत्रहीनः स्यात्, चन्द्रः पापेन युक्तः धनभवनगतः शुक्रयुक् नेत्रहीनः स्यात् ॥ ४ ॥

कोशाधीश इति। कोशाधीशो धनेशः गुरुयुतः स्वराशौ स्वभावे केन्द्रे वा चेत्तदा जातस्य सर्वसम्पत्प्रदः स्यात्। अथानन्तरमन्ययोग उच्यत इत्यर्थः। गुरुयुतो धनाधीशः त्रिकेषु षष्ठाष्टमद्वादशेषु अन्यतमे चेज्जातो मनुजः क्लेशभाक् द्रव्यहीनश्च स्यात्, स गुरुः धनाधीशः षष्ठे चेदयं योगः शिथिलो ज्ञेयः तं प्रतिचाल्पधनयोगसद्भावात्। धनाधीशस्य शुभत्वे मध्यधनयोगसद्भावात्। तदुक्तं बृहज्जातके—

लग्नादतीव वसुमान् वसुमान् शशाङ्का—
त्सौम्यग्रहैरुपचयोपगतैः समस्तैः।
द्वाभ्यां समोऽल्पवसुमांश्च तदूनताया—
मन्येष्वसत्स्वपि फलेष्विदमुत्कटेन ॥

अथान्ययोगः स्वान्त्याधीशौ द्वितीयद्वादशाधीशौ शुक्रलग्नेशयुक्तौ चेत्तदा जातः नेत्रहीनः अन्धः स्यात्। अथान्ययोगः शुक्रपापाभ्यां युक्तश्चन्द्रो धनस्थश्चेत्तदा जातो नेत्रहीन इति ॥४॥

अब धनभाव का फल दो श्लोकों से कहते हैं-द्वितीय स्थान का स्वामी बृहस्पति के साथ अपनी राशि में अथवा केन्द्र में बैठा हो तो वह जन्मे हुए मनुष्य को सम्पूर्ण सम्पत्ति देता है। यदि बृहस्पतियुक्त धनभाव का स्वामी त्रिक (षष्ठ, अष्टम और द्वादश) में स्थित हो तो

१. यदि षष्ठ में हो तो यह योग कुछ न्यून होता है क्योंकि बृहज्जातक में लिखा है कि लग्न चन्द्रमा से उपचय (३।६।१०।११) स्थान में यदि सब शुभ ग्रह हो तो वह मनुष्य धनी होता है। यदि दो शुभ ग्रह हो तो मध्य धनी ॥

वह मनुष्य दुःखी और दरिद्र होता है। द्वितीय और द्वादश स्थान का स्वामी, शुक्र और लग्न के स्वामी से युक्त होकर त्रिक (षष्ठ, अष्टम और द्वादश) भाव में बैठा हो तो जातक (पैदा हुआ बालक) नेत्रहीन (अन्धा) होता है। तथा यदि पापग्रह और शुक्र से युक्त चन्द्रमा धनभाव में पड़ा हो तो मनुष्य अन्धा होता है ॥ ५ ॥

अन्ययोगत्रयं तत्र द्वितीययोगस्य तातादिष्वतिदेशं चाह—

शुक्रः सेन्दुस्त्रिकस्थो जनुषि निशि नरः प्राप्नुयादन्धकत्वं
जन्मान्धः सार्कशुक्रस्तनुभवनपतिः स्यात्तदानीं मनुष्यः।
एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः स्थिताश्चे-
दादेश्यं तत्र तेषां प्रवरमतियुतैरन्धकत्वं तदानीम् ॥ ६ ॥

अन्वयः—जनुषि सेन्दुः शुक्रस्त्रिकस्थः नरः निशि अन्धकत्वं प्राप्नुयात् सार्कशुक्रस्तनुभवनपतिस्त्रिकस्थस्तदानीं मनुष्यः जन्मान्धः स्यात्। एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः स्थिताश्चेत्तदानीम् प्रवरमतियुतैः तत्र तेषां अन्धकत्वं आदेश्यम् ॥ ६ ॥

जनुषि जन्मसमये सेन्दुः सचन्द्रः शुक्रस्त्रिकस्थः षष्ठाष्टमद्वादशेषु अन्यतमे चेत्तदा जातो मनुजः निशि अन्धकत्वं प्राप्नुयात्। सार्कशुक्रः सूर्यशुक्रयुतः तनुभवनपतिः लग्नेशः त्रिकस्थ इत्यनुषङ्गस्तदानीं जातो मनुजः जन्मान्धः जन्मनैवान्धः स्यादिति। तातादीनां स्थाननाथाः एवं पूर्वोक्तप्रकारेण सार्केन्दुशुक्रास्त्रिकस्थाश्चेत्तदानीं तेषां तातादीनामन्धकत्वं प्रवरमतियुतैरादेश्यं वक्तव्यम्। तत्र तातः पिता, अनुजः कनिष्ठभ्राता, अम्बा माता, निजगृहिणी भार्या, प्रवरमतिशब्देन तातादीनां जन्मन्यपि अन्धयोगज्ञानत्वं सूच्यते। इति धनभावः ॥ ६ ॥

अन्य योगों को कहते हैं—जिसके जन्मकाल में चन्द्रमा से युक्त

शुक्र त्रिक (षष्ठ, अष्टम और द्वादश स्थान में से किसी) स्थान में स्थित हो तो वह मनुष्य रात्रि में अन्धा होता है (अर्थात् रतौंधी होती है)। सूर्य और शुक्र से युक्त लग्न का स्वामी त्रिक (६।८।१२) स्थान में स्थित हो तो मनुष्य जन्म का अन्धा होता है। ऐसे ही तात (दशम) अनुज (तृतीय), अम्बा (चतुर्थ), सुत [पञ्चम] और अपनी स्त्री [सप्तम] इन भावों के स्वामी भी यदि सूर्य, चन्द्रमा और शुक्र इन ग्रहों से युक्त होकर पूर्वोक्त स्थान [६।८।१२] में स्थित हों तो उनके [तात, अनुज इत्यादि के] अन्धकत्व का आदेश कुशाग्रबुद्धिवाले दैवज्ञों को करना चाहिये ॥ ६ ॥

अथ भ्रातृसम्भवतत्सुखादियोगानाह—

भ्रातृस्थानेशभौमौ व्ययरिपुनिधनस्थानगौ बन्धुहीनः
स्वक्षेत्रे सौम्यदृष्टे सहजभवनपे मानवः स्याच्च तद्वान्।
केन्द्रस्थे बन्धुसौख्यं शुभविहगयुते स्याददभ्रं नराणां
पापैश्चेदन्यथैतत्तदनु निजधिया ज्ञेयमित्थं समस्तम् ॥७॥

अन्वयः—भ्रातृस्थानेशभौमौ व्ययरिपुनिधनस्थानगौ बन्धुहीनः, सहजभवनपे स्वक्षेत्रे सौम्यदृष्टे मानवः तद्वान् (भ्रातृमान्) स्यात्, (सहजभवनपे) केन्द्रस्थे शुभविहगयुते नराणां अदभ्रं बन्धुसौख्य स्यात्, तदनु पापैश्चेद्युतस्तदैतदन्यथा स्यात् इत्थं निजधिया समस्तम् ज्ञेयम् ॥ ७ ॥

भ्रात्रिति। भ्रातृस्थानेशभौमौ तृतीयाधिपतिभौमौ व्ययरिपुनिधनस्थानगौ (१२।६।८) त्रिकस्थौ यदि तदा जातः बन्धुहीनः सामान्यशब्दनिर्देशेन सहोदरबन्धवो विवक्षितास्तै रहित इत्यर्थः। सहजभवनपे सहजाधिपे स्वक्षेत्रे स्वगृहे सौम्यदृष्टे शुभग्रहदृष्टे सति मानवः तद्वान्बन्धुमान् स्यात्। सहजाधिपे

शुभग्रहयुते केन्द्रस्थे अदभ्रं बहु बन्धुसौख्यं स्यात् । केन्द्रस्थे सहजभवनपे पापग्रहैर्युते चेदन्यथा बन्धुसौख्यं न स्यात् । युते दृष्टे इत्युपलक्षणम् । इत्थममुना प्रकारेण बुद्धिमद्भिर्निजधिया स्वबुद्ध्या समस्तं भावफलं तदनु योगविचारानन्तरं ज्ञेयम् । अयमर्थः । योगे सत्यपि योगकर्तृषु भूयसी पापदृष्टिः पापयोगः योगकर्तृणां नीचास्ततो योगे प्रागुक्तं लक्षणं न स्यात् इति भावः॥७॥

अब तृतीय भाव का विचार लिखते हैं—तृतीय स्थान का स्वामी और मङ्गल यदि द्वादश, षष्ठ और अष्टम स्थान में बैठे हों तो वह मनुष्य बन्धुहीन (भाइयों से रहित) होता है । तृतीय स्थान का स्वामी अपने राशि में हो और शुभग्रहों से देखा जाता हो तो मनुष्य भाइयोंवाला होता है । एवं शुभग्रहों से युक्त होकर तृतीय भाव का स्वामी यदि केन्द्र में बैठा हो तो विशेष भाइयों का सुख होता है । और यदि तृतीयेश पापग्रहों से युक्त (या दृष्ट) होकर केन्द्र में हो तो अन्यथा जाने अर्थात् भ्रातृसुख से हीन होता है । इस प्रकार बुद्धिमान् लोग अपनी बुद्धि से समस्त भावफलों का विचार करें ॥ ७ ॥

अथ चतुर्थभावफलं वदन् योगचतुष्टयमाह—

पातालेशः स्वराशौ शुभखचरयुतो भाग्यनाथेन युक्तः
सामन्तः स्यात्ततश्चेत्सुरपतिगुरुणा वाहनेशस्तनुस्थः ।
सन्दृष्टो राजपूज्यस्तदनु च हिबुकाधीश्वरो लाभसंस्थो
यानं पश्यन्नराणां निवहमभिमतं वाहनानां प्रदत्ते ॥८॥

अन्वयः—पातालेशः शुभखचरयुतो भाग्यनाथेन युक्तः स्वराशौ सामन्तः स्यात्, ततश्चेत् वाहनेशस्तनुस्थः सुरपतिगुरुणा सन्दृष्टो राजपूज्यः, तदनु च हिवुकाधीश्वरो (गुरुदृष्टः) लाभसंस्थो (अथवा गुरुदृष्टः हिवुकाधीश्वरो) यानं पश्यन् (तदा, नराणां अभिमतं वाहनानां निवहं प्रदत्ते ॥ ८ ॥

पातालेश इति । पातालेशश्चतुर्थेशः स्वराशौ शुभखचरयुतः शुभग्रहयुक्तः सन् भाग्यपेन भाग्यस्वामिना युक्तश्चेज्जातः सामन्तः माण्डलिकः स्यात् । ततो योगानन्तरं लग्नस्थः । वाहनेशो गुरुणा पूर्णदृष्ट्या दृष्टश्चेत्तदा जातो राजपूज्यः राजकृतसन्मानभाजनं स्यात् । तदनु गुरुदृष्टः सुखेशः लाभगश्चेत् , यद्वा गुरुदृष्टः सुखेशः स्थानं पश्यन्भवति तदा वाहनानां निवहं समूहं नराणामभिमतं प्रदत्त । इदं योगद्वयं वा शब्दप्रयोजकेऽपि ज्ञेयमन्ययोगलाभाच्चतुर्थदृष्टिविरहात् योगप्रभावप्रसङ्गात् ॥ ८ ॥

चतुर्थ भाव का फल कहते हैं—यदि चतुर्थ स्थान का स्वामी शुभग्रहों से और नवम भाव के स्वामी से युक्त हो कर अपने राशि में हो तो वह मनुष्य सामन्त (माण्डलिक राजा) होता है । तथा यदि वाहनेश (चतुर्थ भाव का स्वामी) लग्न में बैठा हो और बृहस्पति उसको देखता हो तो वह मनुष्य राजपूज्य (राजाओं का मान्य पुरोहितादि) होता है । (३) एवं यदि चतुर्थस्थान का स्वामी एकादश स्थान में बैठा हो और बृहस्पति से देखा जाता हो अथवा बृहस्पति से दृष्ट चतुर्थ स्थान का स्वामी चतुर्थ भाव को देखता हो तो मनुष्यों को अभिलषित वाहनों के समूह को देता है ॥ ८ ॥

अथ गृहप्राप्त्यादियोगानाह—

स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद्गृहाप्तिः
सौहार्दे वा सुहृद्भिस्तदितरगृहगश्चेद् गृहाऽलभ्ययोगः ।
यावन्तः पापखेटा धनदशमगृहप्रान्त्यपैश्चेत्त्रिकस्था
युक्तास्तावत्प्रमाणा ज्वलनवशगताः क्लेशदाःस्युर्गृहानुः॥९॥

१. गृहाः पुंसि च भूम्न्येव' इत्यमरः ।

अन्वयः—तुर्यनाथस्तनुपतिसहितः स्वक्षेत्रे (तदा) अकस्माद् गृहाप्तिः सुहृद्भिः सौहार्दं स्यात्, चेत्तदितरगृहगस्तदागृहालभ्ययोगः, यावन्तः पापखेटाः धनदशमगृहप्रान्त्यपैर्युक्तास्त्रिकस्थास्तावत्प्रमाणानुः ज्वलनवशगताः गृहाः क्लेशदाः स्युः ॥ ९ ॥

स्वक्षेत्र इति। लग्नेशसहितश्चतुर्थभावनाथः स्वक्षेत्रे चतुर्थभवने चेत्तदा जातस्य अकस्मादयत्नतो गृहाप्तिः गृहलाभः स्यात्। तथा सुहृद्भिर्हितकारकैर्जनैः सौहार्दं प्रीतिः सुहृज्जनयुक्तं गृहादि स्यादित्यर्थः। तनुपतियुक्तः चतुर्थनाथः तदितरगृहगः चतुर्थभवनादन्यभवनस्थश्चेत्तदा गृहालभ्ययोगः गृहप्राप्त्यभावः। यावन्तः क्रूरग्रहाः द्वितीयदशमचतुर्थद्वादशनाथैः सहितास्त्रिकस्थाः तावन्तो गृहाः जातस्य नुः नरस्य वह्निवशागता दग्धाः अत एव क्लेशदाः स्युः। अत्र धनेशादीनां चतुर्णां समुदितानामेकयोगो न विवक्षितः। त्रिकभवने यो वा प्रान्त्यसद्भावे सावकाशत्वात् ॥ ९ ॥

गृहप्राप्तियोग को लिखते हैं-यदि चतुर्थ भाव का स्वामी लग्न के स्वामी से युक्त होकर अपने राशि में स्थित हो तो अकस्मात् (बिना प्रयास के) गृह की प्राप्ति होती है और हितकारी मनुष्यों से मैत्री होती है। यदि चतुर्थ भाव का स्वामी चतुर्थ भाव में न पड़ा हो तो गृह के प्राप्ति का योग नहीं होता। जितने पापग्रह (२।१०।१२) इन स्थानों के स्वामियों से युक्त होकर त्रिक (६।८।१२) स्थान में बैठे हों उतने घर के जल जाने से मनुष्य को कष्ट होता है ॥ ९ ॥

अथ वाहनविरामयोगौ तच्छान्तिकरणं चाह—

यावन्तो वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयु-
स्तावन्तो वा विरामाः परमगुणवतां वाहनानां नृणां स्युः।

क्रूराः पश्यन्ति यानं व्ययनिधनगताश्चेत्तदा तद्वदेव
प्राज्ञैरादेश्यमेषां खलु शुभकरणं शान्तिकं वाहनानाम् ॥१०॥

अन्वयः—यावन्तः वाहनस्थाः शुभविहगदृशां गोचरा नोभवेयुस्तावन्तो नृणां परमगुणवतां वाहनानां विरामाःस्युः, चेद्व्ययनिधनगताः क्रूराः यानं पश्यन्ति तदा तद्वदेव फलं स्यात् , प्राज्ञैः एषां वाहनानां खलु शुभकरणं शान्तिकं आदेश्यम् ॥ १० ॥

क्रूरा इत्यनुषङ्गः यावन्तः वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयुः शुभग्रहदृष्टा न स्युः तावन्तो नृणां परमगुणवतां प्रकृष्टगुणयुक्तानां वाहनानां विरामाः विनाशाः स्युः। अथ द्वादशाष्टमगताः क्रूरा यावन्त इत्यनुषङ्गश्चतुर्थं पश्यन्ति चेत्तदा पण्डितैस्तद्वदेव दृष्टक्रूरग्रहे संख्याप्राये स्ववाहनानां विरामा स्युरिति ज्ञेयम्। तत्र वाहनानां शुभकरणं शान्तिकं प्राज्ञैरादेश्यं विधेयमिति शेषः। इति चतुर्थभाव ॥ १० ॥

जिस मनुष्य के जन्मसमय में जितने पापग्रह चतुर्थ भाव में बैठे हों और उनको शुभग्रह न देखता हो तो उस मनुष्य के उतने ही अच्छे गुणों से युक्त वाहनों का नाश होता है। एवं जितने पापग्रह बारहवें और आठवें भाव में बैठकर चतुर्थ भाव को देखते हों उतने परमगुणवाले वाहनों का नाश होता है। इस लिये ऐसे योग में बुद्धिमानों को वाहनों की शुभकारक शान्ति करने का आदेश देना चाहिये ॥ १० ॥

अथ पञ्चमभावफलं विवक्षुर्निरुपायेन विद्याबुद्धियोगानाह—

विद्यास्थानाधिपो वा बुधगुरुसहितश्चेत्त्रिके वर्तमानो
विद्याहीनो नरः स्यादथ नवमनिजक्षेत्रकेन्द्रेषु तद्वान् ।

बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले तदा स्या-
त्प्रज्ञामान्द्यं नराणामथ यदि विहगः स्वर्क्षगो दोषहृत्स्यात्॥११॥

अन्वयः—विद्यास्थानाधिपो, वा बुधगुरूसहितः (विद्यास्थानाधिपो) त्रिकेवर्त्तमानो नरः विद्याहीनः स्यात् , अथ नवमनिजक्षेत्रकेन्द्रेषु (चेत्स्थितस्तदा) तद्वान् भवति । यदि जन्मकाले गगनसदां बालत्वं वृद्धता वा तदानराणां प्रज्ञामान्द्यं स्यात् अथ यदि विहगः स्वर्क्षगो तदा दोषहृत्स्यात् ॥ ११ ॥

विद्यास्थानाधिपः पञ्चमेशः केवलो बुधगुरुसहितो वा त्रिके वर्तमानश्चेत्तदा जातो विद्याहीनः । त्रिकस्थे पञ्चमेशे बुधगुरुयोगे विद्याद्यनुकूलो नास्तीति 'वा' शब्देन द्योतितम् । अथ पञ्चमेशः पञ्चमनवमकेन्द्रेषु स्थितश्चेत्तदा जातो विद्यावान् । बुधगुरुयोगे विद्यावत्त्वं किमुत वक्तव्यमिति गम्यते । अथ जन्मकाले प्रज्ञायोगकर्तॄणां गगनसदां ग्रहाणां बालत्वं वृद्धता वा यदि तदा जातानां प्रज्ञामान्द्यमल्पबुद्धिः स्यात् । यदि बालो वृद्धो वा ग्रहः स्वक्षेत्रगः तदा दोषहृत्प्रज्ञामान्द्यत्वप्रयोजकदोषं दूरीकुर्यादित्यर्थः ॥ ११ ॥

अब पञ्चमभाव का विचार लिखते हैं—यदि पञ्चमभाव का स्वामी अकेला, अथवा बुध और बृहस्पति के साथ त्रिक (षष्ठ, अष्टम और द्वादश) स्थान में स्थित हो तो मनुष्य विद्या से हीन (निरक्षर) होता है । यदि पञ्चमेश नवम, निजक्षेत्र (पञ्चम) और केन्द्र में पड़ा हो तो वह मनुष्य विद्यायुक्त होता है (यदि बुध-गुरु के साथ पञ्चमेश केन्द्र-त्रिकोण में बैठा हो तो विशेष विद्वान् होता है) । जन्म के समय बुद्धियोगकारक ग्रहों का बाल्यत्व या वृद्धत्वा हो तो वह बालक अल्पबुद्धिवाला होता है । यदि वही (बाल वा वृद्ध होकर भी) ग्रह अपने राशि में बैठा हो तो दोष का नाशक होता है (अर्थात् वह बालक मन्दबुद्धि नहीं होता है) ॥ ११ ॥

अथ मूकत्वसन्तानाभावयोगानाह—

वाक्स्थानेशो गुरुर्वा व्ययरिपुविलयस्थानगो वाग्विहीन-
श्चैवं पित्रादिकानां पतय इह युता मूकता स्याच्च ताभ्याम्।
वागीशात्पञ्चमेशस्त्रिकभवनगतः पुत्रधर्माङ्गनाथा
रन्ध्र द्वेष्यान्तिमस्था यदि जनुषि नृणामात्मजानामभावः।१२।

अन्वयः—वाक्स्थानेशो वा गुरुः व्ययरिपुविलयस्थानगो वाग्विहीनः स्यात्, एवं इह पित्रादिकानां पतयः ताभ्यां युतास्तदा तेषां मूकता स्यात्, यदि जनुषि वागीशात्पञ्चमेशस्त्रिकभवनगतः पुत्रधर्माङ्गनाथाः रन्ध्रद्वेष्यान्तिमस्थास्तदा नृणामात्मजानामभावः स्यात्॥१२॥

वाक्स्थानेशो पञ्चमेशो, गुरुर्वा व्ययरिपुविलयस्थानगस्त्रिकस्थश्चेत्तदा वाग्विहीनः मूकः स्यात्। अथ पित्रादिमूकतायोगमाह—एवं प्रकारेण पित्रादिभावानां दशमभावादिराशीनां पतयस्ताभ्यां पञ्चमेशगुरुभ्यां युताःत्रिके तिष्ठन्ति चेत्तदा तातादीनां मूकत्वं स्यात्। आदिशब्दात् अनुजादयो ज्ञेयाः। अथ जन्मनि जीवात् जीवाधिष्ठितराशेः पञ्चमेशः त्रिकस्थः पुत्रधर्मांगनाथा पञ्चमनवमलग्नेशाः जन्मलग्नात्त्रिकस्थाः यदि तदा पुत्राणामभावो वाच्यः॥ १२॥

जन्मकाल में यदि पञ्चम स्थान का स्वामी अथवा बृहस्पति बारहवें, छठवें वा आठवें स्थान में स्थित हो तो वह बालक मूक (गूँगा) होता है। इसी तरह पितृ (दशम) इत्यादि (बन्धु, भ्रातृ, स्त्री इत्यादि भावो के स्वामी पञ्चमेश और बृहस्पति के साथ (६।८। १२) इन स्थानों में पडा हो तो उस बालल के पिता, बन्धु, माता, स्त्री इत्यादि मूक (गूँगे) होते हैं। बृहस्पति जिस राशि में बैठा हो उसमें पंचम राशि का स्वामी यदि त्रिक (६।८।१२) स्थान

हो और लग्न से पञ्चम, नवम और लग्न इन भावों के स्वामी अष्टम, षष्ठ और द्वादश इन भावों में पड़ा हो तो मनुष्य को पुत्रों का अभाव होता है ॥ १२ ॥

अथ सन्तानयोगमाह--

किञ्चित्कालं विलम्बः शुभखगसहितास्तेऽथ कर्के सुतर्क्षे
चन्द्रे कन्याप्रजावान्प्रमिततनयवांश्चाथ देवेन्द्रपूज्यात् ।
क्रूरश्चेत्पञ्चमस्थो गुरुरपि सुतगः स्यात्तदापत्यहीन-
श्छायापुत्रः स्वगेहाद्यदि भवति सुते सूनुरेकस्तदानीम्॥१३॥

अन्वयः—ते (पुत्रधर्माङ्गनाथाः) शुभखगसहिताश्चेत्तदा किञ्चित्कालं विलम्बः अथ कर्के सुतर्क्षे चन्द्रे कन्याप्रजावान्प्रमिततनयवान्, अथ देवेन्द्रपूज्यात् चेत्पञ्चमस्थो क्रूरः गुरुरपि सुतगस्तदापत्यहीनः स्यात्, यदि स्वगेहात् छायापुत्रः सुते भवति तदानीम् एकः सूनुः स्यात् ॥ १३॥

ते पुत्रधर्माङ्गनाथाः शुभखगसहिताश्चेत्तदा सन्तानोत्पत्तौ किञ्चित्कालं विलम्बः स्यात् । शुभग्रहदशान्तर्दशाबलापेक्षया विलम्ब इति भावः। अथ कर्कराशौ पञ्चमभावे चन्द्रश्चेत्तदा कन्याप्रजावान् अथवा प्रमिततनयवान् स्वल्पापत्यः स्यात् । अथ देवेन्द्रपूज्यात् जीवात्पञ्चमस्थः क्रूरश्चेत् जीवोऽपि लग्नात्पञ्चमगस्तदापत्यहीनः सन्तानरहितः स्यात् । यदि स्वगेहात्स्वराशितः पञ्चमे छायापुत्रः शनिश्चेत्तदा एकपुत्रः स्यात् । अत्र सम्पूर्णदृष्ट्या शुभकृतस्य शनेः स्वराशेः पुत्रभवने दृष्ट्यैकपुत्रयोगस्तदा रविभौमयोः स्वगृहात्पञ्चमस्थयोरेकपुत्रत्वं किमुत वक्तव्यमिति गूढोऽभिप्रायः ॥ १३ ॥

वे ही लग्न, पञ्चम और नवम के स्वामी यदि शुभग्रह से युक्त हो तो सन्तान पैदा होने में कुछ विलम्ब होता है अर्थात् अधिक उम्र

[?र] बीतने पर सन्तान उत्पन्न होता है। यदि पञ्चम भावमें कर्क राशि और उसी में चन्द्रमा बैठा हो अर्थात् चन्द्रमा अपनी राशि का [?] पञ्चम भाव में बैठा हो तो वह मनुष्य बहुत कन्या वाला [?] है। और थोड़े (गिने गिनाए) पुत्र वाला होता है। यदि [?]स्पति से पञ्चम भाव में क्रूरग्रह स्थित हो और लग्न से पञ्चम [?] में बृहस्पति बैठा हो तो वह मनुष्य सन्तानहीन होता है। यदि [?]श्चर अपनी राशि (मकर-कुम्भ) से पाँचवें भाव में स्थित हो तो [?] पुत्र होता है ॥ १३ ॥

[अ]थ अन्ययोगानाह—

[कु]म्भे चेत्पञ्च पुत्रास्तदनु च मकरे नन्दनेऽप्यात्मजाः स्यु-
[स्ति]स्रो भौमः सुतानां त्रितयमथ सुतादायको रौहिणेयः ।
[इ]त्थं काव्यः शशांको जनुषि च गुरुणा केवलेनैव पुत्राः
[पञ्च]स्युः केतुराह्वोः क्रियवृषभवने कर्कटे नो विलम्बः ॥१४॥

अन्वयः—नन्दने कुम्भे चेत्पञ्च पुत्राः, तदनु च (नन्दने) मकरे [ति]स्रोआत्मजाः स्युः, (नन्दने मकरे तत्रस्थे) भौमे सुतानां त्रितयं, [इ]त्थं रौहिणेयः काव्यः शशाङ्को जनुषि (पञ्चमे) सुतादायको, (नन्दने) [के]वलेनैव गुरुणा पञ्च पुत्राः स्युः, (पञ्चमे) क्रियवृषभवने कर्कटे (तत्रस्थे) केतुराह्वोः नो विलम्बः ॥ १४ ॥

नन्दने पञ्चमभावे कुम्भे छायासूनुरित्यनुषङ्गः यदि तदा [प]ञ्च पुत्राः स्युः। मकरे आत्मजाः तिस्रः मकरस्य स्त्रीराशित्वा-[दि]ति भावः। भौमे मकरे चेदित्यनुषङ्गः सुतानां त्रितमं त्रयं [स्या]त्। अथ रौहिणेयः बुधः पञ्चमे सुतादायकः कन्याप्रदः। [इ]त्थं शुक्रश्चन्द्रोऽपि पञ्चमे सुतादायकः । एवं केवलेन ग्रहयो-[ग]रहितेन पञ्चमस्थेन गुरुणा पञ्च पुत्राः स्युः । पञ्चमे मेषे वृषे

कर्के वा केतुराह्वोरेकतरे सति नो विलम्बः सन्तानोत्पत्तौ प्रतिबन्धो न भवतीत्यर्थः। नो विलम्ब इत्यनेन सुचितं मकरकुम्भातिरिक्तराशौ पञ्चमे शनौ मकरमन्तरेण तत्रस्थे भौमे, क्रियादिराशीन्विहाय पञ्चमे राहौ वा केतौ सन्ततेर्विलम्ब एवेति भावः ॥ १४ ॥

लग्न से पञ्चम भाव में कुम्भराशि का शनैश्चर स्थित हो तो पाँच पुत्र होते हैं। यदि पञ्चम भाव में मकर राशि हो और उसमें शनि बैठा हो तो तीन कन्यायें होती हैं। पञ्चम भाव में मकर राशि हो और उसी में मङ्गल बैठा हो तो तीन पुत्र होते हैं। पञ्चम स्थान में बुध, शुक्र और चन्द्रमा बैठे हों तो कन्याप्रद होते हैं। एवं केवल (किसी ग्रह से योग न करता हुआ) बृहस्पति यदि पञ्चम भाव में बैठा हो तो पाँच पुत्र होते हैं। पञ्चम भाव में मेष वा वृष वा कर्कराशि हो और उसमें राहु अथवा केतु स्थित हो तो पुत्रोत्पत्ति में विलम्ब नहीं होता है। अन्यथा (कुम्भ, मकर को छोड़कर अन्य राशि का शनि, मकर को छोड़कर अन्य राशि का मङ्गल और मेष, वृष वा कर्क राशि को छोडकर अन्य राशि का राहु वा केतु पञ्चम भाव में स्थित हो तो) विलम्ब होता है ॥ १४ ॥

ननु कति वर्षाणि विलम्ब इत्याह—

पापो वा वासवेज्यः सुखभवनगतः पञ्चमे वाष्टमे वा
शीतांशुः सन्ततेः स्यात्खगुणमितसमातुल्य एव प्रबन्धः।
यावन्तः पापखेटास्तनयगृहगताः सौम्यदृष्ट्या वियुक्ता-
स्तावद्वर्षप्रमाणो नियतमिह भवेत्सन्ततेर्वा विलम्बः ॥१५॥

अन्वयः—पापो वा वासवेज्यः सुखभवनगतः शीतांशुः पञ्चमेऽष्टमे वा स्यात्तदा सन्ततेः खगुणमितसमातुल्य एव प्रबन्धः, अथवा

यावन्तः पापखेटाः सौम्यदृष्ट्याविमुक्तास्तनयगृहगताः नियतमिह तद्वर्षप्रमाणो सन्ततेर्विलम्बः स्यात् ॥ १५ ॥

पापग्रहो जीवो वा चतुर्थस्थः पञ्चमेऽष्टमे वा चन्द्रो भवति हि खगुणामितसमातुल्यःत्रिंशद्वर्षमितप्रबन्धः सन्ततेरित्यनुषङ्गः इष्टो बन्धः । शुभग्रहदृष्ट्या विमुक्ताः यावन्तः पञ्चमस्थाः ग्रहाः स्युः "बलाधीनफलाः खगा" इत्युक्तप्रकारैः स्थान-आदिबलरूपकैः किं तदिति ध्येयं तावद्वर्षप्रमाणंः सन्तते-र्नयेन विलम्बः स्यादित्यर्थः ॥ १५ ॥

चतुर्थ स्थान में पापग्रह अथवा बृहस्पति स्थित हो और पञ्चम अथवा अष्टम स्थान में चन्द्रमा हों तो उस मनुष्य को तीस वर्ष तक सन्तान नहीं होता है जितने पापग्रह शुभग्रह की दृष्टि से हीन होकर पञ्चम स्थान में बैठे हों उतने ही वर्ष तक सन्तान होने में अवश्य विलम्ब होता है ॥ १५ ॥

तत्प्राप्तिर्धर्ममूला तदनु बुधकवी शङ्करस्याभिषेका-
च्चेत्तद्वदेव त्रिदिवपतिगुरुर्मन्त्रयन्त्रौषधीनाम् ।
सिद्ध्या मन्दारसूर्यौ यदि शिखितमसी तत्र वंशेशपूजा
कार्याऽऽम्नायोक्तरीत्या बुधगुरुनवपाः क्षिप्रमेवात्र सिद्धिः १६॥

अन्वयः—तत्प्राप्तिर्धर्ममूला तदनु बुधकवी शङ्करस्याभिषेकात्, गुरुश्चेत्तद्वदेव, त्रिदिवपतिगुरुर्मन्त्रयन्त्रौषधीनाम् सिद्ध्या, यदि मन्दार-सूर्यौ शिखितमसी तत्राम्नायोक्तरीत्या वंशेशपूजा कार्या, बुधगुरुनवपाः क्षिप्रमेवात्र सिद्धिः ॥ १६ ॥

तत्प्राप्तिः सन्ततिप्राप्तिर्धर्ममूला श्रुतिस्मृतिविधिगतो धर्मः हेतुर्यस्याः सा तथा आदित्यसप्तमीव्रतशङ्कराराधनसन्तान-गोपालमन्त्रजपहरिवंशश्रवणादिविहितधर्ममूलेति भावः । अत्र

विशेषः । तदनु तत्पश्चाद् बुधकवी विलम्बप्रयोजकौ चेत् शङ्करस्याभिषेकाद्रुद्राध्यायोक्तमन्त्रकरणाभिषेकात्तत्प्राप्तिरित्यनुषङ्गः । चन्द्रश्चेत्पूर्ववज्ज्ञेयम् । गुरुश्चेत्तथा यदा तदा मन्त्र यन्त्रौषधीनां सिद्ध्या सिद्धिशब्दो मन्त्रादिभिः प्रत्येकं सम्बध्यते। मन्त्रसिद्ध्या औषधीसिद्ध्येति । मन्त्राचरणेन सन्तानगोपालमृत्युञ्जयादयो मन्त्रास्तदनुष्ठानेन, यन्त्राणि यन्त्रग्रन्थोक्तानि तेषां सिद्ध्या, ओषध्यो लक्ष्मणाद्यास्तासां सिद्धिः विधवदनुष्ठानसाध्यफलेत्यर्थः । शनिभौमसूर्यराहूणां मध्ये कस्यचित्प्रतिबन्धकत्वं तत्र वंशेशपूजा कुलदेवतापूजनम्, आम्नायोक्तरीत्या कार्या। आम्नायशब्दोऽत्र वेदस्मृतिपुराणाद्युपलक्षणार्थः। तत्रापि विशेषः । बुधगुरुनवमस्थानपाः प्रतिबन्धकादश्चेदुमानुष्ठानात् क्षिप्रमेव सिद्धिः स्यादिति । इति पञ्चमभावः ॥ १६ ॥

उस (सन्तान) की प्राप्ति में धर्म ही (श्रुति, स्मृति और पुराणों में लिखे हुए आदित्यसप्तमी व्रत, शङ्कर का आराधन, सन्तान गोपाल मन्त्र का जप, हरिवंश-श्रवण इत्यादि) मुख्य कारण हैं अर्थात् इनके अनुष्ठान से सन्तान अवश्य होता है। यदि जन्माङ्ग में बुध, शुक्र और चन्द्रमा सन्तान होने में विलम्ब करने वाले हों तो शङ्कर का अभिषेक (रुद्राध्याय के मन्त्रों से) करने से, यदि बृहस्पति सन्तानोत्पत्ति में विलम्बकर्ता हो तो यन्त्र (यन्त्रग्रन्थों में कहे हुए सन्तानप्रद यन्त्रों), मन्त्र (सन्तानगोपाल महामृत्युञ्जय मन्त्र) और औषध (वैद्यक शास्त्र में लिखे हुए बूटी इत्यादि औषधियों के सेवन) से तथा किसी सिद्ध योगी के आशीर्वाद से सन्तान की प्राप्ति होती है। यदि शनि, भौम, सूर्य, केतु और राहु इन में से कोई ग्रह सन्तान होने में विलम्ब करने वाले हों तो श्रुति, स्मृति, पुराणोक्त प्रकार से

ांशेश (कुलदेवता) का पूजन करना चाहिए तथा बुध, बृहस्पति और नवम स्थान का स्वामी यदि सन्तान के प्रतिबन्धक हों तो दुर्गा के आराधन से सन्तानप्राप्तिरूप कार्य की सिद्धि होती है ॥ १६ ॥

अथ रिपुभावफलं वक्तुकामस्तावद्व्रणरोगानाह—

षष्ठेशे पापयुक्ते तनुनिधनगते नुः शरीरे व्रणाः स्यु-
श्चादेश्यं तज्जनित्रीजनकसुतवधूबन्धुमित्रादिकानाम् ।
इत्थं तत्स्थानगामी शिरसि दिनमणिश्चानने शीतभानुः
कण्ठे भूमीतनूजो हृदि शशितनयो वाक्पतिर्नाभिमूले ॥१७॥

अन्वयः—षष्ठेशे पापयुक्ते तनुनिधनगते नुः शरीरे व्रणाः स्युः, इत्थम् जनित्रीजनकसुतवधूबन्धुमित्रादिकानाञ्चादेश्यम् । तत्स्थानगामी दिनमणिः शिरसि, शीतभानुः आनने, भूमीतनूजो कण्ठे, शशितनयो हृदि, वाक्पतिर्नाभिमूले (व्रणाः स्युः) ॥ १७ ॥

पापग्रहयुते षष्ठेशे लग्नाष्टमगते सति नुः मनुजस्य शरीरे व्रणाः स्युः इत्थमुक्तप्रकारेण जनित्र्यादिभावानामीशे पापयुते तनुनिधनगते तेषां व्रणाः स्युरित्यादेश्यं वक्तव्यम् । अङ्गविशेष-व्रणानाह । तत्स्थानगामी तनुनिधनगतः षष्ठेशो दिनमणिः सूर्यश्चेत् शिरसि व्रणः चन्द्रश्चेन्मुखे, भौमश्चेत्कण्ठे, बुधश्चेद्-हृदये, वाक्पतिश्चेन्नाभिमूले व्रणाः स्युः ॥ १७ ॥

अब षष्ठ भाव के फल को लिखते हैं। जन्मकाल में पापग्रह से युक्त होकर छठें भाव का स्वामी लग्न अथवा अष्टम भाव में बैठा हों तो मनुष्य के देह में व्रण (फोडा, फुन्सी, चोट इत्यादि) होते हैं । ऐसे ही माता, पिता, पुत्र, स्त्री, बन्धु (भ्रातृवर्ग) और मित्र इत्यादि भावों के स्वामी पापग्रहों से युक्त होकर यदि लग्न अथवा अष्टम स्थान में स्थित हो तो माता, पिता इत्यादि के शरीर में व्रण कहना

चाहिए। यदि सूर्य षष्ठेश होकर लग्न अथवा अष्टम भाव में बैठा हो तो शिर में, चन्द्रमा षष्ठेश होकर (१।८) भाव में स्थित हो तो मुख में, मंगल षष्ठेश हो तो कण्ठ (गले) में, बुध षष्ठेश हो तो हृदय (छाती) पर और बृहस्पति षष्ठ का मालिक होकर लग्न अथवा अष्टम में बैठा हो तो नाभिमूल (ढोंढी) में व्रण होता है ॥ १७ ॥

नेत्रे पृष्ठे च शुक्रो दिनकरतनयः स्यात्पदे चाधरे चे-
त्केतुर्वा सैंहिकेयस्तदनु तनुपतिर्भौमवित्क्षेत्रसंस्थः।
आभ्यामालोकितः सन्भवति हि कतिचित्स्थानगोवातदानीं-
नेत्रे रोगी नरः स्यात्प्रवरमतियुतैर्होरिकैर्ज्ञेयमेवम् ॥ १८ ॥

अन्वयः—शुक्रः नेत्रे पृष्ठे च, दिनकरतनयः पदे, चेत् केतुर्वा सैंहिकेयः अधरे (व्रणाः स्युः) तदनु भौमवित्क्षेत्रसंस्थः तनुपतिः आभ्यामालोकितः सन् कतिचित्स्थानगो वा तदानीं नेत्ररोगी स्यात् एवं प्रवरमतियुतैर्होरिकैः ज्ञेयम् ॥ १८ ॥

शुक्रश्चेन्नेत्रमूले पृष्ठे च, शनिश्चेत्पदे चरणे, राहुः केतुवा अधरे व्रणाः स्युः इति पूर्वश्लोकेनान्वयः। अथ नेत्रव्याधियोगः तदनु भौमबुधराशिस्थो लग्नेशः भौमबुधदृष्टः कतिचित्स्थानगोऽपि वा, यत्र कुत्र वा स्यात्तदानीं जातः नेत्ररोगी स्यात्। प्रवरमतियुतैर्होरिकैरेवं ज्ञेयम् ॥ १८ ॥

शुक्र षष्ठ का स्वामी होकर लग्न वा अष्टम में बैठा हो तो नेत्र और पीठ में और शनि षष्ठेश हो तो पैर में, राहु और केतु षष्ठ का स्वामी[1] हो और लग्न अथवा अष्टम में बैठे हों तो नीचे के ओठ में व्रण होते हैं। यदि

(१) कन्या राहुगृहं प्रोक्तं केतोश्च मिथुनं स्मृतम्। राहु कन्या राशि के और केतु मिथुन राशि के स्वामी होते है।

लग्न का स्वामी मङ्गल और बुध की राशि अर्थात् मेष, वृश्चिक, मिथुन और कन्या में बैठा हो उसको मङ्गल और बुध देखते हों अथवा लग्नेश किसी स्थान में बैठा हो और मङ्गल बुध से देखा जाता हो तो वह मनुष्य नेत्र रोगवाला होता है। इस तरह विशिष्ट बुद्धिवाले ज्यौतिषी लोग जानें ॥ १८ ॥

अथान्ययोगाः—

षष्ठेशे लग्नयाते भवति हि मनुजो वैरिहन्ता धनस्थे
पुत्रात्तार्थोऽतिदुष्टः सहजभवनगे ग्रामदुःखाकरः स्यात् ।
नाभिस्थाने च रोगी तनुनिधनपती शत्रुभावस्थितौ ना
नेत्रे वामेतरे स्यादसुरकुलगुरुः सूर्यजस्त्वङ्घ्रिरोगी ॥१९॥

अन्वयः—षष्ठेशे लग्नयाते मनुजः वैरिहन्ता भवेत्, धनस्थे पुत्रात्तार्थोऽतिदुष्टः, सहजभवनगे ग्रामदुःखाकरः, नाभिस्थाने रोगी च स्यात्, तनुनिधनपती शत्रुभावस्थितौ ना वामे नेत्रे, असुरकुलगुरुः इतरे नेत्रे रोगी स्यात् सूर्यजः अङ्घ्रिरोगी स्यात् ॥ १९ ॥

षष्ठभावाधिपे लग्नस्थे जातः शत्रुहन्ता स्यात् । धनस्थे षष्ठेशे पुत्रात्तार्थः, पुत्रेणात्तः गृहीतः अर्थो धनं यस्य सः पुत्रहृतधन इत्यर्थः, अतिदुष्टश्च स्यात् । सहजभवनगे ग्रामस्य दुःखकरः नाभौ रोगी च स्यात् । लग्नाष्टमपती षष्ठस्थौ ना पुरुषः नेत्ररोगी स्यात् । अत्र वामेतरशब्दोपादानादत्र वाम इति गम्यते । शुक्रः षष्ठेऽष्टमे इतरे दक्षिणनेत्रे रोगी । शनिः पृष्ठे चरणे रोगी स्यात् ॥ १९ ॥

षष्ठ का स्वामी यदि लग्न में स्थित हो तो मनुष्य शत्रु का नाश करनेवाला होता है। षष्ठेश द्वितीय भाव में बैठा हो तो उसके धन को उसका पुत्र ले (छीन) लेता है और वह बड़ा दुष्ट होता है।

षष्ठेश तृतीय भाव में बैठा हो तो गाँव के लोगों को दुःख देनेवाला और नाभि में रोगवाला होता है। और यदि लग्न और अष्टम स्थान के स्वामी षष्ठ भाव में पड़े हों तो मनुष्य के बाँये नेत्र में रोग होता है। और शुक्र लग्न अष्टम का स्वामी होकर, षठ में पड़ा हो तो दक्षिण नेत्र में रोग होता। यदि शनि षष्ठ में पड़ा हो तो चरण में रोगवाला होता है ॥ १९ ॥

अथान्ये योगाः—

दन्ते दन्तच्छदे वा कुमुदपतिरिपुः संस्थितः षष्ठभावे
केतुर्वा लग्ननाथः कुजबुधभवने संस्थितः क्वापि दृष्टः।
स्वेन प्रत्यर्थिना वा भवति जनुषि चेदासनार्धे सरोग-
स्तौ भूमीसूर्यपुत्रौ यदि रिपुगृहगौ तद्भवः स्याद्गदो नुः॥२०॥

अन्वयः—कुमुदपतिरिपुः केतुर्वा षष्ठभावे दन्ते दन्तच्छदे वा (रोगी स्यात्) जनुषि लग्ननाथः कुजबुधभवने क्वापि संस्थितः स्वेन प्रत्यर्थिना वा दृष्टश्चेदासनार्धे सरोगः स्यात्, यदि तौ भूमीसूर्यपुत्रौ रिपुगृहगौ तद्भवः नुः गदः स्यात् ॥ २० ॥

राहुकेतू शत्रुभावे चेद्दन्ते दन्तच्छदे ओष्ठे वा रोगी स्यात्। भौमबुधराशिस्थितो लग्नेशः स्वेन प्रत्यर्थिना स्वशत्रुणा पूर्णदृष्ट यत्र कुत्रापि स्यात्तदा आसनार्द्धे गुदसमीपे वा रोगो स्यात्। यदि तौ भूमिसूर्यपुत्रौ रिपुगृहगौ षष्ठभावसंस्थौ चेत्तदा तद्भवः नु पुरुषस्य गदो रोगः स्यात्। भूमिपुत्रे रुधिरविकारः, शनावितरः स्यादित्यर्थः ॥ २० ॥

यदि राहु और केतु छठें स्थान में बैठे हों तो दाँतों में अथवा दोनों ओठों में रोग होता है, यदि लग्न का स्वामी मङ्गल और बुध

की राशि (मेष, वृश्चिक, मिथुन, कन्या) में होकर किसी भाव में बैठा हो और उसके शत्रु ग्रह उसको देखते हों तो उस मनुष्य को आसनार्द्ध (गुदा के समीप) में रोग होता है। यदि भौम और शनि छठें भाव में पड़े हों तो मनुष्य को तद्भव (मङ्गल हो तो खून के विकार से फोड़ा फुंसी, इत्यादि, शनि छठे में हो तो वात के प्रकोप से) रोग होता है ॥ २० ॥

प्रालेयांशौ रिपुस्थे खलखगसहिते मानवो रोगवान् स्यात्
क्रूरैर्निष्पीडितश्चेत्तनुसदनगतः शीतरश्मिस्तदानीम् ।
क्रूरे केन्द्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान् स्या-
त्तस्मिन् काव्यालयस्थे कुजगुरुकविभिर्नेक्षिते तद्वदेव ॥२१॥

अन्वयः—प्रालेयांशौ खलखगसहिते रिपुस्थेमानवो रोगवान् स्यात्, चेत्क्रूरैर्निष्पीडितः शीतरश्मिः तनुसदनगतः तदानीम् (तद्वान् स्यात्) यदि क्रूरे केन्द्रालयस्थे शुभविहगैर्नेक्षिते (तदा) रोगवान् स्यात्, तस्मिन् (क्रूरे) काव्यालयस्थे कुजगुरुकविभिर्नेक्षिते तद्वदेव (रोगवान् स्यात्) ॥ २१ ॥

तथा प्रालेयांशौ चन्द्रे खलखगसहिते पापग्रहयुक्ते शत्रुभावस्थे सति रोगवान् स्यात् । क्रूरैर्निष्पीडिते शनिप्रभृतिभिः क्रूरग्रहैः योगेन दृष्ट्या वा पीडिते तनुसदनगते लग्नगे तस्मिन् शीतकरे चन्द्रे तद्वान् रोगी स्यात् । शुभग्रहदृष्टिरहितः केन्द्रगः क्रूरश्चेद्रोगवान् स्यात् । तस्मिन् क्रूरे शुक्रराशिसंस्थे कुजशुक्रगुरुभिर्न दृष्टे तद्वदेव रोगवानेव स्यात् । अत्र यद्यपि विशेषो नोक्तस्तथापि योगकर्तृगृहस्वामिकफवातपित्तादिकोपजन्यो विशेषरोगो ज्ञेयः ॥ २१ ॥

चन्द्रमा पापग्रहों से युक्त होकर छठें भाव में हो तो मनुष्य

रोगी होता है। अथवा चन्द्रमा पापग्रहों से पीड़ित होकर लग्न में स्थित हो तो भी मनुष्य रोगी होता है। पापग्रह केन्द्र में बैठे हों और उनको शुभग्रह न देखते हों तो भी मनुष्य रोगी होता है। इसी प्रकार पापग्रह शुक्र की राशि (वृष, तुला) में हो यदि उनको मङ्गल, बृहस्पति और शुक्र न देखते हों तो भी वह आदमी रोगी होता है॥ २१॥

पुँल्लग्ने स्वीयतुङ्गे रिपुभवनपतौ वीक्षितेऽसन्नभोगै-
रङ्गे नूनं नराणामरिजनवशतः स्याद्गदो गूढरूपः।
रिःफस्थाने स्थिते चेदरिसदनपतौ सिंहिकापुत्रयुक्ते
किंवा सप्ताश्वयुक्ते परगृहवसतिर्नीचवृत्तिर्नरः स्यात् ॥२२॥

अन्वयः—रिपुभवनपतौ पुँल्लग्ने स्वीयतुङ्गे ऽसन्नभोगैर्वीक्षिते नूनं नराणामङ्गेऽरिजनवशतो गूढरूपः गदो स्यात्। अरिसदनपतौ चेत् सिंहिकापुत्रयुक्ते किंवा सप्ताश्वयुक्ते रिःफस्थाने स्थिते नरः परगृहवसतिर्नीचवृत्तिः स्यात्॥ २२॥

षष्ठेशे पुंराशिलग्ने स्वोच्चे वा पापग्रहैर्दृष्टे सति नराणां जातानां अङ्गे शरीरे अरिजनवशतः शत्रुजनकारितः गूढरूपः प्रच्छन्नः गदो रोगः स्यात्, अत्र ग्रहतुङ्गराशीनां प्रायः स्त्रीराशित्वात् पुँलग्ने वा शब्दप्रयोगो ज्ञायते। षष्ठेशो राहुयुक्तो यद्वा सूर्ययुक्तः द्वादशे वा स्थितः तदा जातो नरः परगृहवासी नीचवृत्तिश्च स्यात्॥ २२॥

छठें स्थान का स्वामी पुरुषराशि लग्न में अथवा अपने उच्च में बैठा

---

१ "ओजाः पुरुषा ज्ञेया मेषात्स्त्रीसंज्ञका युग्मा" इति।

जितनी विषम राशियाँ हैं वे पुरुष और समराशियां स्त्रीसंज्ञक होती हैं, जैसे (१,३,५,७,९,११) ये पुरुष राशियाँ हैं और शेष (२,४,६,८,१०,१२) ये स्त्रीसंज्ञक हैं।

। और उसको पापग्रह देखते हों तो मनुष्य के शरीर में शत्रुओं के
ारा किया गया कोई गुप्तरोग अवश्य होता है। यदि छठे स्थान का
ामी राहु अथवा सूर्य से युक्त होकर बारहवें स्थान में बैठा हो तो
नुष्य दूसरे के घर में रहने वाला और नीच काम करने वाला
ोता है ॥ २२ ॥

अथ सप्तमभावफलं निरूपयिष्यन् विवाहयोगानाह—

ावन्तो वा विहङ्गा मदनसदनगाश्चेन्निजाधीशदृष्टा-
स्तावन्तो नुर्विवाहास्त्वथ सुमतिमता ज्ञेयमित्थं कुटुम्बे ।
ार्यो होरागमज्ञैरधिकबलवतां खेचराणां हि योगा-
दादेश्यं तत्र वीर्यं रविविधुकुभुवामङ्गदिक्शैलसंख्यम् ॥ २३ ॥

अन्वयः—अथ यावन्तः विहङ्गाः मदनसदनगाः निजाधीशदृष्टाश्चेत्ता-
ान्तो नुः विवाहाः स्युः, इत्थं सुमतिमता कुटुम्बेऽपि ज्ञेयम्। होरागमज्ञैः
अधिकबलवतां खेचराणां योगात् हि (विचारः) कार्यः, तत्र रविविधु-
कुभुवामङ्गदिक्शैलसंख्यम् वीर्यमादेश्यम् ॥ २३ ॥

यावन्तो ग्रहाः सप्तमस्थाः सप्तमेशेन दृष्टाः तावन्तो विवाहाः
नुःपुरुषस्य ज्ञेयाः। सुमतिमता जन्मलग्नाभिज्ञेन दैवज्ञेन एव-
मुक्तप्रकारेण कुटुम्बे जनकभ्रात्रादौ ज्ञेयम्। होरागमज्ञैर्जातक-
शास्त्रविद्भिरधिकबलवतां ग्रहाणामेवं योगाद्विचारः कार्यः।
तत्राधिकबलं रविविधुकुभुवां सूर्यचन्द्रभौमानाम्, अंगदिक्शैल-
संख्यमादेश्यम्, सूर्यस्य षड् रूपाणि, चन्द्रस्य दश रूपाणि,
भौमस्य सप्त रूपाणि, अन्येषां षट् रूपाण्येव 'अंगरूपाधिको
बली'ति पद्धतिवचनात् ॥ २३ ॥

अब सप्तमभाव का विचार लिखते हैं। जितने (पाप वा शुभ)
ग्रह सप्तमभाव में बैठे हों और सप्तमभाव के स्वामी से देखे जाते हों

तो उस मनुष्य के उतने ही विवाह होते है। इसी प्रकार जन्मकुण्डली की संस्था को जाननेवाला बुद्धिमान् ज्यौतिषी उस मनुष्य के कुटुम्ब (भ्राता, पिता) इत्यादि के विवाह को जानै। होराशास्त्र के जानने वाले विद्वान् अधिक बलवान् ग्रह के योग से उपरोक्त विचार करैं। यहाँ सूर्य्य का ६ बल, चन्द्रमा का १० बल, भौम का ७ बल और शेष ग्रहों का ६ बल होता है ॥ २३ ॥

केन्द्रस्था वा त्रिकोणे यदि खलु गृहिणीकारकाख्या नभोगा
कामार्थेशौ निजर्क्षे परिणयनविधिः स्यात्तदानीं नुरेकः।
जायाधीशः कुटुम्बाधिपतिरपि युतश्चेत्त्रिके गर्हिताख्यै-
र्यावद्भिः शुक्रयुक्तो नियतमिह भवेत्तावतीनां विरामः॥२४॥

अन्वयः—यदि गृहिणीकारकाख्यानभोगा केन्द्रस्था वा त्रिकोणे कामार्थेशौ निजर्क्षे तदानींखलुनुःपरिणयनविधिः एकः स्यात्। जायाधीशः कुटुम्बाधिपतिरपि शुक्रयुक्तोत्रिके यावद्भिर्गर्हिताख्यैः (दृष्टः) इहतावतीनां विरामः भवेत् ॥ २४ ॥

गृहिणीकारकाः सप्तमभावे शुभग्रहाः 'शुक्रेन्दुजीवशशिजैः सकलैस्त्रिभिर्वा द्वाभ्यां कलत्रभवने च तथैककेन। एषां गृहेऽपि च गणेऽपि विलोकिते वा सन्ति स्त्रियो मदनभावपतिस्वभावाः।' इति कल्याणवर्मवचनात्। एते केन्द्रस्थाः वा त्रिकोणे स्युः तथा सप्तमद्वितीयपती स्वभवने स्यातां तदा जातस्य नुः पुरुषस्य परिणयनविधिः विवाहः एकः स्यात्। सप्तमभावाधीशः द्वितीयाधिपो वा शुक्रयुक्तः यावद्भिः क्रूरग्रहैर्दृष्टः सहितः त्रिके स्यात् तावतीनां स्त्रीणां विरामो नाशः स्यात् ॥ २५ ॥

---

१. ग्रन्थान्तरेप्युक्तं—अर्धाधिकं षट्कमिनस्य सूरेः शुक्रस्य पञ्चाधिक धर्मरूपम्। सप्तेन्दुपुत्रस्य बलं षडिन्दोः सौराररयोसायकरूप संख्या।

यदि स्त्रीकारक (शुभ) ग्रह केन्द्र (लग्न, चतुर्थ, सप्तम और दशम) अथवा त्रिकोण (नवम, पञ्चम) स्थान में बैठे हों और सप्तम तथा द्वितीय भाव के स्वामी अपनी अपनी राशि में बैठे हों तो मनुष्य का एक विवाह होता है। और सप्तम भाव का स्वामी अथवा द्वितीय भाव का स्वामी शुक्र से युक्त होकर त्रिक (षष्ठ, अष्टम और द्वादश) स्थान में बैठा हो और जितने पापग्रहों[1] से देखा जाता हो या युक्त हो उस मनुष्य के उतनी ही स्त्रियों का नाश होता है ॥ २४ ॥

---

१. ग्रन्थान्तर से विवाहयोग और दशान्तर्दशा के क्रम से और बृहस्पति से विवाह के समयज्ञान को लिखते हैं—

लग्नाऽनङ्गपतिस्फुटैक्यगृहगे जीवे विवाहं वदे-
च्चन्द्राधिष्ठिततारकाधिपतयोरैक्यांशके वा तथा।
जीवे मित्रनवांशके बलयुते यद्येकदारान्वितः
स्वांशे द्वित्रिकलत्रवान् बहुवधूनाथः स्वतुङ्गांशके ॥ १ ॥
कलत्रनाथस्थितभांशकेशयोः सितक्षपानायकयोर्बलीयसा।
दशागमे द्यूनपयुक्तभांशके त्रिकोणगे देवगुरौ करग्रहः ॥ २ ॥
शुक्रोपेतकलत्रराशिपदशाभुक्तिर्विवाहप्रदा
लग्नाद्वित्तपतिस्थराशिपदशाभुक्तौ च पाणिग्रहः।
कर्मायुर्भवनाधिनायकदशाभुक्तौ विवाहः क्रमात्
कामेशेन युते कलत्रगृहगस्तत्पाकभुक्तौ तथा ॥ ३ ॥
सौम्यव्योमचरान्वितः शुभगृहेचादौ ददाति श्रियं
पापर्क्षे शुभखेचरो यदि दशामध्ये विवाहादिकम्।
क्रूरः पापगृहोपगो यदि फलापाकावसाने तथा
सौम्यर्क्षे यदि सर्वकालफलदः सौम्यान्वितः शोभनः ॥ ४ ॥
शुक्राच्चन्द्रात्सप्तमे यद्गृहं स्यात्संख्यातुल्ये वत्सरे करि युते वा।
स्याद्उद्वाहो वत्सरे तद्दशान्ते बंशो रूपं तत्पतेश्चिन्तनीयम् ॥ ५ ॥

अथ गर्भाभाव योगानाह—

लग्नस्थे सप्तसप्तौ दिनमणितनये कामगेऽथार्कमन्दौ
द्यूने चन्द्रे नभःस्थे न च यदि गुरुणाऽऽलोकिते नो प्रसूते।
द्वेष्येशे मित्रमन्दौ द्विषि सितकिरणेऽस्ते बुधेनेक्षिते नो
सूते द्वेष्ये जलर्क्षे यदि कुजरविजौ गर्भिणी स्यान्न नारी।२५।

अन्वयः—सप्तसप्तौलग्नस्थे दिनमणितनयेकामगे, अथार्कमन्दौ-द्यूने नभस्थेचन्द्रेयदि गुरुणा नालोकिते (तदा) नो प्रसूते, द्वेष्येशे मित्रमन्दौ द्विषि बुधेनेक्षिते सितकिरणेऽस्ते नो सूते, द्वेष्येजलर्क्षे यदि (तत्र) कुजरविजौ नारी गर्भिणी न स्यात् ॥ २५ ॥

सप्तसप्तौ सूर्ये लग्नस्थे शनौ सप्तमे एको योगः । अथ सूर्यशनी सप्तमे गुरुदृष्टिरहितश्चन्द्रो दशमे इति द्वितीयो योगः । अत्र नारी नो प्रसूते । द्वेष्येशः शत्रुभवनस्वामी तथा मित्रमन्दौ रविशनि च द्विषि षष्ठे बुधेन दृष्टः सितकिरणश्चन्द्रोऽस्ते सप्तमे अयं तृतीयो योगः। अत्र नारी नो प्रसूते। कुजशनी षष्ठे चतुर्थे यदि तदा जातस्य नारी गर्भिणी न स्यादिति चतुर्थो योगः। इति सप्तमभावः ॥ २५ ॥

अब गर्भाभावयोग को कहते हैं। (१) लग्न में सप्तसप्ति(सूर्य) और सप्तम स्थान में शनैश्चर हों, (१) अथवा सप्तम स्थान में सूर्य और शनि तथा दशम में बृहस्पति की दृष्टि से रहित चन्द्रमा हों (३) अथवा शत्रुस्थान का स्वामी तथा सूर्य और शनैश्चर षष्ठ भाव में

सितात्त्रिकोणराशिगे गुरुर्भयेद्धि गोचरे ।
करग्रहस्तदा भवेद्विचार्य बुद्धिमान्वदेत् ॥ ६ ॥
लग्नाधीशमदाधीशौ भागादिविदसंगुणौ ।
कृत्वा तद्वत्सरमिते वर्षे वाच्यं विवाहकम् ॥ ७ ॥

और बुध से दृष्ट चन्द्रमा सप्तम स्थान में बैठा हो तो उसकी स्त्री को प्रसव नहीं होता है अर्थात् यदि गर्भ रह भी जाय तो भी अपूर्ण नष्ट हो जाता है। यदि शनैश्चर और मंगल छठें अथवा चौथे स्थान में हों तो उसकी स्त्री को गर्भस्थिति भी नहीं होती है ॥ २५ ॥

अथाष्टमभावः तत्र कष्टकर्मकरादियोगमाह—

रन्ध्रस्थानस्थिता वा स्थिरभवनगताः शुक्रवागीशसौम्याः।
कृच्छ्राणां कर्मणा ना भवति हि नियतं कारकःस्तब्धभावः।
बाल्ये दुःखी नरः स्यान्निधनगृहपतौ लाभयाते सुखी स्या-
त्पश्चात्पापेऽल्पमायुः शुभखगसहिते दीर्घमायुर्नराणाम्॥२६॥

अन्वयः—शुक्रवागीशसौम्याः रन्ध्रस्थानस्थिता वा स्थिरभवनगताः (तदा) ना नियतं कृच्छ्राणां कर्मणां कारकः स्तब्धभावः स्यात्, निधनगृहपतौ लाभयाते नरः बाल्येदुःखीपश्चात्सुखीस्यात्, (लाभगेऽष्टमेशे) पापेऽल्पमायुः (तस्मिन्) शुभखगसहिते नराणाम्दीर्घ मायुः स्यात् ॥ २६ ॥

शुक्रगुरुबुधाः अष्टमस्थाः स्थिरराशिगता वा तदा जातः ना पुरुषः नियतं नियमेन कष्टकर्मणां कर्ता स्यात्। स्तब्धभावः कठिनचित्तश्च स्यात्। अष्टमभावेशे लाभगे बाल्ये बाल्यावस्थायां दुःखी पश्चात्सुखी स्यात्। लाभगेऽष्टमेशे पापे अल्पायुः स्यात्। तस्मिन्नेव शुभग्रहयुक्ते जातानां दीर्घमायुः स्यात् ॥ २६ ॥

अब अष्टमभाव का विचार लिखते हैं। जिस मनुष्य के जन्मकाल में अष्टमस्थान में अथवा स्थिरराशि में बुध, गुरु, और शुक्र बैठे हों तो वह कठिन कर्म करने वाला और निष्ठुर हृदय वाला होता है। अष्टम स्थान का स्वामी ग्यारहवें भाव में बैठा हो तो वह बालकपन में

दुःखी और उसके बाद सुखी होता है । यदि अष्टम भाव का स्वामी पापग्रह हो और एकादश भाव में बैठा हो तो वह बालक अल्पायु होता है । यदि अष्टम स्थान का स्वामी शुभ ग्रहसे युक्त होकर एकादश भाव में बैठा हो तो वह पुरुष दीर्घायु होता है ॥ २६ ॥

कुर्यादायुर्गृहेशः खलखगयुगरिप्रान्त्यसंस्थोऽल्पमायु-
श्चेल्लग्नाधीशयुक्तो निधनभवनपः स्वल्पमायुः प्रदत्ते ।
रन्ध्रस्थो वा चिरायुस्तदनु रविभवस्तत्र तद्वल्लयेशः
कोशस्थानस्थितश्चेज्जनुषि हि मनुजो वैरियुक्तस्करःस्यात् २७॥

अन्वयः—आयुर्गृहेशः खलखगयुगरिप्रान्त्यसंस्थो अल्पमायुः कुर्यात्, लग्नाधीशयुक्तो निधनभवनपः चेत् (अरिप्रान्त्यसंस्थो) स्वल्पमायुः प्रदत्ते । (निधनभवनपः) रन्ध्रस्थो चिरायुर्वा तदनु तत्र रविभवस्तद्वत् (चिरायुः), जनुषि लयेशः कोशस्थानस्थितश्चेन्मनुजो-वैरियुक्तस्करः स्यात् ॥ २७ ॥

आयुर्गृहेशः अष्टमपतिः क्रूरयुक्तः षष्ठद्वादशगतः तदाल्प-मायुः कुर्यात् । अष्टमपतिः लग्नेशयुक्तः अरिप्रान्त्यसंस्थः । इत्यनु-षंगः । तदाऽल्पमायुः प्रदत्ते । अष्टमेशः रन्ध्रस्थो वा चिरायुः प्रदत्ते । अष्टमेशः तदनु रविभवो वा तत्राष्टमे तद्वत् चिरायुः प्रदत्ते । लयेशः अष्टमेशः कोशस्थानस्थितः द्वितीये स्थितश्चे-त्तदा तस्करो वैरियुक्तश्च स्यात् ॥ २७॥

अष्टम स्थान का स्वामी पापग्रह से युक्त होकर छठवें वा बारहवें स्थान में बैठा हो तो मनुष्य अल्पायु होता है । यदि अष्टम स्थान का स्वामी लग्न के स्वामी से युक्त होकर छठें और बारहवें स्थान में हों तो अल्पायु होता है । अष्टम का स्वामी अष्टम स्थान में हो तो दीर्घायु होता है । अथवा शनैश्चर आठवें स्थान में हों तो दीर्घायु करता है । यदि जन्मकाल में अष्टम भाव का स्वामी द्वितीय भाव में हो तो वह मनुष्य चोर होता है और शत्रुओं से युक्त होता है ॥ २७ ॥

आयुर्देहाधिनाथौ निधनरिपुगतौ हीनवीर्यौ प्रसूतौ
संग्रामे कीर्तिशेषं व्रजति बलयुतौ तौ तदा तज्जयाप्तिम् ।
शुक्रेणान्दोलिकायास्तनुपविधियुतो वाहनस्थाननाथो
मूर्तौ दन्तावलेन्द्रैरथ गुरुसहितः स्याज्जयो वाजिवाहैः ॥२८॥

अन्वयः—प्रसूतौ हीनवीर्यौ आयुर्देहाधिनाथौ निधनरिपुगतौ(तदा) संग्रामे कीर्त्तिशेष व्रजति, तौ बलयुतौ तदा तज्जयाप्तिम् (व्रजति), वाहनस्थाननाथो शुक्रेण (युतः) आन्दोलिकायाः जयः, वाहनस्थाननाथो तनुपविधियुतो मूर्तौ दन्तावलेन्द्रैः (जयः), अथ (सुखेशः) गुरुसहितः वाजिवाहैः जयः स्यात् ॥ २८ ॥

प्रसूतौ जन्मसमये आयुर्देहाधिनाथौ अष्टमलग्नपती हीनवीर्यौ अष्टमषष्ठगतौ तदा संग्रामे कीर्तिशेषं प्राप्नोति, संग्रामाभिमुखो युद्धं विहाय पञ्चत्वं प्राप्नोतीत्यर्थः । तावेवायुर्देहाधिनाथौ सबलौ चेद्विजयी भवति । चतुर्थेशः शुक्रेण युतश्चेत् आन्दोलिकायाः शिविकाया जयः शिविकारूढो जयतीत्यर्थः । चतुर्थेशो लग्नेशेन चन्द्रेण च युतः मूर्तौ लग्ने स्थितश्चेत्तदा दन्तावलेन्द्रैः महागजैः जयः स्यात् । अथ चतुर्थेशो गुरुयुतः लग्ने चेत्तदा वाजिवाहैः वाजिराजैः गजेन्द्रैश्च सह जयः स्यात् ॥ इत्यष्टमभावः ॥ २८ ॥

जिसके जन्म समय में अष्टमस्थान और लग्न का स्वामी निर्बल होकर अष्टम वा षष्ठ भाव में हो तो वह मनुष्य लड़ाई में कीर्तिशेष को पाता है, (युद्ध से भागने पर मारा जाता है), यदि वेही अष्टम और लग्न के स्वामी बलवान् हों तो उस मनुष्य की जय होती है । चतुर्थस्थान का स्वामी शुक्र से युक्त हो तो आन्दोलिका (पालकी) पर बैठकर जय को पाता है । यदि चतुर्थेश लग्न के स्वामी और

चन्द्रमा से युक्त होकर लग्न में बैठा हो तो दन्तावल (हाथी) पर बैठकर और यदि बृहस्पति से युक्त होकर चतुर्थ का स्वामी लग्न में बैठा हो तो बड़े २ घोड़े और हाथियों से बिजय प्राप्त करता है ॥ २८ ॥

अथ नवमभावस्तत्र शुभयोगमाह—

भाग्येशो मूर्तिवर्ती सुरपतिगुरुणालोकितो भूपवन्द्यो
लग्नस्थो वाहनेशो नवमपतिरुभौ पश्यतश्चेत्स्वगेहम् ।
सर्वासामास्पदं स्यान्मनुज इह तदा सम्पदां वाहनेन्द्रो
रन्ध्रस्थानस्थितश्चेद्व्रजति हि मनुजो भाग्यराहित्यमेवम् २९

अन्वयः—भाग्येशो मूर्त्तिवर्त्ती सुरपतिगुरुणालोकितो भूपवन्द्यः (स्यात्), भाग्येशो लग्नस्थो वाहनेशो नवमपतिः उभौ चेत् स्वगेहम् पश्यतः तदा इह मनुजः सर्वासां सम्पदामास्पदं स्यात् , वाहनेन्द्रो रन्ध्रस्थानस्थितः हि मनुजो भाग्यराहित्यम् व्रजति, एवमित्यग्रिमेण[1] सम्बन्धः ॥ २९ ॥

नवमभावेशो गुरुदृष्टः लग्नस्थश्चेत्तत्र जातो राजवंद्यः राजमान्यः स्यात् । भाग्येशः लग्नस्थो चतुर्थनवमपती स्वभवनं चतुर्थपतिः चतुर्थं नवमपतिर्नवमं पूर्णदृष्ट्या पश्यतश्चेत्तदा सर्वासां धनधान्यसुवर्णादिसम्पदां आस्पदं आश्रयः मनुजः स्यात् । वाहनेशः अष्टमस्थस्तदा मनुजः भाग्यराहित्यं व्रजति । होराविद्भिरेवं प्रकारेण भाग्यराहित्ये नुः हीनानां शुभलक्षणं वयोबलादिरहितानां वाहनानां प्राप्तिस्तदनुचपलताऽस्थिरता च ज्ञेयेत्यग्रिमेण सम्बन्धः ॥ २९ ॥

अब नवम भाव का विचार लिखते हैं। यदि भाग्य (नवम) भाव का स्वामी लग्न में हो और उसको बृहस्पति पूर्णदृष्टि से देखता हो तो वह

१. इसका सम्बन्ध आगे के श्लोक से है ।

मनुष्य राजाओं से पूजित होता है। चतुर्थ का स्वामी और नवमस्थान का स्वामी ये दोनों लग्न में स्थित होकर अपने २ राशि को देखते हों तो मनुष्य सब सम्पत्तियों का आधार होता है अर्थात् सभी सम्पत्तियोंवाला होता है। यदि चतुर्थभाव का स्वामी अष्टम स्थान में स्थित हो तो मनुष्य भाग्यहीन होता है॥ २९॥

हीनानां वाहनानां तदनुचपलताप्राप्तिरेवं नराणां
ज्ञेया होरागमज्ञैरथ नवमपतौ लाभगे राजवन्द्यः।
दीर्घायुर्धर्मशीलस्तदनुधनवपुर्वाहनेशाः स्वगेहे
धर्मेशो लग्नवर्ती जनुषि यदि गजस्वामिसिंहासनानाम्॥३०॥

अन्वयः—होरागमज्ञैरेवं नराणां हीनानां वाहनानां प्राप्तिस्तदनुचपलता ज्ञेया, अथ नवमपतौ लाभगे राजवन्द्यः दीर्घायुधर्मशीलश्चस्यात् तदनु यदि जनुषि धनवपुर्वाहनेशाः स्वगेहे धर्मेशो लग्नवर्त्ती (तदा) गजस्वामिसिंहासनानाम् प्राप्तिः स्यात्॥ ३०॥

अथ नवमेशे लाभगे राजमान्यः दीर्घायुर्धर्मशीलश्च स्यात्। तदनु जनुषि धनवपुर्वाहनेशाः द्वितीयलग्नचतुर्थपतयः स्वगेहे लग्नेशो लग्ने धनेशो धन वाहनेशो वाहने इत्यर्थः। धर्मेशो लग्नगतो यदि तदा गजस्वामिसिंहासनानां प्राप्तिरित्यनुषङ्गः। तत्र गजाः हस्तिनः स्वामिसिंहासनानां राजाधिष्ठेयसिंहासनं राज्यकार्येषु भद्रासनं तेषां प्राप्तिः स्यात्॥ ३०॥

और शुभ लक्षणों (अवस्था, बल इत्यादि) से रहित सवारियों की प्राप्ति होती है। और चाञ्चल्य होता है। इस प्रकार होराशास्त्र को जानने वाले (ज्योतिषियों) को जानना चाहिए। नवमभाव का स्वामी लाभ (एकादश) स्थान में स्थित हो तो वह मनुष्य राजपूजित, दीर्घायु और धर्मशील होता है। जिसके जन्मसमय में द्वितीय, लग्न और चतुर्थ स्थान के स्वामी अपने २ स्थान अर्थात्

द्वितीयेश द्वितीय में, लग्नेश लग्न में, और चतुर्थेश चतुर्थ में और धर्मेश (नवम भाव का स्वामी) लग्न में बैठे हों तो उसको हाथी और राजाओं के बैठने योग्य सिंहासन की प्राप्ति होती है ॥३०॥

योगानां स्यादमीषां प्रचुरबलयुतो योऽधिपस्तद्दशायां
लब्धिश्चान्तर्दशायामथ गुरुभृगुजौ वाहनाधीशयुक्तौ ।
केन्द्रेऽयाने त्रिकोणे त्वथ गुरुकवियुग्वाहनस्थानगो वा
भाग्याधीशः स्वराशौ भवति नरपतिर्वाहनव्यूहनाथः ॥३१॥

अन्वयः—अमीषां योगानां प्रचुरबलयुतो योऽधिपस्तद्दशायामन्तरदशायां लब्धिः स्यात् , अथ गुरुभृगुजौ वाहनाधीशयुक्तौ केन्द्रेऽयाने त्रिकोणे स्यातां, अथ भाग्याधीशः गुरुकवियुग्वाहनस्थानगो वा स्वराशौ वाहनव्यूहनाथः नरपतिः भवति ॥ ३१ ॥

अमीषामुक्तवक्ष्यमाणानां योगानां योऽधिपः योगकर्ता यो ग्रहः अधिकबलयुतस्तस्य दशायां अन्तर्दशायां लब्धिः योगफललाभः स्यात् । अथ गुरुशुक्रौ वाहनेशयुतौ सन्तौ केन्द्रे अयाने आगमे एकादशे इत्यर्थः, त्रिकोणे स्यातामित्येको योगः । अथ गुरुशुक्रयुतो भाग्याधीशः भाग्ये चतुर्थे वा स्यात्तदायं द्वितीयो योगः । अत्र योगद्वये जातः वाहनव्यूहानां समुदायानां नाथः ईशो नरपतिः स्यात् ॥ ३१ ॥

पूर्वोक्त योगों के योगकारक ग्रहों में जो अधिक बलवान् हो उसी ग्रह की महादशा और अन्तर्दशा में योग का फल मिलता है (१) बृहस्पति और शुक्र दोनों चतुर्थ स्थान के स्वामी से युक्त होकर केन्द्र, अयान (एकादश) वा त्रिकोण में बैठे हों (२) अथवा नवम स्थान का स्वामी बृहस्पति और शुक्र से युक्त होकर चतुर्थ वा नवम भाव में बैठा हो तो वह मनुष्य वाहनों के समूह का मालिक और राजा होता है ॥ ३१ ॥

अथ चिन्तायोगाः—

कर्मस्थे क्षेत्रचिन्ता त्रिकभवनगते सौख्यचिन्ता महीजे
वागीशे यानभूषावसनहयभवा चामरच्छत्रचिन्ता ।
प्रालेयांशौ सिते स्यादथ मदनगते वाक्पतौ पुत्रचिन्ता
सन्तानस्थानयाते हिमकरतनये बुद्धिजाऽथ त्रिकोणे ॥३२॥
मार्तण्डे तातबन्धोरथ सुतनवमद्यूनगे दानवेज्ये
यात्राचिन्ता नराणामथ नवमसुते पुत्रजा वासवेज्ये ।

अन्वयः—महीजे कर्मस्थे क्षेत्रचिन्ता, त्रिकभवनगते सौख्यचिन्ता, वागीशे (त्रिकभवनगते) यानभूषावसनहयभवा चिन्ता, प्रालेयांशौ सिते वा (त्रिकभवनगते) चामरच्छत्र चिन्ता स्यात्, अथ वाक्पतौ मदनगते पुत्रचिन्ता, अथ हिमकरतनये सन्तानस्थानयाते बुद्धिजा चिन्ता, मार्तण्डे त्रिकोणे तातबन्ध्वोः चिन्ता, अथ दानवेज्ये सुतनवम द्यूनगे नराणां यात्रा चिन्ता, अथ वासवेज्ये नवमसुते पुत्रजा चिन्ता स्यात् ॥ ३२½ ॥

भौमे कर्मस्थे क्षेत्रचिन्ता कर्षणबीजवापक्षेत्रसंस्कारादिप्रकारकक्षेत्रचिन्ता इत्यर्थः । त्रिकभवनगते षष्ठाष्टमद्वादशे महीजे सौख्यचिन्ता सकलविषयप्रयुक्तसौख्यचिन्ता स्यादित्यर्थः । वागीशे त्रिकस्थे वाहनभूषणवस्त्राश्वभवा चिन्ता स्यात् । चन्द्रे सिते वा त्रिकस्थे चामरच्छत्रचिन्ता तत्प्राप्तौ रक्षणे च चिन्ता स्यात् । अथ वाक्पतौ गुरौ सप्तमस्थे पुत्रचिन्ता पुत्रविषयकगोरक्षणादिचिन्तेत्यर्थः । बुधे पञ्चमे बुद्धिजा चिन्ता । सूर्ये त्रिकोणस्थे पितुर्बान्धवस्य च चिन्ता । शुक्रे सुतनवमसप्तमगे यात्राचिन्ता । अथ गुरौ नवमपञ्चमे पुत्रजा पुत्रभवा चिन्ता स्यात् । चिन्ता नाम येषां जनानां क्षेत्रादिसंभवस्तेषां तद्विषयलाभशुभानुकूल्यप्रातिकूल्यादिसंस्मृतिः । इति नवमभावः ॥ ३२ ॥

जिसे के जन्मकुण्डलीमें मङ्गल दशम भाव में हो उसको खेती (जोतना, बीज बोना, सींचना, कोड़ना इत्यादि) की चिन्ता होती है। त्रिक (षष्ठ, अष्टम, द्वादश) स्थान में हो तो सम्पूर्ण विषयों के सुख की चिन्ता होती है। यदि बृहस्पति त्रिक स्थान में हो तो यान (सवारी या यात्रा) भूषण, वस्त्र, घोड़ा इत्यादि की, यदि चन्द्रमा या शुक्र त्रिक भवन में हो तो चामर, छत्र इत्यादि (राजाओं के चिह्न) के प्राप्ति और उसकी रक्षा की चिन्ता होती है और बृहस्पति सप्तम भाव में हो तो पुत्र-सम्बन्धी चिन्ता, बुध पञ्चम भाव में बैठा हो तो बुद्धि विषयिणी चिन्ता होती है ॥ ३२ ॥

सूर्य त्रिकोण (नवम-पञ्चम) स्थान में स्थित हो तो पिता और बन्धु सगोत्री भाई के सम्बन्ध की चिन्ता होती है। शुक्र पञ्चम, नवम या द्यून (सप्तम) स्थान में हो तो यात्रासम्बन्ध की और बृहस्पति नवम या पञ्चम में बैठा हो तो पुत्रजन्य चिन्ता (लाभ, हानि, शुभ, अशुभ, अनुकूल, प्रतिकूल इत्यादि का हर समय स्मृति) होती है।

अथ दशमफलमर्धेनाह—

कर्माधीशो विवीर्यो यदि जनुषि तदा सर्वकर्मास्पदं नो।
गेहे स्वीये यदासौ शुभविहगयुतो मानवो मानशीलः ॥३३॥

अन्वयः—यदि जनुषि कर्माधीशो विवीर्यो तदा सर्वकर्मास्पदं नो स्यात्, यदासौ शुभविहगयुतो स्वीये गेहे तदा मानवो मानशील: स्यात् ॥ ३३ ॥

जनुषि कर्मभावेशो विवीर्यो निर्बलश्चेत्तदा जातः सर्वकर्मास्पदं सर्वकर्मणामास्पदं स्थानं नो सर्वकर्मसाधको न स्यात्। अर्थात् जनुषि कर्माधीशो बली चेत्सर्वाणि कर्माणि साधयेज्जात इत्यर्थः। यदा शुभग्रहयुतो दशमाधीशः स्वीयगेहे दशमे चेत्तदा जातो मानवो मानशीलो मानी भवेत् ॥ ३३ ॥

जिस के जन्मसमय में दशम भाव का स्वामी निर्बल हो तो वह मनुष्य सब कार्यों का साधक नहीं होता है। अर्थात् यदि जन्मसमय में दशमेशबली हो तो सम्पूर्ण कार्यों का साधन करनेवाला होता है। यदि दशम स्थान का स्वामी शुभग्रहों से युक्त होकर अपने गृह (राशि) में हो तो वह मनुष्य मानशील (मानी) होता है ॥ ३३ ॥

अथ दीर्घमध्यायुर्योगानाह—

लाभे केन्द्रे त्रिकोणे तनुनिधननभःस्थानपाः संस्थिताश्चे-
द्दीर्घायुः पापखेटा पणफरहिबुकत्रिस्थिता मध्यमायुः।
हीनायुः प्रोक्तमेते यदि जनुषि नृणां स्युस्तदापोक्लिमस्था
रन्ध्रस्थानस्थितानां तनुपतिगगनस्वामिसूर्यात्मजानाम् ॥३४॥

अन्वयः—यदि जनुषि तनुनिधननभःस्थानपाः लाभे केन्द्रे त्रिकोणे संस्थिताश्चेत्तदा नृणां दीर्घायुः स्यात्, पापखेटाः पणफरहिबुकत्रिस्थिता मध्यमायुः, प्रोक्तमेते आपोक्लिमस्थास्तदा हीनायुः, रन्ध्रस्थानस्थितानां तनुपतिगगनस्वामिसूर्यात्मजानाम् यो हीनस्तद्दशायुः स्यादित्यग्रिमेण सम्बन्धः ॥ ३४ ॥

यदा नृणां जन्मसमये लग्नाष्टमदशमेशाः लाभे केन्द्रे त्रिकोणे च स्थिताश्चेद्दीर्घायुः स्यात्। पापग्रहाः पणफरचतुर्थतृतीयस्थिताः मध्यमायुः स्यात्। एते पूर्वोक्ता आपोक्लिमस्थाश्चेदल्पायुः स्यात्। द्वात्रिंशद्वर्षादर्वाक्हीनायुः ततो मध्यायुः। चतुःषष्ट्यनन्तरं दीर्घायुर्ज्ञेयम्। लग्नेशदशमेशशनीनां अष्टमस्थानस्थितानां मध्ये यो हीनो हीनबलस्तस्य दशापर्यन्तमायुः स्यादित्युत्तरेण सम्बन्धः ॥ ३४ ॥

अब दीर्घायु आदि योग लिखते हैं। जिस मनुष्य के जन्म समय में लग्न, अष्टम और दशम; इन स्थानों के स्वामी एकादश, केन्द्र (१।४।७।१०)

और त्रिकोण (५।९) इन स्थानों में स्थित हों तो वह दीर्घायु[1] होता है। यदि पापग्रह पणफर (द्वितीय, पञ्चम, अष्टम और एकादश), चतुर्थ और तृतीय इन स्थानों में स्थित हो तो वह मनुष्य मध्यायु[2] होता है। पूर्वोक्त ग्रह आपोक्लिम (तृतीय, षष्ठ, नवम और द्वादश) में बैठे हों तो मनुष्य[3] अल्पायु होता है। अष्टम स्थान में बैठे हुए लग्न के स्वामी, दशम के स्वामी और शनि इन ग्रहों में[4] जो निर्बल हो उस ग्रहकी दशा तक आयु होती है ॥ ३४ ॥

यो हीनस्तद्दशायुस्त्वथ निजभवने धर्मकर्मात्मजेशा-
श्चेत्स्युस्तेषां दशायां बहुलबलवशाद्धर्मबुद्धिर्नराणाम् ।
हानिः स्यादन्यथारौ तनुनिधनपती भानुपुत्रेण युक्तौ
स्यातां स्वर्भानुना चेत्तदनु च शिखिना तद्दशायां व्रणाःस्युः ३५

अन्वयः—अथ धर्मकर्मात्मजेशाः चेन्निजभवने तदा तेषां बहुलबलवशात्तद्दशायां नराणां धर्मबुद्धिः स्युः, अन्यथा हानिः स्यात्, तनुनिधनपतीभानुपुत्रेण स्वर्भानुना शिखिना च युक्तौ अरौ स्यातां तदा तद्धशायां व्रणाः स्युः ॥ ३५ ॥

अथ धर्मकर्मात्मजेशाः नवमदशमपञ्चमेशाः स्वभवने नवमादिके स्युस्तदा तेषां योऽधिकबलस्तस्य दशायां जातस्य धर्मबुद्धिः स्यात्। अन्यथा परभवने यदा तेषां योऽधिकबलस्तद्दशायां धर्महानिः स्यादित्यर्थः। लग्नाष्टमपती यदि शनिराहुकेतूनामन्यतमेन युतौ षष्ठस्थौ तद्दशायां तनुनिधनपत्योरधिकबलस्य दशायां व्रणाः स्युः ॥ ३५ ॥

---

१. ६४ वर्ष के बाद दीर्घायु होती है।
२. ३२ से ६४ वर्ष तक मध्यमायु होती है।
३. ३२ वर्ष तक अल्पायु होती है।
४. इसका सम्बन्ध आगे के श्लोक से है।

धर्म (नवम)-कर्म (दशम) और पञ्चम इन स्थानों के स्वामी अपने २ स्थान अर्थात् नवमेश नवम में, दशमेश दशम में और पञ्चमेश पञ्चम में बैठे हों तो इनमें जो ग्रह बलवान् हो उस ग्रहकी दशामें मनुष्यकी धार्मिक बुद्धि होती है अन्यथा इसके विपरीत स्थिति हो (पर गृह में स्थित हो) तो इनमें जो ग्रह बलयुक्त हो उसकी दशा में धर्म्म की हानि होती है। और लग्न और अष्टम स्थान का स्वामी शनि राहु या केतु इनमें से किसी ग्रह से युक्त होकर छठवें भाव में हों तो इन दोनों (लग्नेश, अष्टमेश) में जो बली हो उसकी दशा में मनुष्य को व्रण (फोड़ा फुंसी घाव इत्यादि होते हैं ॥ ३५ ॥

यानेशस्तत्र संस्थो यदि भवति तदा यानहेतुर्मृतिः स्या-
च्चौराच्छस्त्रेण चिन्ता नवमभवनतो भाग्यजाता विधेया।
व्योम्नो भूपालभूषावसनहयमहत्कर्मणां प्राप्तिचिन्ता
लाभस्थानेऽखिलानां व्ययनिधनगृहात्कल्मषाणां विधेया ३६

अन्वयः—यदि तत्र (षष्ठ भावे) यानेशोभवति तदा यानहेतुः चौरात्, शस्त्रेण च मृतिः स्यात्, अथ नवमभवनतो भाग्यजाता चिन्ता विधेया, व्योम्नो भूपालभूषावसनहयमहत्कर्मणां, चिन्ता, लाभस्थाने अखिलानां प्राप्तिचिन्ता, व्ययनिधनगृहात्कल्मषाणां चिन्ता विधेया ॥ ३६ ॥

चतुर्थेशस्तत्र षष्ठभावे चेत्तदा यानहेतुर्मृतिः स्यात्। चौरा-च्छस्त्रेण च मृतिः। तत्रेति अरिभावपरामर्शेन यानेशस्य शन्यादियोगे वक्ष्यते। अयमर्थः शनियोगे यानहेतोर्मृतिः, राहुयोगे चौरान्मृतिः, केतुयोगे शस्त्रेण मृतिः। अथ संक्षेपादुक्तानां नवमादिभावानां सामान्यचिन्तालम्बनमुच्यते। नवमभावतो

भाग्यजाता चिन्ता विधेया । अयं भावः, भाग्ये यो ग्रहो भाग्येशो यो ग्रहः, भाग्यभवनस्थो यो राशिस्तद्द्वारा केन्द्र-ग्रहात् भाग्यभवने शुभाशुभवर्गविवेकः । भाग्यभाग्येशबला-बलत्वमित्यादि विचार्य जातकशास्त्रविचारं परिभूय बुद्ध्या फलं वक्तव्यम् । तथाभिहितं कल्याणवर्मणा 'भाग्यर्क्षपतिः कस्मिन्को वा भाग्यर्क्षमाश्रितो विहगः। बलवान्मध्यबलो वा इत्यादि । तत्रान्यत्र ।

भाग्ये बलिष्ठे यदि मेषराशौ
चतुष्पदोत्थं प्रकरोति धर्मम् ।
वृषे बलिष्ठे बहुधेनुदायी
युग्मे तथा ब्राह्मणभोज्यदाता ॥ १ ॥
स्यात् कर्कटे तीर्थपरश्च सिंहे
जातो मनुष्यः परधर्मनिष्ठः ।
यद्दृष्टिधर्मा मनुजो युवत्यां
प्रसिद्धधर्मा तुलजो मनुष्यः ॥ २ ॥
प्रसिद्धधर्मे निरतोऽष्टमे भव-
श्चापे तु शास्त्रे विहगः स्वधर्मा ।
मृगे विरज्येत सुधर्मतो ना
कुम्भे तु पापादिभवो हि धर्मः ॥ ३ ॥
मीने बलिष्ठे शुभभावजातो
तडागवापीभवधर्मनिष्ठः ।
भाग्येशे लग्नगे भूपकर्मकारी धने धनम् ।
बन्धुप्रियो भ्रातृभावे चतुर्थे पितृभक्तिमान् ॥ ४ ॥
कृती तु पञ्चमे षष्ठे जातो विकलकारकः ।
सप्तमे सुभगस्त्रीमान् षण्डः पापाष्टमे स्थिते ॥ ५ ॥
स्वभे दाता देवभक्तो दशमे नृपकार्यकृत् ।

लाभे दीर्घायुरखिलो व्यये देशान्तरास्थितिः ॥ ६ ॥
स्वस्वामिदृष्टियुक्तश्चेत्स्वदेशफलदायकः ॥ ७ ॥

मुनिभिरुक्तम्—

'होरागमश्च बलवान्येषां ते श्रेष्ठमानवाः ।

होरासारे—

भाग्ये खलाः स्वगृहगाः शुभदृष्टियुता यदि ।
सौभाग्यसौख्ययुक्तस्य जन्म विद्याच्च भूपतेः ॥ १ ॥
क्रूरा नीचारिभांशस्था भाग्येशेन च वीक्षिताः ।
सर्वदा भाग्यहीनस्य जन्म विद्यान्न संशयः ॥ २ ॥
लग्नगे भान्तरे राशौ महाभाग्यो हि भाग्यतः ।
एकेन मध्यभाग्यः स्यादभावे हीनभाग्यवान् ॥ ३ ॥

गर्गजातके—

हन्ति पुण्यं च भाग्यं च कर्म पुण्यगतो नृणाम् ।
तुङ्गे स्वर्क्षे सहस्रांशुः पुष्कलं धर्ममादिशेत् ॥ ४ ॥
भाग्यभाग्यं भवेद्धन्यः पितृपक्षपरायणः ।
धर्मे पूर्णो निशानाथः क्षीणः सर्वविनाशकृत् ॥ ५ ॥
कुजे रक्तपदानन्दी भवेत्पशुपतिव्रती ।
भाग्यहीनश्च सततं नरः पुण्यगृहं गते ॥ ६ ॥
मन्दभाग्यो बुधे पापे शुभे सौम्ये तु धार्मिकः ।
महाभाग्यः शुभे जीवे तथा शुक्रे बलीयसी ॥ ७ ॥
दण्डप्रदो वक्रगतो नवमस्थे शनैश्चरे ।
स्वक्षोच्चगे शनौ भाग्ये राजा भवति धार्मिकः ॥ ८ ॥
राहौ धर्मगते जातः सत्यशौचविवर्जितः ॥ ९ ॥

अन्यत्र—

भाग्याधिपश्चेद्यदि केन्द्रवर्ती
आदौ वयस्येव सुखी मनुष्यः ।

त्रिकोणगः स्वोच्चगतोऽथवा स्या-
न्मध्ये वयस्यल्पफलप्रदः स्यात् ॥ १ ॥
भाग्यस्य नाथे स्वगृहेऽथ मित्रगृहेऽथवा स्यात्स्वनवत्रिभागे।
भाग्योदयं तस्य वदन्ति तज्ज्ञाः शुभग्रहेन्द्रैश्च युते क्षिते च ॥ २॥
नीचस्थो वा शत्रुगेहस्थितो वा भाग्यस्वामी रिःफरन्ध्रारिगो वा।
पापैः खेटैः संयुतो वाऽथ दृष्टो भाग्यैर्हीनः स्याद्दरिद्रः सदैव ॥३॥
नवमभावपती रिपुरन्ध्रगो नवमभं रिपुदृष्टयुतं तथा।
यदि तदा न च धर्मरतो नरः शुभखगैरथ धर्मरतो नरः ॥४॥
अबलेऽपि शुभे खेटे भाग्यस्थे धार्मिको नरः।
शुभवर्गयुते भाग्ये शुभकर्मा यथाऽन्यथा ॥ ५ ॥
इत्यादिश्चिन्ता विधेया। तत्राह जातकसारावलीकारः—
होरेन्द्वोर्बलयोगाद्यो दशमस्तत्स्वभावजं कर्म।
तस्याधिपतेश्च तथा वृद्धिर्ज्ञेया तथा हानिः ॥ १ ॥
दशमे नक्षत्रपतिर्लग्नात्पुरुषस्य यस्य सम्भवति।
सर्वारम्भो भवति हि विनिर्दिशेत्तस्य जातस्य ॥ २ ॥
जातकसारे—
'स्वस्थे खगे खलयुते खलजे नवांशे
स्वोच्चर्क्षगे स्वभवने सुखवृत्तयः स्युः।
नीचारिभावगृहगेऽल्पसुखाल्पपुण्यो
दासोपचारभृतकानुचराश्च दासीः ॥ १ ॥
धर्मभावे शुभक्षेत्रे शुभदृष्टे सुकर्मकृत्।
पापेक्षिते पापकर्मा स्वामिदृष्टे तु मध्यमः ॥ २ ॥
वैद्याः पुरोहिताः शस्त्रस्मृतिज्ञा वञ्चका नराः।
जायन्ते कर्मगैः पापैः सौम्यग्रहनिरीक्षितैः ॥ ३ ॥
वराहः—
'अर्थाप्तिः पितृपितृपत्निशत्रुमित्र-
भ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः।

होरेन्द्वोर्दृशमगतैर्विकल्पनीया
भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या ॥ १ ॥
अर्कांशे तृणकनकोर्णभेषजाद्यै-
श्चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च ।
धात्वग्निप्रहरणसाहसैः कुजांशे
सौम्यांशे लिपिगणितादिकाव्यशिल्पैः ॥ २ ॥
जीवांशे द्विजविबुधाकरादिधर्मैः
काव्यांशे मणिरजतादिगोमहिष्यैः ।
सौरांशे श्रमवधभारनीचशिल्पैः
कर्मेशाध्युषितनवांशकर्मसिद्धिः ॥ ३ ॥
मित्रारिस्वगृहगतैस्ततस्ततोर्था-
न्तुङ्गस्थे बलिनि च भास्करे स्ववीर्यात् ।
राज्याधीशे केन्द्रगे सौम्यदृष्टे
पापे केन्द्रे सुप्रतापाभिधानः ।
जातो नित्यं भूमिपैः सेवनीयो
भाग्यैर्युक्तः सुप्रतापप्रसिद्धः ॥ ४ ॥ इति ।

अथ लाभस्थाने अखिलानां वस्तूनां प्राप्तिचिन्ता विधेया, तत्र होराप्रदीपे—

स्वस्वामिसद्ग्रहयुतेक्षित आयवर्गैः
सद्धर्मको भवति वस्तुविशेषलाभः ।
क्रूरे च दृष्टिसहिते न च तत्र लाभ-
स्तद्वर्गकेऽप्यथ च मिश्रफलं विधत्ते ॥ १ ॥
लाभे रवीक्षितयुते रविवर्गयुक्ते
चौराच्चतुष्पदयुताच्च भवेत्प्रतापः ।
तद्वद्विधौ युवतितोयजनादिजातो
भौमे सुवर्णमणिपावकशास्त्रजातः ॥ २ ॥

सौम्येक्षिते क्षगण आयगृहे धनं स्या-
च्छिल्पादिकाव्यलिपिभिस्तुरगैः सकांस्यैः ।
जीवेक्षितायगुरुवर्गयुताय गेहे
यज्ञादिहेमहयनागरथादिमुख्यैः ॥ ३ ॥
शुक्रेक्षितायशनिवर्गयुते महिष्यः
लोहादिकृष्यचनकार्यभवा विवृद्धिः ।
नीचारिभार्कगखगोक्तफलं न दद्या-
न्नीतिग्रहोद्भवबले बलिनस्तु वाच्यम् ॥ ४ ॥ इति ।

व्ययगृहान्निधनगृहाच्च मलिनकर्मणां चिन्ता विधेया ।

गर्गजातके—

क्षीणेऽब्जे वा रवौ रिःफे धनं पुंसामथाहरेत् ।
बहुधार्थक्षयो भौमे ज्ञदृष्टयेऽन्येषु सिद्धयः ॥ १ ॥
नृपीडा न च सन्तप्तं परिवादेन पीडितः ।
नृशंसं पुरुषं चान्द्रिः कुरुते व्ययराशिगः ॥ २ ॥
उच्छ्रितव्ययकारी च व्ययगे देवता गुरौ ।
श्रद्धाहीनो घृणाहीनो व्ययगे भार्गवे नरः ॥ ३ ॥
व्ययस्थानगते मन्दे क्रूरेषु कुरुते रुचिम् ।
व्यये राहौ नीचकर्मा कपटी कुलदूषकः ॥ ४ ॥
व्यये भावे स्वामियुक्ते शुभदृष्टे च सत्यपि ।
कीर्तिमान् जायते मर्त्यो विपरीते विपर्ययः ॥ ५ ॥
सुधीभिरिदं नियतं नियमेन ज्ञेयम् ॥ २६ ॥

चतुर्थ स्थान का स्वामी यदि शनैश्चर से युक्त होकर छठें भाव में बैठा हो तो वाहन (सवारी) से गिर कर मृत्यु हो, यदि चतुर्थेश राहु से युक्त होकर छठें हो तो चोर के सम्बन्ध से मृत्यु होती है। यदि चतुर्थेश केतु से युक्त होकर छठें हो तो शस्त्र (हथियार) से मृत्यु होती है। यहाँ

संक्षेप से नवमादि भावों का विचार लिखते हैं। नवम स्थान से भाग्य का विचार, दशम स्थान से राजा, भूषण, वस्त्र, अश्व, और अच्छे २ कामों का विचार, एकादश स्थान से लाभ का विचार और द्वादश तथा अष्टम स्थान से सब पापकर्मों का विचार करना चाहिये ॥ ३६ ॥

लग्नस्थे रिःफनाथे भवति सुवचनो मानवो रूपवान्वा
स्वर्क्षे कार्पण्यबुद्धिर्बहुतरपशुमान् ग्रामयुक्तः सदा स्यात् ।
धर्मे तीर्थावलोकी बहुलवृषमतिः क्रूरयुक्ते च पापी
मिथ्याकोशान्तकृत्स्यान्नियतमिदमिति ज्ञेयमेवं सुधीभिः ३७

अन्वयः—रिःफनाथे लग्नस्थे मानवः सुवचनः रूपवान्वाभवति, स्वर्क्षे सदा कार्पण्यबुद्धिर्बहुतरपशुमान् ग्रामयुक्तः स्यात्, धर्मे तीर्थावलोकी बहुलवृषमतिः स्यात्, क्रूरयुक्ते पापी मिथ्याकोशान्तकृत्स्यात्, एवं सुधीभिः इतीदं नियतं ज्ञेयम् ॥ ३७ ॥

द्वादशभावाधिपे लग्नस्थे सति मानवः सुवचनः सुवाङ्माधुर्यो रूपवान्भवति। तथा स्वर्क्षे स्वगृहे सति कृपणबुद्धिः अनेकपशुयुक्तो ग्रामयुक्तश्च ग्रामाधिकारयुक्तश्च स्यात्। तथा धर्मे नवमे सति तीर्थावलोकी तीर्थयात्रावान्, बहुलवृषमतिः अत्यन्तधर्मबुद्धिश्च स्यात्। तथा पापग्रहयुक्ते सति पापी मिथ्याकोशान्तकृत् वृथा सञ्चितद्रव्यनाशकृत्स्यात्। अस्माद्योगान्नियतं फलं ज्ञेयम् ॥ ३७ ॥

अब संक्षेप से द्वादश भाव का विचार लिखते हैं। यदि द्वादश भाव का स्वामी लग्न में स्थित हो तो मनुष्य मीठा बचन बोलने वाला और मनोहर रूपवाला होता है। यदि द्वादशेश अपनी राशि में बैठा हो तो

---

१. भाव में स्थित ग्रह, भाव का स्वामी और भाव में स्थित राशि इत्यादि के शुभाशुभ वर्ग विचार से भाव सम्बन्धि फलों का आदेश करें।

वह मनुष्य कृपण बुद्धि वाला, नाना प्रकार के पशुओं का पालन करने वाला, जमीदार (या ग्राम का अधिकारी) होता है। एवं द्वादशेश धर्म (नवम) भाव में हो तो तीर्थों का दर्शन करने वाला, अत्यन्त धार्मिक बुद्धि वाला होता है। द्वादशेश पापग्रहों से युक्त हो तो पापी और व्यर्थ इकट्ठा किये हुए धन को अपव्यय (नाश) करने वाला होता है। इन योगों से बुद्धिमानों को निश्चित फल जानना चाहिये ॥ ३७ ॥

अध्यायं समापयति । शालिनीवृत्तेनाह–

हृद्यैःपद्यैर्गुम्फिते सूरितोषे-
ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।
भावाध्यायः श्रीगणेशेन वर्यै-
र्वृत्तैर्युक्तः शैलरामैः प्रणीतः ॥ ३८ ॥

अन्वयः—श्रीगणेशेन वर्यैः हृद्यैः पद्यैर्गुम्फिते सूरितोषेऽस्मिन्मञ्जुलेऽङ्ककाराख्ये जातके शैलरामैर्वृत्तैर्युक्तः भावाध्यायः प्रणीतः ॥ ३८ ॥

इति जातकालङ्कारे द्वितीयो भावाऽध्यायः ॥ २ ॥

श्रीगणेशेन भावाध्यायः शैलरामैर्वृत्तैः सप्तत्रिंशद्भिः श्लोकैरुक्तः ॥ ३८ ॥

इति श्रीजातकालङ्कारटीकायां भावफलाध्यायो
द्वितीयः समाप्तः ॥ २ ॥

श्री गणेश कवि ने सुन्दर छन्दों से बने हुए, विद्वानों को प्रसन्न करने वाले इस मनोहर जातकालङ्कार नामक ग्रन्थ में ३७ श्लोकों से इस भावाध्याय को बनाया ॥ ३८ ॥

इति जातकालङ्कारे भाषाटीकायां द्वितीयो भावाध्यायः समाप्तः।

अथ योगाध्यायः ॥ ३ ॥

तत्र तावत् शुभाशुभयोगान् व्यस्य योगान्तरं वक्तुं प्रतिजानीते शिखरिणीवृत्तेन—

ग्रहाधीना योगाः सदसदभिधाना जनिमतां
ततो योगाधीनं फलमिति पुराणैः समुदितम् ।
अतो वक्ष्ये योगान् सकलगणकानन्दजनकान्
शुकास्यादुद्भूतं मतमिह विलोक्येह रुचिरम् ॥ १ ॥

अन्वयः—पुराणैः जनिमतां सदसदभिधाना योगाः ग्रहाधीना ततो योगाधीनं फलमिति समुदितम्, अतो इह शुकास्यादुद्भूतं रुचिरं मतं विलोक्य सकलगणकानन्दजनकान् योगान् वक्ष्ये ॥ १ ॥

पुराणैर्वसिष्ठशुकपराशरप्रभृतिभिः प्रोक्तं फलं योगाधीनम्, अतः सकलगणकानन्दजनकान् अशेषज्योतिर्विदां प्रीत्युत्पादकान् योगान्वक्ष्ये । किं कृत्वा शुकास्यात् शुकमुनिमुखादुद्भूतं रुचिरं शोभनं मतं विलोक्य आलोच्य ॥ १ ॥

मनुष्यों का शुभाशुभ योग ग्रहों के अधीन है और शुभाशुभ फल योग के अधीन है ऐसा शुक, पराशर, वसिष्ट इत्यादि प्राचीन आचार्यों ने कहा है। इस लिये शुकदेवजी के मुखारविन्द से निकले हुए मनोहर मत को विचार कर सम्पूर्ण ज्यौतिषियों को आनन्द देने वाले योगों को कहता हूँ ॥ १ ॥

अथानिष्टयोगानाह—

ऋक्षेशः क्षीणवीर्यः सुतनवमगतो मानवो मन्युमान्वै
राशीशे साङ्गनाथे रिपुनिधनगृहे प्रान्त्यगे दुर्बलः स्यात् ।
धर्मद्वेष्याष्टनाथाः खलखचरयुताः स्थानके क्वापि संस्था-
स्तैर्दृष्टाः स्यात्तदानीं परपुरुषरता सुन्दरी तस्य पुंसः ॥२॥

अन्वयः—ऋक्षेशः क्षीणवीर्यः सुतनवमगतो वै मानवः मन्युमान्स्यात्। राशीशे साङ्गनाथे रिपुनिधनगृहे दुर्बलः स्यात्, धर्मद्वेष्याष्टनाथाः खलखचरयुताः क्वापि स्थानके संस्थास्तैर्दृष्टास्तदानीं तस्य पुंसः सुन्दरी परपुरुषरता स्यात् ॥ २ ॥

ऋक्षेशो जन्मराशिनाथः क्षीणबलः सन् त्रिकोणगतश्चेन्मानवो जातः मन्युमान्[1] क्रोधी स्यात्। जन्मराशीशे साङ्गनाथे तनुपतिसहिते त्रिकस्थे दुर्बलः स्यात्। यस्य नवमषष्ठाष्टमेशाः क्रूरग्रहदृष्टियुक्ता यत्र कुत्रापि स्थिताः यदि तदानीं तस्य भार्या जारगामिनी स्यात् ॥ २ ॥

जिस मनुष्य के जन्मसमय में जन्मराशि[2] का स्वामी निर्बल होकर पञ्चम, अष्टम, नवम स्थान में स्थित हो तो वह मनुष्य क्रोधी (वा दुःखी) होता है। यदि जन्मराशि का स्वामी लग्न के स्वामी से युक्त होकर षष्ठ, अष्टम वा द्वादश भाव में बैठा हो तो मनुष्य दुर्बल होता है। नवम, षष्ठ और अष्टम स्थानों के स्वामी पापग्रहों से युक्त और दृष्ट होकर किसी स्थान में बैठे हों तो उस मनुष्य की स्त्री पराये पुरुष के साथ रमण करती है अर्थात् व्यभिचारिणी होती है।

परजातयोगः

मातृस्थाने स्थितौ चेत्कुजविधुसहितौ षष्ठरन्ध्राधिनाथौ
स्यातां यस्य प्रसूतौ भवति खलु नरस्त्वन्यजातस्तदानीम्।
क्वापि स्थाने स्थितौ स्तः कलुषखगयुतौ भाग्यषष्ठाधिनाथौ
चेदेवं राहुणा वा तदनु च शिखिना सय्युँतावन्यजातः ॥ ३ ॥

अन्वयः—यस्य प्रसूतौ षष्ठरन्ध्राधिनाथौ कुजविधुसहितौ चेन्मातृ-

---

१. 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः।

२. जन्मसमय में जिस राशि पर चन्द्रमा हो उसको जन्मराशि कहते हैं।

स्थाने स्थितौ स्यातां तदानीम् नरः खलु अन्यजातः भवति, भाग्य-षष्ठाधिनाथौ कलुषखगयुतौ क्वापि स्थाने स्थितौ, एवं चेद्राहुणा वा तदनु च शिखिना संय्युतौ अन्यजातः स्यात् ॥ ३ ॥

यस्य जन्मनि षष्ठाष्टमभवननाथौ कुजविधुयुतौ चतुर्थस्थौ स्यातां तदानीं स नरः अन्यजातः जारजातः। तथा नवमषष्ठाधिनाथौ यत्र कुत्रापि स्थितौ क्रूरग्रहयुतौ अथवा केवलेन राहुणा शिखिना वा युतौ स्यातां तदान्यजातः। कलुषखगयुतावित्यनेन राहु केतुरपि सर्वक्रूरयोगे विवक्षितः। अग्रिमश्लोके मन्दादीनां पार्थक्येन योगोपदेशात् कलुषखगयुतावित्यनेनैव सिद्धे राहु-केतुग्रहणं छन्दोऽनुरोधात् ॥ ३ ॥

जिसके जन्मकाल में छठे और आठवें भाव के स्वामी मङ्गल और चन्द्रमा से युक्त होकर चतुर्थ स्थान में बैठे हों तो वह मनुष्य जारजात (पिता से अतिरिक्त किसी अन्य पुरुष से पैदा) होता है। भाग्य (नवम) षष्ठ के स्वामी पापग्रह (अथवा केवल राहु या केतु) से युक्त होकर किसी स्थान में बैठे हों तो भी मनुष्य जारजात होता है ॥ ३ ॥

युक्तौ मन्देन शूद्रादथ भवति विदा वैश्यतो भास्करेण
क्षत्राज्जातः सितेन त्रिदशपगुरुणा भूमिदेवात्प्रसूतः।
दैत्येशेज्यौ सपापौ मदनरिपुधनस्थानगौ चेत्परस्त्री-
गामी व्योमारिपौ स्तो गगनभवनगौ तत्पितान्यारतः स्यात् ४

अन्वयः—(भाग्यषष्ठाधिनाथौ) मन्देन युक्तौ शूद्राद् (जातो) भवति, अथ विदा वैश्यतो, भास्करेण क्षत्राज्जातः, सितेन त्रिदशपगुरुणा भूमिदेवात्प्रसूतः,दैत्येशेज्यौ स पापौ मदनरिपुधनस्थानगौ चेत्तदा परस्त्रीगामी स्यात् , व्योमारिपौ गगनभवनगौ स्तो तत्पितान्यारतः स्यात् ॥ ४ ॥

भाग्यषष्ठाधिनाथौ मन्देन युक्तौ शूद्राज्जातः उत्पन्नो भवति अथ बुधयुक्तो वैश्याज्जातः। भास्करेण युतौ चेत्क्षत्रियाज्जातः। गुरुशुक्राभ्यां ब्राह्मणाज्जातः। बुधगुरुशुक्राणां कलुषखगयुतत्वे क्रूरैर्दृष्टत्वे तद्योगेन नीचत्वेनास्तंगतत्वेन क्रूरवर्गस्थत्वेन वा सुधीभिर्बोध्यम्। अथ शुक्रबृहस्पती सक्रूरौ सप्तमषष्ठधन-स्थानगतौ चेत्तदा परस्त्रीगामी स्यात्। दशमषष्ठाधिपौ दशमस्थौ तदा तत्पिता जातस्य पिता अन्यारतः स्यात्परस्त्री-गामी स्यात्॥ ४॥

यदि नवमेश और षष्ठेश, शनि से युक्त हों तो शूद्र से, बुध[1] से युक्त हो तो वैश्य से, सूर्य से युक्त हो तो क्षत्रिय से, गुरु और शुक्र से युक्त हो तो ब्राह्मण से उत्पन्न होता है। यदि शुक्र और गुरु पापग्रह से युक्त हो कर सातवें, छठें और दूसरे भाव में बैठे हों तो वह पुरुष पराई स्त्री से सम्भोग करने वाला होता है। यदि दशम और षष्ठ स्थान के स्वामी दशम में स्थित हो तो उस जातक का पिता परस्त्रीगामी होता है॥ ४॥

मूर्तीशः पापयुक्तो धनसदनगतश्चेत्तदा सज्जनस्त्री-
संयुक्तस्तत्पिता स्यात्खलविहगयुताः कामशत्रुस्वनाथाः।
कोशस्थास्तद्वदेवं फलमिति विविधं भ्रातृपत्न्योश्च पित्रोः
स्थानेशाः क्वापिभावे तनुपतिसहिताश्चेत्पुमानन्यजातः॥५॥

अन्वयः—पापयुक्तो मूर्तीशः धनसदनगतश्चेत्तदा तत्पिता सज्जन-स्त्रीसंयुक्तः स्यात्, कामशत्रुस्वनाथाः खलविहगयुताः कोशस्थास्तद्वद् विविधं फलं ज्ञेयम्, एवं भ्रातृपत्न्योः पित्रोश्च स्थानेशास्तनुपतिसहिताश्चेत्क्वापि भावे (संस्थिताः) तदा पुमानन्यजातः स्यात्॥ ५॥

---

१. बुध, बृहस्पति और शुक्र ये तीनों पापग्रह से किसी प्रकार से सम्बन्ध करते हुए नवमेश षष्ठेश से युक्त हों तभी उक्त फल जानना, अन्यथा नहीं।

क्रूरयुक्तो लग्नेशः द्वितीयस्थश्चेत्पिता सज्जनस्त्रीसंयुक्तः साधुजनस्त्रीगामी स्यात्। सप्तमषष्ठद्वितीयभावेशाः क्रूरयुताः द्वितीयस्थाश्चेत्तद्वदेव फलं विविधमित्येवंप्रकारैर्विविधफलमिति ज्ञेयम्। सज्जनस्त्रियामासक्तिर्दुराचारत्वं अभक्ष्यभक्षकत्वमित्यादि ज्ञेयमिति भावः। तृतीयसप्तमचतुर्थदशमेशास्तनुपतिसहिता यत्र कुत्रापि स्थिताश्चेज्जातः पुमान् जारजातः स्यात्॥ ५॥

लग्न का स्वामी पापग्रह से युक्त होकर द्वितीय भाव में बैठा हो तो उसका पिता सज्जन स्त्री से गमन करने वाला होता है। यदि सप्तम षष्ठ और द्वितीय भाव के स्वामी पापग्रह से युक्त होकर द्वितीय भाव में बैठे हों तो भी वैसा ही फल अर्थात् सज्जन स्त्री से भोग करने वाला, दुराचारी, अभक्ष्य भक्षक इत्यादि, होता है। एवं यदि भ्रातृ (तृतीय), पत्नी (सप्तम), माता (चतुर्थ) और पितृ (दशम) इन भावों के स्वामी लग्न के स्वामी से युक्त होकर किसी स्थान में बैठे हों तो वह मनुष्य जारजात (दूसरे का) होता है॥ ५॥

लग्नाधीशेन्दुपुत्रौ क्षितितनयनिशानायकौ क्वापि संस्थौ
युक्तौ स्वर्भानुना वा भवति हि मनुजः केतुना श्वेतकुष्ठी।
आदित्यो भौमयुक्तस्तदनु शनियुतो रक्तकृष्णाख्यकुष्ठी
सार्को लग्नाधिनाथो व्ययरिपुनिधनस्थानगस्तापगण्डः॥६॥

अन्वयः—लग्नाधीशेन्दुपुत्रौ क्षितितनयनिशानायकौ स्वर्भानुना केतुना वा युक्तौ क्वापि संस्थौ हि मनुजः श्वेतकुष्ठी भवति, भौमयुक्तः आदित्यस्तदनुशनियुतो (आदित्य) रक्तकृष्णाख्यकुष्ठी, सार्को लग्नाधिनाथो व्ययरिपुनिधनस्थानगस्तापगण्डः स्यात्॥ ६॥

लग्नेशबुधौ कुजचन्द्रौ वा राहुकेत्वोरन्यतरयुतौ तदा जातः

श्वेतवर्णोपलक्षितकुष्ठरोगी भवति। तदनु भौमशनियुतः आदित्यश्चेद्रक्तवर्णकृष्णवर्णनामकः कुष्ठवान् स्यात्। सूर्ययुतो लग्नेशः त्रिकस्थश्चेत्तदा जातस्य तापगण्डान्वितो गण्डो रोगविशेषः स्यात् ॥ ६ ॥

लग्न का स्वामी और बुध अथवा मङ्गल और चन्द्रमा राहु व केतु से युक्त होकर कहीं (किसी स्थान में) बैठे हों तो वह मनुष्य श्वेतकुष्ठी होता है। यदि सूर्य, मङ्गल अथवा शनि से युक्त होकर (किसी स्थान में बैठे हों) तो वह मनुष्य रक्तकृष्णकुष्ठी[1] होता है। लग्न का स्वामी सूर्य से युक्त होकर द्वादश, षष्ठ वा अष्टम स्थान में बैठा हो तो उस मनुष्य को तापगण्ड रोग होता है ॥ ६ ॥

ज्ञेयश्चन्द्रेण गण्डो जलज इह युतो ग्रन्थिशस्त्रव्रणः स्याद्
भूमीपुत्रेण पित्तं हिमकरतनयेनाथजीवेन रोगः
आमोद्भूतस्ततश्चेद्भृगुतनययुतो नुः क्षयाख्यो गदः स्या-
च्चौरोद्भूतोऽन्त्यजाद्वा यमशिखितमसामेकयुक् तन्वधीशः॥७॥

अन्वयः—(लग्नेशः) चन्द्रेण (युतः) जलजो गण्डः ज्ञेयः, इह भूमिपुत्रेण युतो ग्रन्थिशस्त्रव्रणः स्यात्, हिमकरतनयेन पित्तं, अथ जीवेन आमोद्भूतो रोगः स्यात्, ततश्चेत् भृगुतनययुतो नुः क्षयाख्यो गदः स्यात्, यमशिखितमसामेकयुक् तन्वधीशः चौरोद्भूतोऽन्त्यजाद्वा रोगः स्यात् ॥ ७ ॥

चन्द्रेण युतो लग्नेशः त्रिकस्थश्चेज्जलजो गण्डः स्यात्। भौमयुतो लग्नेशः त्रिकस्थश्चेत्तदा ग्रन्थिशस्त्रव्रणः स्यात्। ग्रन्थ्युपलक्षितः शस्त्रजो व्रणः स्यादित्यर्थः। बुधयुतो लग्नेशः त्रिकस्थश्चेत्पित्तरोगः स्यात्। जीवेन युतो लग्नेशः त्रिकस्थश्चे-

१. मङ्गल से युक्त हो तो रक्तकुष्ठी, शनि से युक्त हो तो कृष्णकुष्ठी होता है।

तदा आमोद्भूतः आमकोपजो रोगः स्यात्। शुक्रेण युतस्तत्र स्थितो लग्नेशस्तदा नुर्मनुष्यस्य क्षयाख्यो रोगः स्यात्। यमशिखितमसामेकयुक् शनिराहुकेतूनां मध्ये एकेन युक्तो लग्नेशः त्रिकस्थश्चेत्तदा चौरजोऽन्त्यजादुत्पन्नो वा रोगः स्यात्। रजकचर्मकारादयोऽन्त्यजाः ॥ ७ ॥

चन्द्रमा के सहित लग्नाधीश ६। ८। १२ स्थानों में से किसी स्थान में बैठा हो तो मनुष्य को जल से उत्पन्न गण्डनामक रोग होता है। मङ्गल से युक्त लग्न का स्वामी त्रिक (१२। ८। ६) में पड़ा हो तो मनुष्य के शरीर मे ग्रन्थिरोग शस्त्र (हथियार) से व्रण (घाव) होता है। लग्नेश बुध से युक्त हो तो पित्तरोग होता हैं। बृहस्पति से युक्त हो तो आँवरोगी होता है। शुक्र से युक्त हो तो क्षयी (क्षयरोगी) होता है। शनि, राहु अथवा केतु से युक्त होकर त्रिक में बैठा हो तो चौर से अथवा अन्त्यज (हीन जाति चाण्डाल, मेस्तर इत्यादि) से उत्पन्न रोग होता है ॥ ७ ॥

चन्द्रो मेषे वृषे वा कुजशनिसहितः श्वेतकुष्ठी सरोगो
दैत्येज्यारेन्दुमन्दास्तिमिभवनगताः कर्कटालिस्थिता वा।
अङ्गे सौख्येन हीनः परमकलुषकृद्रक्तकुष्ठी नर स्या-
द्वागीशो भार्गवो वा यदि रिपुगृहपो मूर्तिगः क्रूरखेटैः ॥८॥

अन्वयः—कुजशनिसहितश्चन्द्रो मेषे वा वृषे (तदा) श्वेतकुष्ठी सरोगः स्यात्। दैत्येज्यारेन्दुमन्दास्तिमिभवनगताः वा कर्कटालिस्थिता तदा नरः अङ्गे सौख्येन हीनः परमकलुषकृद्रक्तकुष्ठी स्यात्, यदि वागीशो भार्गवो वा रिपुगृहपो क्रूरखेटैर्दृष्टः मूर्त्तिगो वक्रशोफी स्यादित्यग्रिमेण सम्बन्धः ॥ ८ ॥

कुजशनियुतश्चन्द्रो मेषे वृषे वा यदि तदा नरः श्वेतकुष्ठी

स्यात्। शुक्रभौमेन्दुशनयो मीनराशिस्था यद्वा कर्कटवृश्चिकस्था तदा नरः शरीरसौख्यरहितः महापातकी रक्तकुष्ठी स्यात् गुरुः शुक्रो वा षष्ठभावाधिपः क्रूरैर्दृष्टो लग्नस्थश्चेत्तदा वक्त्र शोफी मुखाधिकरणकश्वयथुरोगयुतः स्यादित्यग्रिमश्लोकेन सम्बन्धः ॥ ८ ॥

यदि चन्द्रमा, मङ्गल और शनि के साथ मेष वा वृष राशि में स्थित हो तो मनुष्य श्वेतकुष्ठी और रोगी होता है। और यदि शुक्र, भौम, चन्द्रमा और शनैश्चर मीन, कर्क या वृश्चिक (राशि) में हो तो मनुष्य शरीर के सुख से हीन, अत्यन्त पाप करने वाला, रक्तकुष्ठवाला होता है। बृहस्पति, शुक्र वा शत्रु स्थान (छठे) का स्वामी, लग्न में बैठे हों और पाप ग्रह से देखे जाते हों तो उस मनुष्य के मुख में शोफ रोग होता है ॥ ८ ॥

दृष्टश्चेद्वक्त्रशोफी[1] त्वथ खलसहितो मीनकर्कालिभावा
लूताकारश्चिरं स्यात्परमगदकरः कुष्ठ एवं नराणाम् ।
रिःफस्थानस्थितश्चेद्विबुधपतिगुरुर्गुप्तरोगी नितान्तं
भूमीमार्तण्डपुत्रौ व्ययभवनगतौ शत्रुगौ वा व्रणी स्यात् ॥९॥

अन्वयः—अथ मीनकर्कालिभावा खलसहिता तदा एवं नराणाम् चिरं लूताकारः परमगदकरः कुष्ठः स्यात् । विबुधपतिगुरुर्रिःफस्थान-स्थितश्चेत् नितान्तं गुप्तरोगी स्यात् , भूमीमार्त्तण्डपुत्रौ व्ययभवनगतौ वा शत्रुगौ व्रणी स्यात् ॥ ९ ॥

अथ मीनकर्कवृश्चिकाराश्युपलक्षिता भावाः क्रूरसहिता यदि तदा नराणामेवं प्रकारेण चिरं कुष्ठं स्यात्। तत्र प्रकार-माह। यत्र लूताकारकः सविशेषो जन्तुविशेषः उत्कृष्टगदविशे-षकरः लूताकारककृत्कुष्ठः स्यादित्यर्थः । गुरुर्व्ययस्थश्चेन्नरः

---

१. इस श्लोक का पीछे के श्लोक से सम्बन्ध है ।

गुह्यरोगी, यद्वा वैद्याज्ञानरोगी स्यात्। भौमशनी व्यये षष्ठे वा स्यातां तदा व्रणी व्रणयुतः स्यात् ॥ ९ ॥

जिन भावों में मीन, कर्क और वृश्चिक राशियां पापग्रहों से युक्त हों तो मनुष्य को लूताकार (मकड़ी के जाल के सदृश) कठिन कुष्ठरोग होता है। बृहस्पति बारहवें स्थान में बैठा हो तो मनुष्य गुह्यरोगी होता है। अथवा ऐसा कठिन रोग हो कि वैद्यों को भी पता न लगे। मङ्गल, शनि ये बारहवें वा छठे स्थान में बैठे हों तो उस मनुष्य के शरीर में व्रण (फोड़ा, फुंसी, घाव इत्यादि) होता है ॥ ९ ॥

मेषे मीने कुलीरे तदनु च मकरे वृश्चिके मन्दचन्द्रौ
स्यातां क्रूरान्वितौ चेन्नवमभवनगौ मानवः स्याच्च खञ्जः।
लग्नस्थं पश्यतीन्दुं दिनमणितनयं भूमिजो द्यूनदृष्ट्या
बुद्ध्या हीनो नरः स्यादिनविधुविवरे भूमिजश्चेत्तथैव ॥१०॥

अन्वयः—क्रूरान्वितौ मन्दचन्द्रौ मेषे मीने कुलीरे तदनु मकरे वृश्चिके च नवमभवनगौ चेत्तदा मानवो खञ्जः स्यात्। भूमिजो द्यून-दृष्ट्या लग्नस्थं इन्दुं दिनमणितनयं पश्यति तदा नरः बुद्ध्या हीनः स्यात्, भूमिजश्चेदिनविधुविवरे तथैव (बुद्ध्या हीनो) स्यात् ॥ १० ॥

क्रूरग्रहयुतौ चन्द्रशनी मेषमीनकर्कमकरवृश्चिकान्यतमराशिगतौ नवमभवनगौ चेन्मानवो जातः खञ्जः खञ्जाख्यपादरोगी स्यात्। भूमिपुत्रः सप्तमदृष्ट्या लग्नस्थं चन्द्रं शनिं च पश्यति चेत्तदा नरः बुद्ध्या हीनः स्यात्। इन[1]विधुविवरे रविचन्द्रयोर्मध्ये भौमश्चेत्तथैव बुद्धिहीनः स्यात्। इनशब्दो लक्षणया दिनकरपरो ज्ञेयः ॥ १० ॥

---

१. 'इनः प्रभौ सूर्ये' इत्यमरः।

मेष, मीन, कर्क, मकर और वृश्चिक इन राशियों में से किसी राशि में स्थित होकर क्रूर ग्रह से युक्त शनि और चन्द्रमा नवम स्थान में बैठे हों तो वह मनुष्य खञ्ज (लँगड़ा) होता है। मङ्गल सप्तम दृष्टि से लग्न में बैठे हुए चन्द्रमा अथवा शनि को देखता हो तो वह मनुष्य बुद्धि से हीन (बेवकूफ) होता है। और यदि सूर्य और चन्द्रमा इन दोनों के बीच में मङ्गल बैठा हो तो भी वही फल अर्थात् वह मनुष्य बुद्धि से विहीन होता है ॥ १० ॥

प्रालेयांशौ तनुस्थे गगनसदनगे साधिकारेऽर्कसूनौ
दृष्टेऽस्मिन्कामदृष्ट्या हिमकिरणभुवा बुद्धियुङ्मानवः स्यात्।
पृथ्वीसूनुं मृगाङ्कं तनुनिलयगतं पूर्णदृष्ट्येन्दुसूनुः
पश्येच्चेद्बुद्धिहीनस्त्वथ शशितनुपौ भूभुवा पीडितौ वा ॥११॥

अन्वयः—प्रालेयांशौ तनुस्थे साधिकारेऽर्कसूनौ गगनसदनगे अस्मिन् हिमकिरणभुवा कामदृष्ट्या दृष्टे मानवः बुद्धियुक् स्यात्। तनुनिलयगतं पृथ्वीसूनुं मृगाङ्कं इन्दुसूनुः पूर्णदृष्ट्या चेत्पश्येत्तदा बुद्धिहीनः अथ शशितनुपौ भूभुवा पीडितौ वा (बुद्धिहीनः) स्यात् ॥ ११ ॥

चन्द्रे लग्ने साधिकारे गृहहोराद्रेष्काणादिवर्गाधिपत्यसहिते शनौ दशमस्थे बुधेन पूर्णदृष्टेऽस्मिन्मानवो जातः बुद्धिमान् स्यात् लग्नस्थं भौमं चन्द्रं च पूर्णदृष्ट्या बुधः पश्येत् चेद्बुद्धिहीनः स्यात्। यद्वा चन्द्रलग्नेशौ भौमेन पूर्णदृष्ट्या पीडितौ बुद्धिहीनः स्यात् ॥ ११ ॥

यदि चन्द्रमा लग्न में और अपने अधिकार (राशि, द्रेष्काण, त्रिंशांश, नवमांश, द्वादशांश) से युक्त शनि दशम में बैठा हो और बुध से सप्तम दृष्टि से देखा जाता हो अर्थात् बुध ४ भाव में हो तो मनुष्य बुद्धिमान् होता है। लग्न में अथवा अष्टम में स्थित मङ्गल और चन्द्रमा को बुध

सप्तम दृष्टि से देखता हो तो मनुष्य बुद्धि हीन होता है। अथवा चन्द्रमा और लग्नेश को मङ्गल पूर्ण दृष्टि से देखता हो तो भी मनुष्य बुद्धिरहित होता है ॥ ११ ॥

लग्नस्थे रौहिणेये तदनु रविशनी क्रूरदृष्टौ रिपुस्था-
वेकर्क्षे चैकभागे भवति गतमतिर्दृष्टिहीनौ शुभानाम्।
तिग्मांशौ वैरिनाथे खलविहगयुते तुर्यगे सूर्यसूनौ
हृद्रोगी वाक्पतौ वा भवति हृदि नरः कृष्णपित्ती सकम्पः॥१२॥

अन्वयः—लग्नस्थे रौहिणेये, तदनु रविशनी एकर्क्षे, एकभागे, क्रूरदृष्टौ रिपुस्थौ शुभानाम् दृष्टिहीनौ गतमतिर्भवति, वैरिनाथे तिग्मांशौ खलविहगयुते तुर्यगे हृद्रोगी स्यात्, अथवा सूर्यसूनौ वाक्पतौ वा (क्रूरसहितो षष्ठस्थो चतुर्थस्थो वा) तदा नरः हृदि कृष्णपित्ती भवति, वा दुष्टैर्पीडितो हृदि सकम्पः स्यादित्यग्रिमेण सम्बन्धः ॥ १२ ॥

लग्नस्थे बुधे तदनु क्रूरग्रहदृष्टौ शुभग्रहदृष्टिरहितौ रविशनी एकराशौ अथवा एकभागे चक्रस्य पूर्वार्द्धे परार्द्धे वा एकत्रगौ षष्ठस्थौ चेत्तदा गतमतिर्नष्टमतिः स्यात्। षष्ठभावनाथे सूर्ये क्रूरग्रहयुते तुर्यगे सति हृद्रोगी स्यात्। शनौ गुरौ वा षष्ठे क्रूरसहिते तुर्यस्थे हृदि कृष्णपित्तरोगी स्यात्। अथवा दुष्टैः पीडितो हृदि सकम्पः स्यात् ॥ १२ ॥

बुध लग्न में स्थित हो, तथा पापग्रह की दृष्टि से युक्त और शुभग्रह की दृष्टि से रहित सूर्य और शनि एक ही राशि और एक ही अंश में पड़कर छठें स्थान में बैठे हों तो मनुष्य की बुद्धि नष्ट हो जाती है। सूर्य षष्ठ स्थान का स्वामी होकर पापग्रहों के साथ चतुर्थ स्थान में स्थित हो तो मनुष्य हृदयरोग वाला होता है। यदि शनि षष्ठेश होकर पापग्रहों से युक्त चतुर्थ स्थान में बैठा हो तो मनुष्य कृष्णपित्त रोग वाला और यदि

बृहस्पति षष्ठाधिपति होकर पापग्रह के सहित चतुर्थ में पड़ा हों तो मनुष्य कम्प (कम्प वायु) रोग वाला होता है । अथवा दुष्ट मनुष्यों से पीडित होने के कारण हृदय में कम्प वाला होता है। किसी किसी के मत में दुष्ट पीडित (पापग्रह से पीडित) हो तो मनुष्य हृदय कम्पी होता है ॥ १२ ॥

दुष्टैर्वा पीडितः सन्नथ कुजरविजौ वाक्पतिर्बन्धुसंस्थौ
हृद्रोगः स्यान्नराणां व्रण इह नियतं क्लेशकारी शरीरे ।
पातालस्थो महीजस्तनयनिलयगाः सूर्यवित्सैंहिकेया
रन्ध्रस्थो भानुपुत्रो यदि जनुषि तदा स्यान्नरो दुःखभागी१३

अन्वयः—अथ कुजरविजौ वाक्पतिर्बन्धुसंस्थौ तदा इह नराणां शरीरे नियतं हृद्रोगः क्लेशकारी व्रणश्च स्यात्, यदि जनुषि महीजः पातालस्थो सूर्यवित्सैंहिकेयातनयनिलयगाः रन्ध्रस्थो भानुपुत्रो तदा नरो दुःखभागी स्यात् ॥ १३ ॥

अथ कुजः सूर्यजो गुरुश्च चतुर्थस्थो यदि तदा इहास्मिन् योगे हृद्रोगाद्धेतोर्नराणां शरीरे क्लेशकारी व्रणः नियमेन स्यात्। यदा जन्मसमये भौमश्चतुर्थस्थः सूर्यबुधराहवः पञ्चमस्थाः शनिः अष्टमस्थस्तदा जातो नरो दुःखभागी भवति ॥ १३ ॥

मङ्गल, शनि और बृहस्पति ये लग्न से चौथे स्थान में बैठे हों तो मनुष्य को हृदय का रोग और शरीर में कष्टदायक व्रण (फोड़ा या घाव) अवश्य होता है। यदि जन्मकाल में चतुर्थ स्थान में मंगल, पञ्चम भाव में सूर्य बुध और राहु, अष्टम भाव में शनि बैठा हो तो मनुष्य दुःख भोगने वाला होता है ॥ १३ ॥

---

१. इसका आगे के श्लोक से सम्बन्ध है ।

लग्नं पश्येन्निजर्क्षे यदि धरणिसुतः संस्थितः कातरः स्या-
च्छायासूनुर्नभःस्थो यदि निशि जननं तद्वदत्रापि वाच्यम् ।
मूर्तौ भूमीतनूजे स्वजनकलहकृद् द्यूनगे स्वाधिकारा-
द्धीने भौमे वपुष्मान् परमयुधि रतस्तीक्ष्णभानुश्च नूनम् १४

अन्वयः—यदि निजर्क्षे धरणिसुतः संस्थितः लग्नं पश्येत्तदा कातरः स्यात्, यदि छायासूनुः नभस्थो निशि जननं तदा तद्वदत्रापि वाच्यम्, भूमितनूजे मूर्तौ स्वजनकलहकृत्, स्वाधीकाद्धीने भौमे द्यूने तदा नूनं वपुष्मान् परमयुधिरतः तीक्ष्णभानुश्च स्यात् ॥ १४ ॥

स्वक्षेत्रस्थितो भौमो यदि लग्नं पश्येत्तदा जातः कातरः भीरुः स्यात् । यदि शनिर्दशमस्थो रात्रौ जन्म चेदत्रापि तद्वद्वाच्यं कातरः स्यादित्यर्थः । लग्नगे भौमे स्वजनकलहकरः स्यात् । स्वाधिकाराद्धीने स्वगृहहोराद्रेष्काणादिरहिते सप्तमे भौमे वपुष्मान् दृढशरीरः अत्यन्तयुद्धप्रीतिमान् तीक्ष्णस्वभावश्च स्यात् नूनं निश्चयेन ॥ १४ ॥

यदि मंगल अपने राशि का होकर लग्न को देखता हो तो मनुष्य कातर (डरपोक) होता है। एवं यदि शनैश्चर दशम स्थान में हो और रात्रि का जन्म हो तो भी मनुष्य कातर होता है। लग्न में मंगल बैठा हो तो जातक अपने कुटुम्बियों में कलह (झगड़ा) करने वाला होता है। यदि स्वोच्चादि (उच्च, राशि, नवमांश, द्रेष्काण इत्यादि) अपने अधिकार से रहित मंगल सप्तम स्थान में स्थित हो तो वह मनुष्य पुष्ट (या सुन्दर) शरीर वाला और युद्ध (लड़ाई) से अत्यन्त प्रेम करने वाला और कठोर स्वभाव वाला होता है ॥ १४ ॥

पश्येतां कामदृष्ट्या धरणिविधुसुतौ चेन्मिथः स्यात्तदानी-
मुच्चाकारोऽथ चन्द्रं शनिरविमहिजाश्चेत्प्रपश्यन्ति शीतः ।

क्षीणे प्रालेयभानौ धरणिजसहिते पापभूमिः खरः स्या-
न्मूर्तिस्थो ज्ञनदृष्ट्या हिमकरतनयो वासवेज्यं प्रपश्येत्॥१५॥

अन्वयः—धरणिविधुसुतौ चेन्मिथः कामदृष्ट्या पश्येतां तदानी-मुच्चाकारः स्यात्, अथ शनिरविमहिजाश्चेच्चन्द्रं पश्यन्ति तदा शीतः, प्रालेयमानौ क्षीणे धरणिजसहिते पापभूमिः खरः स्यात्, हिमकरतनयो मूर्तिस्थो द्यूनदृष्ट्या वासवेज्यं प्रपश्येत्तदा हास्यासक्तः स्यदित्यग्रिमेण सम्बन्धः ॥ १५ ॥

धरणिविधुसुतौ भौमबुधौ मिथश्चान्योन्यं सप्तमदृष्ट्या पश्येतां तदानीं जात उच्चशरीरः स्यात्। अथ शनिरविभौमा-श्चन्द्रं पस्यन्ति तदा जातः शीतलस्वभावः स्यात्। शीतलत्वं जडत्वं मूर्खत्वमित्यर्थः। क्षीणे चन्द्रे भौमसहिते पापभूमिः पापकृत्, खरस्तीक्ष्णस्वभावः स्यात्। मूर्तिस्थो बुधः सप्तमस्थं गुरुं पश्येत्तदा जातो हास्यासक्त इत्यग्रिमश्लोकेन सम्बन्धः॥ १५॥

यदि मंगल और बुध अन्योन्य (आपस में) एक दूसरे को सप्तम दृष्टि से देखते हों तो वह मनुष्य उच्चाकार (लम्बी शरीर वाला) होता है। यदि (किसी स्थान में बैठे हुए) चन्द्रमा को शनि, सूर्य और मंगल देखते हों तो मनुष्य शीतल स्वभाव वाला (मूर्ख) होता है। यदि क्षीण चन्द्रमा मंगल से युक्त हों तो मनुष्य पापभूमि (अत्यन्त पापी) और विशेष कठोर स्वभाव वाला होता है। यदि लग्न में बैठा हुआ बुध बृहस्पति को सप्तम दृष्टि से देखता हो तो मनुष्य हास्यप्रिय[1] (हसलोन) होता है॥ १५॥

---

१. इसका सम्बन्ध आगे के श्लोक में है।

हास्यासक्तः सभौमे हिमकरतनये स्याच्छुभर्क्षे कुजज्ञौ
मन्दर्क्षे वार्कदृष्टौ नरपतिविदुषां रञ्जने कोविदः स्यात् ।
पश्येत्काव्यं सितांशुर्व्ययविलयरिपुस्थानगो विस्मयालुः
क्षिप्रं वाक्स्फूर्तिमान्स्यात्कुजबुधशशिनो वीर्यवत्खेटदृष्टाः १६

अन्वयः—सभौमे हिमकरतनये शुभर्क्षे, वा कुजज्ञौ मन्दर्क्षे अर्कदृष्टौ तदा नरपतिविदुषां रञ्जने कोविदः स्यात्, व्ययविलयरिपुस्थानगो सितांशुः काव्यं पश्येत् विस्मयालुः, कुजबुधशशिनो वीर्यवत्खेटदृष्टाः क्षिप्रं वाक्स्फूर्त्तिमान् स्यात् ॥ १६ ॥

अथ भौमसहिते बुधे शुभर्क्षे शुभग्रहराशौ यद्वा कुजज्ञौ सूर्यदृष्टौ मन्दराशिस्थौ तदा राज्ञां विदुषां च रञ्जने हर्षोन्मुखीकरणे प्रवीणः स्यात् । त्रिकस्थः चन्द्रः शुक्रं पश्येत्तदा विस्मयालुः विस्मययुक्तः स्यात् । कुजबुधेन्दवो बलिष्ठग्रहदृष्टाश्चेच्छीघ्रं यथा स्यात्तथा वचनस्फूर्तियुक्तः स्यात् ॥ १६ ॥

(१) यदि मंगल से युक्त बुध शुभग्रह की राशि में हों, अथवा (२) मंगल और बुध, शनैश्चर की राशि (मकर कुम्भ) में स्थित होकर सूर्य से देखे जाते हों तो राजाओं और विद्वानों को प्रसन्न करने में अत्यन्त प्रवीण होता है । त्रिक स्थान (षष्ठ, अष्टम और द्वादश) में बैठा हुआ चन्द्रमा, शुक्र को देखता हो तो मनुष्य विस्मयालु (बात २ में आश्चर्य करने वाला) होता है । एवं यदि मंगल, बुध और चन्द्रमा इनको बलवान् ग्रह देखता हो तो मनुष्य झटपट प्रत्युत्तर (जवाब) देने वाला होता है ॥ १६ ॥

शुक्रज्ञौ द्यूनयातौ गगनविलयगौ मानवः पुंश्चलः स्यात्
कामाज्ञामन्दिरस्थौ कविधरणिसुतौ तद्वदाज्ञाम्बुयातौ ।
काव्यारौ तद्वदिन्दोर्नभसि रविसुतादास्फुजिन्नीरयायी
तद्वत्कामास्पदस्था बुधसितशनयः स्वर्क्षगे भार्गवे हि॥१७॥

अन्वयः—शुक्रज्ञौ द्यूनयातौ गगनविलयगौ मानवः पुंश्चलः स्यात् कविधरणिसुतौ कामाज्ञामन्दिरस्थौ तद्वत्, काव्यारौ आज्ञाम्बुयातौ तद्वत्, इन्दोर्नभसि आस्फुजित्, रविसुतानाम्नीरयायी (आस्फुजित्) तद्वत्, स्वर्क्षगे भार्गवे, बुधसितशनयः कामास्पदस्थास्तद्वत (पुंश्चलः) स्यात् ॥ १७ ॥

शुक्रबुधौ सप्तमाष्टमदशमगतौ तदा मानवः पुंश्चलो व्यभिचारी स्यात्। शुक्रभौमौ सप्तमदशमस्थौ तद्वत् पुंश्चलः स्यात्। शुक्रभौमौ चतुर्थदशमगौ तद्वत् पुंश्चलः स्यात्। चन्द्राद्दशमे शुक्रे शनेश्चतुर्थे शुक्रे तदा तद्वत् पुंश्चलः। शुक्रे स्वराशिस्थे शुक्रबुधशनयः सप्तमदशमस्थाः तदा तद्वदित्यनुषङ्गः ॥ १७ ॥

(१) शुक्र और बुध सप्तम, अष्टम वा दशम स्थान में हों तो मनुष्य पुंश्चल (व्यभिचारी) होता है। (२) शुक्र और मंगल सप्तम अथवा दशम स्थान में स्थित हों तो भी मनुष्य पुंश्चल (परस्त्रीगामी) होता है। (३) शुक्र, मंगल चतुर्थ वा दशम स्थान में बैठे हों तो भी मनुष्य परस्त्रीगामी होता है (४) चन्द्रमा से दशम में, शनि से चतुर्थ स्थान में शुक्र (अर्थात् चन्द्रमा से दशम स्थान में शुक्र और सप्तम स्थान में शनि) बैठा हो (५) शुक्र अपनी राशि में स्थित हो तथा शुक्र, बुध, शनि ये सप्तम और दशम स्थान में पड़े हों तो भी मनुष्य पुंश्चल (लम्पट) होता है ॥ १७ ॥

प्रालेयांशात्सिताद्वा दिनमणितनयस्तत्पुरोभागवर्ती
मूर्तौ चेच्चन्द्रशुक्रौ यदि तरणिसुतं पश्यतश्चायशाः स्यात्।
शेफच्छेदो नाराणामथ तपनसुते भूमिकेन्द्रेऽर्कयुक्ते
दृष्टे काव्योडुपाभ्यां यदि दिवसपतेश्चोपरागोऽत्र तद्वत् १८

अन्वयः—यदि दिनमणितनयः प्रालेयांशात्सिताद्वा तत्पुरोभागवर्ती तन्मूर्तौ चन्द्रशुक्रौ तरणिसुतं पश्यतः अयशाः स्यात्, अथ अर्कयुक्ते

तयनसुते भूमिकेन्द्रे काव्योडुपाभ्यां दृष्टे अत्र यदि दिवसपतेश्चोपरागो तदा नराणां शेफच्छेदो तद्वदयशाः स्यात् ॥ १८ ॥

चन्द्रात् शुक्राद्वा शनिस्तत्पुरोभागवर्ती तदग्रिमभावे स्थितः चन्द्रशुक्रौ लग्नस्थौ शनिं पश्यतश्चेत्तदा जातः अयशा अपकीर्तियुतः स्यात्। अथ सूर्ययुते शनौ भूमिकेन्द्रे लग्नस्थे शुक्रचन्द्रदृष्टे सति दिवसपतेः सूर्यस्य चोपरागो ग्रहणं तदा शेफच्छेदः लिङ्गच्छेदः तद्वदपकीर्तिश्च स्यात् ॥ १८ ॥

(१) चन्द्रमा अथवा शुक्र से आगे के भाव में शनैश्चर बैठा हो (२) अथवा चन्द्रमा और शुक्र लग्न में स्थित हों और शनि को देखते हों तो मनुष्य अपकीर्ति से युक्त होता है। यदि जन्म समय में सूर्य से युक्त शनि लग्न में बैठा हो तथा शुक्र और चन्द्रमा दोनों से देखा जाता हो और सूर्यग्रहण के समय जन्म हो तो मनुष्य का शेफच्छेद (लिङ्गच्छेद) और अयश होता है ॥ १८ ॥

याते वक्रग्रहर्क्षे जनुषि भृगुसुते भानवस्तोषदायी
सीमन्तिन्यारतेः स्यान्न खलु मदनगं भार्गवं लग्ननाथः।
पश्येत्स्वीयालयस्थो यदि रहसि तदा कामिनीतोषदाता
न स्यादेवं हिमांशुदिनकरसुतयुक् भौमतः खे सुखे वा ॥ १९ ॥

अन्वयः—जनुषि भृगुसुते वक्रग्रहर्क्षे याते मानवः सीमन्तिन्याः रतेः तोषदायी न स्यात्, स्वीयालयस्थो लग्ननाथः मदनगं भार्गवं यदि पश्येत् खलु तदा रहसि कामिनीतोषदाता न स्यात्, एवं हिमांशुर्दिनकरसुतयुक् भौमतः खेवा सुखे तदा (कामिनीतोषदाता) न स्यात् ॥ १९ ॥

शुक्रे वक्रग्रहराशिगते सति मानवो जातः सीमन्तिन्या रतेः सम्भोगाद्धेतोस्तोषदायी सुखदायी सुखदो न स्यात्। स्वीयालयस्थो लग्ननाथः सप्तमगं भार्गवं यदि पश्येत्पूर्णदृष्ट्या इति

शेषः । तदा जातः रहसि रतिस्थाने कामिनीतोषदाता न स्यादिति । चन्द्रः शनियुतः भौमाच्चतुर्थे दशमे वा स्यात्तदा एवमुक्तप्रकारेण कामिनीतोषदाता न स्यादेव ॥ १९ ॥

यदि शुक्र वक्रीग्रह की राशि में हो तो वह मनुष्य स्त्री को सम्भोग से सुखी करने वाला नहीं होता है। अपनी राशि में बैठा हुआ लग्नेश सप्तम स्थान में बैठे हुए शुक्र को देखता हो तो जातक मैथुन से कामिनी (स्त्री) को सन्तोष देने वाला नहीं होता है। एवं चन्द्रमा शनि से युक्त होकर मंगल से दशम वा चतुर्थ में बैठा हो तो भी सम्भोग से स्त्री को तृप्त नहीं कर सकता है ॥ १९ ॥

क्षोणीपुत्रेण युक्तः प्रथमसुरगुरुर्लग्नतः षष्ठपोऽयं
कामाधिक्यं नराणां जनयति नियतं पापदृष्टो विशेषात् ।
काव्ये स्वीयालयस्थे तदनु मिथुनगे कामवान्मानवःस्या-
न्मूर्तौ सप्ताश्वसूनौ धनुषि च वृषभे चेत्पुमानल्पकामः॥२०॥

अन्वयः–प्रथमसुरगुरुः क्षोणीपुत्रेण युक्तः लग्नतः षष्ठपः अयं नराणाम् नियतं कामाधिक्यं जनयति, पापदृष्टो विशेषात्कामाधिक्यं जनयति, काव्ये स्वीयालयस्थे तदनुमिथुनगे मानवः कामवान् स्यात्,सप्ताश्वसूनौ धनुषि च वृषभे मूर्तौ चेत्पुमानल्पकामः स्यात् ॥ २० ॥

प्रथमसुरगुरुः शुक्रः भौमयुक्तोऽयं लग्नात्षष्ठपः षष्ठभावाधिपः तदा जातानां नराणां कामाधिक्यं कामबलप्रचुरतां नियमेन जनयति। स शुक्रः पापदृष्टश्चेद्विशेषात्कामाधिक्यं जनयति। तदनु शुक्रे स्वभवनस्थे मिथुनस्थे वा मानवः कामवान् स्यात् । सप्ताश्वपुत्रः शनिः धनुषि वृषे वा लग्ने चेत्तदा मानवोऽल्पकामः स्यात् ॥ २० ॥

यदि प्रथम सुरगुरु (शुक्र) मंगल से युक्त होकर लग्न से छठे भाव का स्वामी हो तो मनुष्य विशेष कामी होता है। यदि वही मंगल युत षष्ठेश शुक्र पापग्रह से दृष्ट हो तो मनुष्य अत्यन्त कामी होता है। यदि शुक्र अपनी राशि (वृष, तुला) अथवा मिथुन राशि में स्थित हो तो भी मनुष्य कामी होता है। यदि सप्ताश्व-सूनु (शनि) धनु वा वृष में स्थित होकर लग्न में पड़ा हो तो मनुष्य अल्पकामी होता है ॥ २० ॥

मन्दे नक्रेऽल्पभाषीत्यथ रिपुगृहपे वा सुधांशावदृश्ये
चेदर्धे संस्थितेऽङ्को भवति जनिमतां नेत्रयोः क्रूरयुक्ते ।
पश्येत्क्षीणं न चन्द्रे यदि भृगुतनयः सूर्यजः पश्यतीन्दुं
स्वर्क्षे चन्द्रे नभस्थैर्यदि मदनगतैर्वीक्षिते पापखेटैः ॥२१॥

अन्वय.—अथ मन्दे नक्रेऽल्पभाषी, चेद्रिपुगृहपे वा सुधांशौ अदृश्येऽर्धे संस्थिते क्रूरयुक्ते जनिमतां नेत्रयोः अङ्को भवति, यदि क्षीणं चन्द्रं भृगुतनयः न पश्येत् सूर्यजः इन्दुं पश्यति स्वर्क्षे चन्द्रे यदि नभस्थैः मदनगतैर्वा पापखेटैर्वीक्षिते नूनमल्पनेत्रः स्यात् ॥ २१ ॥

शनौ मकरस्थे सति अल्पभाषी अप्रयोजनबहुभाषी न भवति। तदनु षष्ठभवननाथे चन्द्रे वा क्रूरयुते अदृश्यार्धे संस्थिते सति जनिमतां नेत्रयोरङ्कश्चिन्हविशेषो भवति। सप्तमभावभोग्यांशारभ्याष्टमादिक्रमेण लग्नभुक्तांशपर्यन्तमदृश्यार्धं ज्ञेयम्। यदि क्षीणं चन्द्रं शुक्रो न पश्येत् शनिरिन्दुं पश्यति कर्कस्थे चन्द्रे दशमे सप्तमे वा स्थितैः क्रूरग्रहैर्दृष्टे तदा नूनं निश्चयेन स्वल्पनेत्रः स्यादित्यग्रिमपद्येनान्वयः ॥ २१ ॥

यदि शनि मकर राशि में बैठा हो तो मनुष्य अल्पभाषी बिना काम के ज्यादा बकवाद न करने वाला होता है। षष्ठाधीश अथवा चन्द्रमा क्रूरग्रह (पापग्रह) से युक्त होकर अदृश्य चक्रार्ध (सप्तम भाव के भोग्यांश से

लेकर लग्न के भुक्तांश तक) में स्थित हो तो नेत्रों में अङ्क (चिह्न) होता है। यदि क्षीण चन्द्रमा को शुक्र न देखता हो और शनैश्चर देखता हो अथवा अपनी राशि (कर्क) का चन्द्रमा दशम वा सप्तम स्थान में स्थित पापग्रह से देखा जाता[1] हो तो मनुष्य निश्चय छोटे २ नेत्र वाला होता है ॥ २१ ॥

स्यान्नूनं चाल्पनेत्रस्तदनु तनुगतं भूमिजं वा क्षपेशं
पश्येद्वाचस्पतिश्चेदसुरकुलगुरुः काणदृङ्मानवः स्यात् ।
विच्छायातिग्मभानोः क्षितिभुवि च पुरोभागगे दृङ्नराणां
सौम्यं चिह्नं दृशि स्यादथ वपुषि लये भार्गवे क्रूरदृष्टे॥२२॥

अन्वयः—तदनु तनुगतं भूमिजं वा क्षपेशं वाचस्पतिः असुरकुलगुरुश्चेत्पश्येत् मानवः काणदृक् स्यात्, तिग्मभानोः क्षितिभुवि पुरोभागगे नराणां दृङ् विच्छाया स्यात्, तिग्मभानोः सौम्ये पुरोभागगे दृशि चिन्हं स्यात्, अथ भार्गवे वपुषि लये क्रूरदृष्टे अश्रुपातान्नेत्रे पीडा स्यादित्यग्रिमेण सम्बन्धः ॥ २२ ॥

तदनु लग्नस्थं भौमं चन्द्रं वा वाचस्पतिः शुक्रश्च पश्येच्चेन्मानवः काणनेत्रः स्यात् । तिग्मभानोः सूर्यात्पुरोभागगे अग्रगामिनि अस्ताभिलाषिणि भौमे नराणां दृक् विच्छाया कान्तिरहिता स्यात्। सूर्यात् बुधे पुरोभागगे दृशि चिह्नं स्यात् । अथ भार्गवे शुक्रे लग्नस्थेऽष्टमे वा क्रूरदृष्टे सति अश्रुपाताद्धेतोः नेत्रपीडा स्यादित्यग्रिमश्लोकेन संबन्धः ॥ २२ ॥

यदि लग्न में बैठे हुए मंगल को अथवा चन्द्रमा को बृहस्पति अथवा शुक्र देखता हो तो मनुष्य काना (एकाक्ष) होता है। सूर्य से अग्रिम भाग में (अस्तासन्न) मंगल हो तो मनुष्य की दृष्टि कान्तिरहित होती

१. इसका सम्बन्ध आगे के श्लोक से है।

है। सूर्य से अग्रिम भाव में बुध हो तो मनुष्य की आँख में चिह्न होता है। यदि शुक्र लग्न में अथवा अष्टम में बैठा हो और पापग्रह से देखा जाता हो तो मनुष्य के नेत्र में अश्रुपात से पीड़ा होती है ॥ २२ ॥

नेत्रे पीडाश्रुपातात्तदनु शशिकुजावेकभावे यदाक्ष्णो-
श्चिह्नं किञ्चित्तदानीं ग्रहबलवशतो दृश्यमेवं सुधीभिः ।
मार्तण्डे रिःफयाते तदनु नवमगे पुत्रगे वा खलाढ्ये
दृष्टे वा स्यान्मनस्वी सुविकलनयनः सूर्यजे व्याधियुक्तः॥२३॥

अन्वयः—यदा शशिकुजावेकभावे तदानीं अक्ष्णोः किञ्चिच्चिन्हं स्यात् , एवं सुधीभिः ग्रहबलवशतो दृश्यम्, खलाढ्ये वा दृष्टे मार्त्तण्डे रिःफयाते तदनु नवमगे वा पुत्रगे मनस्वी सुविकलनयनः स्यात् , सूर्यजे (क्रूरयुते दृष्टे वा पूर्वोक्तस्थानस्थे) व्याधियुक्तः स्यात् ॥ २३ ॥

तदनु चन्द्रभौमौ एकभागैकनवांशस्थौ तदा नेत्रयोः किञ्चिच्चिह्नं स्यात्। सुधीभिर्योगकर्तृग्रहबलवशादेवमुक्तप्रकारेणादेश्यं वक्तव्यम्। तदनु क्रूरग्रहदृष्टे युते वा सूर्ये व्ययगे वा नवमे पञ्चमे सति जातः सुविकलनेत्रोऽप्रशस्तनयनः स्यात्। सूर्यजे शनौ क्रूरयुते दृष्टे वा क्रूरे द्वादशगे नवमपञ्चमगे वा व्याधियुक्तो रोगी स्यात् ॥ २३ ॥

चन्द्रमा और मंगल एक भाव (अथवा एक नवांश) में स्थित हों तो मनुष्य के नेत्र में कोई चिह्न होता है। ज्यौतिषियों को योगकारक ग्रह के बलवश से ऐसा कहना चाहिये। सूर्य बारहवें, नवें अथवा पाँचवें स्थान में बैठा हो, पापग्रहों से युक्त हो या देखा जाता हो तो बालक मनस्वी (मनमाना काम करनेवाला) और विकलनेत्र वाला (खराब नेत्र वाला)

---

१. इस श्लोक का अग्रिम श्लोक से सम्बन्ध है।

होता है। एवं (द्वादश, नवम या पञ्चम स्थान में बैठा हुआ पापग्रहों से युक्त या दृष्ट) शनैश्चर (अथवा कोई पापग्रह) हो तो व्याधियुक्त (रोगी) होता है ॥ २३ ॥

चन्द्रं पृष्ठोदयस्थं हिबुकगृहगतः सूर्यसूनुः प्रपश्ये-
दित्थं लग्नाधिनाथे क्रियभवनगते मानवो वामनः स्यात् ।
कोशे पीयूषभानुर्जलचरगृहगाः सौरिणा संयुतो वा
मार्तण्डे भूमिकेन्द्रे यदि भवति तदा दद्रुमान् पूरुषःस्यात् ॥२४॥

अन्वयः—हिबुकगृहगतः सूर्यसूनुः पृष्ठोदयस्थं चन्द्रं प्रपश्येत् इत्थं लग्नाधिनाथे क्रियभवनगते मानवो वामनः स्यात्, जलचरगृहगाः पीयूषभानुः कोशे वा सौरिणा संयुतः, मार्त्तण्डे भूमिकेन्द्रे यदि भवति तदा पूरुषः दद्रुमान् स्यात् ॥ २४ ॥

पृष्ठोदयराशिगं चन्द्रं चतुर्थभावस्थः शनिः प्रपश्येत्। लग्नपे मेषराशिस्थिते जातो मानवो वामनः ह्रस्वकायः स्यात्। जलचर राशिस्थश्चन्द्रो द्वितीये अथवा शनिनायुक्ते अथवा सूर्ये लग्नगे यदि तदा पूरुषः दद्रुमान् कुष्ठयुक्तः स्यात् ॥ २४ ॥

पृष्ठोदय[1] राशि में स्थित चन्द्रमा को चतुर्थ भाव में बैठा हुआ शनि देखता हो तथा लग्नाधीश मेषराशि में स्थित हो तो मनुष्य वामन (छोटे २ हाथ पैर वाला) होता है। जलचर राशि (कर्क, कुम्भ, मीन, मकर) में स्थित चन्द्रमा द्वितीय स्थान में पड़ा हो अथवा शनि से युक्त हो अथवा सूर्य लग्न में बैठा हो तो मनुष्य दद्रुमान् (दाद से युक्त) होता है ॥२४॥

---

१. गोजाश्विकार्किमिथुनाः समृगा निशाख्याः
पृष्ठोदया विमिथुनाः कथितास्त एवे'ति ।

दृष्टे क्रूरैर्न सौम्यैर्यदि रिपुगृहपे चोडुपे प्लीहवान् स्या-
देवं कामाङ्गनाथे तदनु रविसुतस्तुर्यगो नष्टदृष्टिः ।
प्लीही स्याल्लग्ननाथे दिनकरतनये क्रूरनिष्पीडिते चेत्
सौख्यायुङ्मानवः स्यात्तनुसदनगते प्लीहवान् हर्षहीनः॥२५॥

अन्वय –रिपुगृहपे उडुपे च क्रूरैर्दृष्टे यदि सौम्यैर्न दृष्टे तदा प्लीहवान् स्यात्, एवं कामाङ्गनाथे तदनु (प्लीहवान् स्यात्), रविसुतस्तुर्यगो (क्रूरैर्दृष्टः) नष्टदृष्टिः प्लीही स्यात्, लग्ननाथे दिनकरतनये चेत् क्रूर-निष्पीडिते मानवः सौख्यायुक् स्यात्, तनुसदनगते (दिनकरतनये) प्लीहवान् हर्षहीनः स्यात् ॥ २५ ॥

षष्ठभावाधिपे चन्द्रे सौम्यदृष्टिरहिते केवलं क्रूरैर्दृष्टे प्लीह-पीडितः स्यात् । एवं कामाङ्गनाथे सप्तमनाथे लग्ननाथे चन्द्रे केवलं क्रूरदृष्टे प्लीहवान् स्यात् । पापग्रहैर्दृष्टः शनिश्चतुर्थ-श्चेन्नष्टदृष्टिः अन्धः स्यात् । क्रूरग्रहैः निष्पीडिते दृष्ट्या योगेन वा विकलीकृते यदा विजिते लग्नेशे शनौ सौख्यायुक् सौख्य-रहितः स्यात् । लग्नगते शनौ प्लीहवान् आनन्दरहितश्च स्यात् ॥ २५ ॥

षष्ठेश और चन्द्रमा शुभग्रह से न देखे जाते हों और पापग्रह से देखे जाते हों तो मनुष्य प्लीहा (बरवट) से पीडित होता है एवं चन्द्रमा सप्तमेश अथवा लग्नेश होकर पापग्रहों से दृष्ट हो और शुभग्रहों से अदृष्ट हो तो भी मनुष्य प्लीहा से दुःखी होता है। पापग्रहों से देखा जाता हुआ शनि चतुर्थभाव में बैठा हो तो मनुष्य नष्टदृष्टि (अन्धा) और प्लीहवान् होता है, शनि लग्नाधीश होकर पापग्रहों से परिपीडित (युक्त या दृष्ट) हो तो मनुष्य सुख से विहीन (दुःखी) होता है। यदि शनि लग्न में बैठा हो तो मनुष्य प्लीहा (तापतिल्ली) से युक्त और हर्ष (प्रसन्नता) से हीन होता है ॥ २५ ॥

क्रूराः केन्द्रालयस्था वपुषि च विकलः केन्द्रगौ पुष्पवन्तौ
किं वा लग्ने प्रपश्येत्कविमिनतनयः श्रोणिभागेऽङ्गहीनः ।
काव्यः पातालयायी सुरपतिगुरुणा क्वापि युक्तोऽर्कसूनु-
भौमौ वा रौहिणेयो भवति हि विकलः श्रोणिभागे भुजेऽङ्घ्रौ।२६॥

अन्वयः—क्रूराः केन्द्रालयस्था वपुषि विकलः, पुष्पवन्तौ केन्द्रगौ विकलः, किंवा लग्ने कविं इननतयः प्रपश्येद् श्रोणिभागेऽङ्गहीनः, काव्यः पातालयायी सुरपतिगुरूणा युक्तोऽर्कसूनुभौमौ वा रौहिणेयो क्वापि भवति तदा श्रोणिभागे भुजेऽङ्घ्रौ वा विकलः स्यात् ॥ २६ ॥

यद्वा क्रूराः केन्द्रगास्तदा जातः वपुषि शरीरे विकलः विकलाङ्गः स्यात् । पुष्पवन्तौ सूर्यचन्द्रौ केन्द्रगौ वा तदा विकलाङ्गः । अत्र पुष्पवन्तावित्युक्त्या चन्द्रसूर्ययोरेकराशिस्थत्वं विवक्ष्यते चन्द्रस्य क्षीणत्वाद्योगेऽस्मिन् विकल इति भावः । लग्नस्थं शुक्रं शनिः पश्येत्तदा श्रोणिभागे कटितटे अङ्गहीनः । शुक्रश्चतुर्थगः गुरुसहितः शनिभौमौ बुधो वा यत्र कुत्र स्थितस्तदा कटितटे हस्ते चरणे वा विकलः स्यात् ॥ २६ ॥

यदि क्रूरग्रह केन्द्र (१ । ४ । ७ । १० । में बैठे हों तो मनुष्य विकलांग (हाथ, पैर, मुँह इत्यादि अवयवों में विकारयुक्त) होता है । एवं यदि सूर्य और चन्द्रमा दोनों एक राशि में होकर केन्द्र में हों अर्थात् अमावास्या के दिन जन्म हो और केन्द्र में बैठे हों तो भी मनुष्य विकलांग होता है । यदि लग्न में बैठे हुए शुक्र को शनि देखता हो तो मनुष्य कटिभाग (कमर) में विकलतायुक्त होता है । यदि शुक्र चतुर्थ भाव में बैठा हो तथा शनि, मंगल वा बुध, बृहस्पति से युक्त होकर किसी भाव में स्थित हों तो मनुष्य के कमर, हाथ और पैर में विकलता होती है ॥ २६ ॥

आयुः पुण्याधिनाथौ यदि खलखचरात्तुर्यगौ पापयुक्तौ
जङ्घावैकल्यवान् स्यात्कुजशनिसहिते सैंहिकेये च सूर्ये।
द्वेष्यस्थे तद्वदेवं शनिरिपुगृहपौ रिःफयातौ खलैश्चेद्-
दृष्टौ तद्वत्तदानीं रविविधुरविजा वैरिरन्ध्रालयस्थाः ॥२७॥

अन्वयः—यदि आयुः पुण्याधिनाथौ पापयुक्तौ खलखचरात्तुर्यगौ जङ्घावैकल्यवान् स्यात्, सैंहिकेयेकुजशनिसहिते च सूर्ये द्वेष्यस्थे तद्वत्, एवं शनिरिपुगृहपौरिःफयातौ खलैश्चेद्दृष्टौ तद्वत्, रविविधुरविजा वैरिरन्ध्रालयस्थाः तदानीं पञ्चशाखे आर्तिः स्यादित्यग्रिमेण सम्बन्धः ॥२७॥

निधननवमेशौ क्रूराच्चतुर्थगौ क्रूरयुतौ जङ्घावैकल्यवान् अनूरुः स्यात्। राहौ भौमशनियुते षष्ठगे चकारात् भौमे शनियुते सूर्ये षष्ठगते तद्वत् पङ्गुः स्यात्। एवं शनिषष्ठभावेशौ क्रूरदृष्टौ व्ययस्थौ तद्वत् पङ्गुः स्यात्। सूर्यविधुशनयः षष्ठाष्टमभावस्थाः तदानीं तस्य पञ्चशाखे हस्ते आर्तिः पीडा स्यादित्यग्रिमश्लोकेन सम्बन्धः ॥ २७ ॥

अष्टमाधीश और नवमाधीश पापग्रहों से युक्त चतुर्थ स्थान में बैठे हों और पापग्रहों से युक्त हों तो मनुष्य की जंघा में विकार होता है। और यदि राहु अथवा सूर्य, मङ्गल और शनि के साथ षष्ठस्थान में बैठा हो तो भी मनुष्य पंगु होता है। एवं शनि और षष्ठाधीश ये दोनों पाप ग्रहों से दृष्ट होकर बारहवें स्थान में पड़े हों तो भी मनुष्य पंगु (लँगड़ा) होता है। और सूर्य, चन्द्रमा और शनि ये तीनों षष्ठ या अष्टम स्थान में स्थित हों तो उस मनुष्य के हाथ में पीड़ा होती है ॥ २७ ॥

स्यादार्तिः पञ्चशाखे, तदनु दशमगे सूर्यसूनौ सिताढ्ये
क्लीबः स्यात्सूर्यसूनौ व्ययरिपुगृहगे शुक्रतः क्लीबरूपः।

पश्येत्सूर्यालयस्थो मदनभवनगं भूमिसूनुं सुधांशु-
श्चार्कः काणश्च कर्के यदि शुभगृहपो मेषसिंहालिनक्रे ॥२८॥

अन्वयः—तदनु सिताढ्ये सूर्यसूनौ दशमगे क्लीबः स्यात्, शुक्रतः सूर्यसूनौ व्ययरिपुगृहगे क्लीवरूपः स्यात्, सूर्यालयस्थो सुधांशुः मदनभवनगं भूमिसूनुं पश्येत्, अथवा अर्कः कर्के (मदन भवनगं भूमिसूनुं पश्येत्) तदा काणः स्यात्, यदि शुभगृहपो मेष-सिंहालिनक्रे तद्वत् ॥ २८ ॥

तदनु शुक्रयुते दशमस्थे शनौ क्लीबो नपुंसकः स्यात्। शुक्राक्रान्तराशेर्व्ययषष्ठगे शनौ क्लीबरूपो रूपेण क्लीबसदृशः न तु क्लीबः। सिंहराशिस्थश्चन्द्रः सप्तमगं भौमं पश्येत्तदा काणः स्यात्। कर्कस्थः सूर्यः सप्तमगं भौमं पश्येत्तदा काणः उभय-योगेऽपि काणः स्याद्यदि नवमपः मेषसिंहवृश्चिकमकरे स्या दिति सम्बन्धः ॥ २८ ॥

यदि शुक्र से युक्त शनैश्चर दशम स्थान में बैठा हो तो मनुष्य क्लीब (नपुंसक) होता है। यदि शुक्र से (शुक्राधिष्ठित राशि से) बारहवें या छठें स्थान में शनि पड़ा हो तो मनुष्य नपुंसक के समान रूपवाला होता है अर्थात् वस्तुतः नपुंसक नहीं होता है। सिंहराशि में बैठा हुआ चन्द्रमा, सप्तम स्थान में बैठे हुए मंगल को देखता हो तो मनुष्य काना (एक आँख वाला) होता है। एवं कर्क राशि में स्थित सूर्य सप्तम भाव में बैठे हुए भौम को देखता हो तो भी जातक काण (एकाक्ष) होता है। यदि नवमेश मेष, सिंह वा मकर में बैठा हो तो भी उपरोक्त दोनों योग होते हैं अन्यथा नहीं ॥ २८ ॥

अन्योन्यं पश्यतश्चेत्तरणिहिमकरौ तत्तनूजौ मिथो वा
भूसूनुः पश्यतीनं समभवनगतं त्वङ्गचन्द्रौ यदौजे ।

ओजर्क्षे युग्मराशौ हिमकरशशिजौ भूसुतेनेक्षितौ चेत्
पुंराशौ लग्नशुक्रौ तदनु हिमकरः क्लीबयोगाः षडेते ॥२९॥

अन्वयः—ओजर्क्षे युग्मराशौ तरणिहिमकरौ चेदन्योन्यं पश्यतः, तत्तनूजौ वा (ओजराशिगौ) मिथो पश्यत , समभवनगतमिनं (विषमराशिगः) भूसूनुः पश्यति, यदाङ्गचन्द्रौ ओजे (भौमेन दृष्टौ), हिमकरशशिजौ ओजर्क्षे युग्मराशौ चेत् भूसुतेनेक्षितौ पुंराशौ लग्नशुक्रौ तदनु हिमकरश्च एते षट् क्लीबयोगाः स्युः ॥ २६ ॥

सूर्यचन्द्रौ ओजर्क्षे युग्मराशौ इत्याकृष्यान्वयः। अन्योन्यं परस्परं पश्यतः ओजराशिगः सूर्यः समराशिगं चन्द्रं पश्यति तादृशश्चन्द्रः सूर्यं पश्यति अयमेको योगः। तत्तनुजौ शनिबुधौ ओजराशिगावन्योन्यं पश्यतः द्वितीयो योगः समराशिगं सूर्यं भौमो विषमराशिग इत्यर्थात् सिद्धं भौमं च सूर्यः अन्योन्यं पश्यतः इति तृतीयो योगः। लग्नचन्द्रौ विषमराशिगौ भौमेन अर्थात् समराशिगेन दृष्टाविति चतुर्थो योगः। चन्द्रबुधौ क्रमेण विषमसमराशिगौ भौमेन वीक्षिताविति पञ्चमो योगः। लग्नशुक्रौ चन्द्रश्च पुराशौ पुरुषग्रहराशिनवांशे स्थिताविति षष्ठो योगः। एते षट् क्लीबयोगा ज्ञेयाः। तदुक्तं सारावल्याम्—

'अन्योन्यं रविचन्द्रौ विषमौ विषमर्क्षगौ निरीक्षेते।
इन्दुजरविपुत्रौ वा तथैव नपुंसकं कुरुतः ॥ १ ॥
वक्रो विषमगतोऽर्कं समगं चैवं परस्परालोकात्।
विषमर्क्षे लग्नेन्दू समराशिगतः कुजो विलोकयति ॥ २ ॥
शशिशशिजौ समविषमे भौमेन निरीक्षितो भवतः।
ओजनवांशकसंस्था लग्नेन्दुसितास्तथैवोक्ताः' ॥ इति ॥ २६ ॥

(१) विषम राशि में सूर्य हो और समराशि में चन्द्रमा हो दोनों परस्पर देखते हों अथवा विषमराशि में चन्द्रमा हों और समराशि

में सूर्य हों और दोनों परस्पर देखते हों, (२) अथवा विषमराशि में बैठा हुआ शनि समराशि में बैठे हुए बुध को या विषमराशि में बैठा बुध समराशि में बैठे हुये शनि को देखता हो। (३) समराशि में बैठे हुए सूर्य को विषम राशि में बैठा हुआ भौम वा समराशि में बैठे हुये भौम को विषमराशि में बैठा हुआ सूर्य देखता हो, (४) लग्न और चन्द्रमा विषम राशि में हों और सम राशि में बैठा हुआ मङ्गल देखता हो, (५) विषम[१] राशि में बैठे हुये चन्द्रमा और सम राशि में बैठे हुये बुध को मङ्गल देखता हो, (६) लग्न, शुक्र और चन्द्रमा ये तीनों पुरुष ग्रह की राशि और नवांश अथवा पुरुष राशि नवांश में पड़े हों तो ये ६ नपुंसक योग होते हैं। इनमें पैदा हुआ बालक नपुंसक होता है ॥ २९ ॥

आयुःस्थानोपयाते धरणिसुतयुते भार्गवे वातकोपा-
त्काव्ये भौमेन युक्ते कुजभवनगते भूमिजा मुष्कवृद्धिः ।
भौमर्क्षे काव्यचन्द्रौ सुरपतिगुरुणा सूर्यजेनाथ दृष्टौ
नूनं स्यान्मानवानां जनुषि कललजा मुष्कवृद्धिर्नितान्तम् ॥ ३० ॥

अन्वयः—धरणिसुतयुते भार्गवे आयुःस्थानोपयाते वातकोपान्मुष्कवृद्धिः स्यात् , भौमेन युक्ते काव्ये कुजभवनगते भूमिजा मुष्कवृद्धिः स्यात् , अथ जनुषि भौमर्क्षे काव्यचन्द्रौ सुरपतिगुरुणा सूर्यजेन दृष्टौ नितान्तं मानवानां नूनं कललजा मुष्कवृद्धिः स्यात् ॥ ३० ॥

भौमयुते शुक्रेऽष्टमस्थे वातकोपान्मुष्कवृद्धिः वृषणवृद्धिः स्यात् । भौमराशिगते भौमयुते शुक्रे भूमिसंसर्गात् वातकोपजा वृषणवृद्धिः स्यात् । येषां मानवानां जन्मसमये भौमराशिस्थौ शुक्रचन्द्रौ गुरुशनिदृष्टौ तेषां कललदोषजा वृषणवृद्धिरतिशयिता स्यात् । कललं शुक्रशोणितमिश्रीभावः ॥ ३० ॥

---

१. यह सारावली से विरुद्ध पड़ता है ।

यदि मङ्गल से युक्त शुक्र लग्न से अष्टम स्थान में बैठा हो तो वायु के प्रकोप से अण्डकोश की वृद्धि होती है। यदि मङ्गल से युक्त शुक्र मंगल की राशि (मेष, वृश्चिक) में बैठा हो तो पृथिवी के संसर्ग से वात प्रकोप से अण्डवृद्धि होती है। जिस मनुष्य के जन्मसमय में शुक्र और चन्द्रमा ये दोनों मंगल की राशि (मेष, वृश्चिक) में बैठे हों और बृहस्पति तथा शनि से देखे जाते हों तो उस मनुष्य की शुक्र और शोणित के दोष से अण्डकोश की वृद्धि होती है ॥ ३० ॥

क्रूरैर्दृष्टे विलग्ने सुविकृतरदनश्चापगो मेषसंज्ञे
खल्वाटः पापलग्ने धनुषि गवि तथालोकिते क्रूरखेटैः।
धर्मार्थान्त्यात्मजस्था यदि खलखचरा बन्धभाक्पूरुषः स्या-
देवं लग्ने क्रिये वा धनुषि गवि तथा रश्मिजं बन्धनं नुः॥३१॥

अन्वयः—चापगो मेषसंज्ञे विलग्ने क्रूरैर्दृष्टे सुविकृतरदनः, धनुषिगवि पापलग्ने तथा क्रूरखेटैः आलोकिते खल्वाटः स्यात्, यदि खलखचरा धर्मान्त्यात्मजस्था पुरुषः बन्धभाक् स्यात्, एवं क्रिये वा धनुषि तथा गवि लग्ने नुः रश्मिजं बन्धनं स्यात् ॥ ३१ ॥

धनुषि वृषे मेषे वा विलग्ने क्रूरैर्दृष्टे विकृतदशनः दन्तरोगी स्यात्। पापलग्ने पापैर्युक्तं लग्नं पापलग्नं तस्मिन् यथा प्रागुक्तयोगेन साङ्कर्यं स्यात्। तस्मात् क्रूरग्रहयुक्ते धनुषि वृषे वा लग्ने क्रूरदृष्टे खल्वाटो खलतिरोगी स्यात्। नवमद्वितीयद्वादशपञ्चमस्थाः क्रूराश्चेत्तदा बन्धभाक् पुरुषः स्यात्। एवं मेषे धनुषि वृषे वा लग्ने क्रूराक्रान्ते नुः पुरुषस्य रश्मिबन्धनं स्यात् ॥ ३१ ॥

धनु, मेष मतान्तरसे वृष, इनमे कोई राशि जन्मलग्न हो उसको पापग्रह देखते हों तो बालक दन्तरोगी होता है। धनु वा वृष जन्मलग्न

हो उसमें पापग्रह बैठे हों और पापग्रह से देखा जाता हो तो मनुष्य खल्वाट होता है (अर्थात् शिरपर बालनहीं होते है) । नवम, द्वितीय, द्वादश, पञ्चम, इन स्थानों में पापग्रह बैठे हों तो मनुष्य बन्धभागी होता है अर्थात् उसे कैद (जेल) भोगना पड़ता है । ऐसे ही मेष, धनु वा वृष जन्मलग्न में पापग्रह बैठा हो तो मनुष्य को रस्सी से बन्धन होता है॥३१॥

दुर्गन्धिर्दानवेज्ये शनिभवनगते मानवो विग्रहे स्याद्
द्वेष्याधीशे बुधर्क्षे तदनु मकरगे तद्वदत्राथ काव्ये ।
केन्द्रस्थे तेन युक्स्यादथ कविरविजौ स्वयिहद्दायुतौ चे-
त्तद्वच्चन्द्रेऽजयाते तनुसदनगते चानने स्याद्विगन्धिः ॥३२॥

अन्वयः—दानवेज्ये शनिभवनगते मानवो विग्रहे दुर्गन्धिः स्यात्, द्वेष्याधीशे बुधर्क्षेतदनु मकरगे तद्वत्, अथकाव्ये (बुधर्क्षे) तेनयुक् केन्द्रस्थे तद्वत्, चेत्कविरविजौ स्वीयहद्दायुतौतद्वत्, तनुसदनगते चन्द्रेऽजयाते आनने विगन्धिः स्यात् ॥ ३२ ॥

शुक्रे शनिराशिस्थे जातो मानवो विग्रहे शरीरे दुर्गन्धिः स्यात् । षष्ठाधिपे मिथुनकन्यामकरगे तद्वद्विग्रहे दुर्गन्धिः । अथ काव्ये शुक्रे बुधर्क्षे तेन बुधेन युक्ते केन्द्रगे सति तद्वद्विग्रहे दुर्गन्धिः । अथ शुक्रशनी स्वीयहद्दायुतौ स्वात्रिंशांशगौ चेत्तद्व द्विग्रहे दुर्गन्धिः । अत्र शब्दोऽनुरोधात्त्रिंशांशो हद्दाशब्देनोपलक्षितः । मेषस्थे चन्द्रे लग्नगते मुखे दुर्गन्धिः स्यात् ॥ ३२ ॥

(१) शुक्र, शनि की राशि (मकर-कुम्भ) में हो तो मनुष्य के शरीर में दुर्गन्धि (बदबू) होती है । (२) छठें भाव का स्वामी यदि बुध की राशि (मिथुन-कन्या) और मकर राशि में बैठा हो तो भी मनुष्य के शरीर में दुर्गन्धि (बदबू) होती है । (३) शुक्र बुध की राशि में होकर केन्द्र में पड़ा हो और बुध से देखा जाता हो तो शरीर में दुर्गन्धि होती

है। (४) शुक्र शनि ये दोनों अपने २ हद्दा (त्रिंशांश) में पड़े हों तो भी शरीर दुर्गन्धियुक्त होती है। एवं यदि चन्द्रमा मेष राशि का होकर लग्न में पड़ा हो तो मनुष्य के मुख में दुर्गन्धि होती है॥ ३२॥

अथ योगादृशां सुविचार्यैव कर्तव्यमित्युपजातिकयाह—

एवं ग्रहाणां सदसत्फलानां
योगाद् ग्रहज्ञैरनुयोजनीयम्।
शुभाशुभं जन्मनि मानवानां
फलं सुमत्या प्रविचार्य नूनम्॥ ३३॥

अन्वयः—जन्मनि सदसत्फलानां ग्रहाणां योगाद् मानवानां शुभाशुभं फलं सुमत्या प्रविचार्य नूनं ग्रहज्ञैः अनुयोजनीयम्॥ ३३॥

ग्रहज्ञैर्ग्रहाणां दीप्तदीनादिज्ञानवाद्भिः मानवानां जन्मनि शुभाशुभफलं सुमत्या ग्रहलग्नज्ञानसंस्कृतया बुद्धया विचार्य निश्चयेन वक्तव्यम्। तथोक्तं मृत्युलग्ने—

दशभेदं ग्रहगणितं जातकमवलोक्य विशेषमपि यः।
कथयति शुभमशुभं वा तस्य न मिथ्या भवेद्वाणी॥ १॥

तथा च प्रदर्शितं नीलकण्ठदैवज्ञैः—

स्वोच्चे दीप्तः समाख्यातो नीचे दीनः प्रकीर्तितः।
मुदितो मित्रगेहस्थः स्वस्थश्च स्वगृहे ग्रहः॥
शत्रुगृहे स्मृतः सुप्तो जितोऽन्यैश्च निपीडितः।
नीचाभिमुखगो यस्तु ग्रहः खिन्नस्तु स स्मृतः॥
सुवीर्यः कथितः प्राज्ञैः स्वोच्चाभिमुखगो ग्रहः।
अधिवीर्यो निगदितः सुरश्मिः शुभवर्गगः॥ ३३॥

---

(१) फलान्यपि तत्रैव—
दीप्ते सिद्धिश्च कार्याणां दाने दुःखसमागमः।
स्वस्थे कीर्तिस्तथा लक्ष्मीरानन्दो मुदिते महान्॥

जन्म समय में शुभाशुभ फल देने वाले ग्रहों के योगों से मनुष्यों के शुभाशुभफल को अपनी बुद्धि से विचार कर ज्यौतिषी को फल कहना चाहिये ॥ ३३ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषे
ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।
योगाध्यायः श्रीगणेशेन वर्यै-
र्वृत्तैर्युक्तो रामरामैः प्रणीतः ॥ ३४ ॥

अन्वयः—श्रीगणेशेनवर्यैः हृद्यैः पद्यैर्गुम्फिते सूरितोषे मञ्जुलेऽस्मिन् अलङ्काराख्ये जातके रामरामैर्वृत्तैर्युक्तो योगाध्यायः प्रणीतः ॥ ३४ ॥

अध्याय समापयति रामरामैस्त्रयस्त्रिंशद्भिः । शेषं सुगमम् ॥३४॥

इति जातकालङ्कारटीकायां योगाध्यायस्तृतीयः ॥ ३ ॥

गणेश दैवज्ञ ने मनोरम पद्यो (श्लोको) से बने हुए पण्डितों को प्रसन्न करने वाले इस मनोहर जातकालङ्कार में ३३ श्लोकों में इस योगाध्याय को बनाया ॥ ३४ ॥

इति श्रीजातकालंकारे भाषा टीकायां योगाध्यायस्तृतीयः समाप्तः ॥ ३ ॥

सुप्ते रिपुभयं दुःखं धनहानिर्निपीडिते ।
मुषिते परिहीने च कार्यनाशोऽर्थसंक्षयः ॥
गजाश्वकनकावाप्तिः सुवीर्ये रत्नसम्पदः ।
अधिवीर्ये सस्यलब्धिर्ग्रहैर्मित्रार्थसंगमः ॥ इति ॥

विषकन्यायोगाध्यायः ४ ।

अथ त्रिभिः पद्यैर्विशेषतो विषकन्यायोगानाह—

भौजङ्गे कृत्तिकायां शतभिषजि तथा सूर्यमन्दारवारे
भद्रासंज्ञे तिथौ या किल जननमियात्सा कुमारी विषाख्या ।
लग्नस्थौ सौम्यखेटावशुभगगनगश्चैक आस्ते ततो द्वौ
वैरिक्षेत्रानुयातौ यदि जनुषि तदा सा कुमारी विषाख्या ॥१॥

अन्वयः—भौजङ्गे कृत्तिकायां शतभिषजि तथा सूर्यमन्दारवारे भद्रासंज्ञे तिथौ या कुमारी किलजननमियात् सा विषाख्या । यदि जनुषि सौम्यखेटौ लग्नस्थौ एकोऽशुभः गगनगः आस्ते ततो द्वौ (पापौ) वैरिक्षेत्रानुयातौ तदा सा कुमारी विषाख्या ॥ १ ॥

अश्लेषायां कृत्तिकायां तथा शततारकासु नक्षत्रेषु रविशनिभौमवारेषु भद्रासंज्ञके तिथौ द्वितीयासप्तमीद्वादशीसंज्ञकतिथौ या कन्या जननमियात् जन्म प्राप्नुयात् सा विषाख्या विषकन्या भवति । अथ नक्षत्रवारतिथीनां प्रत्येकं क्रमेण योगः । यथा आश्लेषा रविर्द्वितीया प्रथमो योगः । कृत्तिका शनिः सप्तमी द्वितीयो योगः । शततारका भौमो द्वादशी तृतीयो योगः । एषु योगेषु जाता कन्या विषाख्येत्यर्थः । द्वौ शुभग्रहौ लग्नगौ एकः पापो दशमस्थः द्वौ पापौ शत्रुभावास्थितौ यदि तत्र कन्या जायते तदा सा विषकन्या ॥ १ ॥

आश्लेषा, कृत्तिका, शतभिषा नक्षत्रों में सूर्य, शनि, मङ्गल इन वारों में भद्रा संज्ञक (२ । ७ । १२) तिथि में जिस कुमारी का जन्म हो वह विषकन्या होती है । अर्थात् ।

(१) आश्लेषा नक्षत्र, रविवार, द्वितीया तिथि, एक योग ।

(२) कृत्तिका नक्षत्र, शनिवार, सप्तमी तिथि दूसरा योग।

(३) शभिषक नक्षत्र, मङ्गलवार, द्वादशी तिथि, तीसरा योग उपरोक्त तीनों योगों में से किसी योग में यदि कन्या हो तो वह विषकन्या होती है।

यदि जन्मसमय में दो शुभ ग्रह लग्न में एक पापग्रह दशम भाव में तथा दो पापग्रह छठें भाव में बैठे हों तो वह कन्या विषकन्या होती है ॥ १ ॥

अथ क्रमेणापि नक्षत्रतिथिवारयोगानाह—

मन्दाश्लेषा द्वितीया यदि तदनु कुजे सप्तमी वारुणर्क्षे
द्वादश्यां च द्विदैवं दिनमणिदिवसे यज्जनिः सा विषाख्या।
धर्मस्थो भूमिसूनुस्तनुसदनगतः सूर्यसूनुस्तदानीं
मार्तण्डः सूनुयातो यदि जनिसमये सा कुमारी विषाख्या ॥२॥

अन्वयः—यदि मन्दाश्लेषा द्वितीया तदनु कुजे सप्तमी वारुणर्क्षे, दिनमणिदिवसे द्वादश्यां द्विदैवं च यज्जनिः सा विषाख्या, यदि जनिसमये भूमिसूनुर्धर्मस्थो सूर्यसूनुस्तनुसदनगतः मार्तण्डः सूनुयातो तदानीं सा कुमारी विषाख्या ॥ २ ॥

अथ शनिवारे आश्लेषा द्वितीया, तदनु कुजवारे शततारका सप्तमी, दिनमणिदिवसे रविवारे विशाखा द्वादशी एषु योगत्रयेषु यस्या जन्म सा विषकन्या भवति। यदि जन्मसमये भौमशनिसूर्याः क्रमेण नवलग्नपञ्चमस्थास्तदा सा कुमारी विषकन्या भवति ॥ २ ॥

(१) शनिवार को आश्लेषा नक्षत्र, द्वितीया तिथि (२) मंगलवार को शतभिष नक्षत्र सप्तमी तिथि (३) रविवार को विशाखा नक्षत्र, द्वादशी तिथि, इन योगों में से किसी योग में जिस कन्या का जन्म हो वह विषकन्या

कहलाती है। अथवा जिस कन्या के जन्मकालिक लग्न से नवम स्थान में भौम, जन्मलग्न में शनि, पञ्चम भाव में सूर्य बैठे हों वह कन्या विषकन्या होती है ॥ २ ॥

अथ विषाख्यभङ्गमाह—

लग्नादिन्दोः शुभो वा यदि मदनपतिर्द्यूनयायी विषाख्या-
दोषं चैवानपत्यं तदनु च नियतं हन्ति वैधव्यदोषम् ।
इत्थं ज्ञेयं ग्रहज्ञैः सुमतिभिरखिलं योगजातं ग्रहाणा-
मार्यैरार्यानुमत्या मतमिह गदितं जातके जातकानाम् ॥३॥

अन्वयः—यदि लग्नाद्वा इन्दोः शुभो वा मदनपतिर्द्यूनयायी विषाख्या दोषमनपत्यञ्चैव तदनु च नियतं वैधव्यदोषं हन्ति, इत्थमिह-जातके जातकानाम् आर्यानुमत्या ग्रहाणां योगजातं मतं आर्यैः सुमतिभिः ग्रहज्ञैः गदितं ज्ञेयम् ॥ ३ ॥

लग्नाच्चन्द्राद्वा मदनपतिः सप्तमपतिः शुभग्रहो वा द्यून-यायी सप्तमस्थः विषाख्यदोषं तत्प्रयुक्तमनपत्यं सन्तानराहि-तत्वं वैधव्यदोषं च हन्ति नाशयति । एवमुक्तप्रकारेण इहा-स्मिन् जातके आर्यानुमत्या दैवज्ञसभ्यानुमतेन जातकानां गदित-मखिलं योगजात ज्ञेयम् । ग्रहाणां स्वभावविशेषाभिज्ञैरेवेदं योगजातं प्रवक्तुं क्षममिति भावः ॥ ३ ॥

जन्मलग्न से अथवा चन्द्रमा से यदि शुभग्रह या सप्तमाधिपति (सप्तमेश) सप्तम भाव में बैठा हो तो विषकन्याकारक दोष अनपत्य दोष (सन्तान-विनाशकारक योग) और वैधव्य दोषों को नाश करता है। इस भाँति इस जातक में माननीय ज्यौतिषियों की अनुमति से कहे गये ग्रहों के सम्बन्ध से उत्पन्न बालकों के शुभाशुभ भोगों को ग्रहों की परिस्थिति को जानने वाले बुद्धिमान् ज्यौतिषी विचार करें ॥ ६ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषे-

ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।

कन्याध्यायः श्रीगणेशेन वर्यै-

र्वृत्तैर्युक्तो वह्निसंख्यैर्विषाख्यः ॥ ४ ॥

अन्वयः—श्रीगणेशेन वर्यैः हृद्यैः पद्यैर्गुम्फिते सूरितोषे मञ्जुलेऽस्मिन्नलङ्काराख्ये जातके वह्निसंख्यैर्वृत्तैर्युक्तो विषाख्यकन्याध्यायः (प्रणीतः) ॥ ४ ॥

अध्यायं समापयति हृद्यैरित्यादिना ॥ ४ ॥

इति श्रीजातकालङ्कारटीकायां विषकन्याध्यायश्चतुर्थः ॥ ४ ॥

गणेश नामक विद्वान ने मनोरम पद्यों से बने हुए पण्डितों को प्रसन्न करने वाले इस जातकालङ्कार नामक पुस्तक में तीन श्लोकों से विषकन्या नामक अध्याय को बनाया ॥ ४ ॥

इति श्रीजातकालङ्कारे भाषाटीकायां विषकन्याध्याय-

श्चतुर्थो समाप्तः ॥ ४ ॥

अथायुर्दायाध्यायः ५ ।

आयुर्मूलं जन्मिनां जीवनं च
ह्याजीवानां निर्जराणां सुधेव ।
एवं प्राहुः पूर्वमाचार्यवर्या-
स्तस्मादायुर्दायमेनं प्रवक्ष्ये ॥ १ ॥

अन्वयः—हि आजीवानां जन्मिनां आयुर्मूलं जीवनं निर्जराणां सुधेव, एवं पूर्वमाचार्य्यवर्या प्राहुः तस्मादेनमायुर्दायं प्रवक्ष्ये ॥ १ ॥

अब आयुर्दायाध्याय कहते है जिस प्रकार देवताओं के लिये अमृत है, उसी प्रकार शरीरधारियों का जीवनमूल आयुर्दाय है । ऐसा प्राचीन आचार्यों ने कहा है । इसलिये आयुर्दायाध्याय को कहते ह ॥ १ ॥

लग्नाधीशोऽतिवीर्यो यदि शुभविहगैरीक्षितः केन्द्रयातै-
र्दद्यादायुः सुदीर्घं गुणगणसहितं श्रीयुतं मानवानाम् ।
सौम्याः केन्द्रालयस्था जनुषि च रजनीनायके स्वीयतुङ्गे
वीर्याढ्ये लग्ननाथे वपुषि च शरदां षष्टिरायुर्नराणाम् ॥२॥

अन्वयः—यदि लग्नाधीशोऽतिवीर्यो केन्द्रयातैर्शुभग्रहैरीक्षितस्तदा मानवानाम् गुणगणसहितं श्रीयुतं सुदीर्घमायुः दद्यात् । जनुषि सौम्याः केन्द्रालयस्थाः रजनीनायके च स्वीयतुङ्गे वीर्याढ्येलग्ननाथे च वपुषि नराणाम् शरदां षष्ठिरायुः स्यात् ॥ २ ॥

लग्नाधीशो लग्नस्वामी केन्द्रयातैः लग्नचतुर्थसप्तमदशमस्थैः

---

१. आयुर्दाय के दो भेद हैं—(१) एक योगज और (२) दूसरा गणितागत उसमें योगज मत के चार भेद होते हैं । (१) पहला अरिष्टज योग, (२) दूसरा परमायु योग, (३) तीसरा नियतायु योग, (४) और चौथा अपरिमितायु योग । इन्हीं चारो भेदों को ग्रन्थकार ने इस अध्यायमें दर्शाया है ।

शुभग्रहैर्दृष्टैः अतिवीर्यैः अधिकतरबलस्तदा जातानां मानावानां गुणगणैः सहितं गुणसमुदायैर्युतं श्रीयुतं लक्ष्मीयुतं च सुदीर्घमायुः दद्यात् । सौम्याः बुधगुरुशुक्राः स्वक्षेत्रस्थाः चन्द्रे स्वोच्चगे, बलवति लग्नेशे सति जातानां नराणां षष्टिरायुर्वर्षाणां षष्टिरायुः स्यात् ॥ २ ॥

यदि लग्न का स्वामी अत्यन्त बलवान हो और केन्द्र में बैठे हुए शुभग्रहों से देखा जाता हो तो मनुष्य अच्छे २ गुणों से युक्त होकर दीर्घायु होता है। यदि जन्मसमय में शुभग्रह केन्द्र (१।४।७।१०) में हो, चन्द्रमा अपने उच्च में हो, लग्नेश बलवान होकर लग्न में बैठा हो तो उस मनुष्य की ६०वर्ष की आयु होती है ॥ २ ॥

सौम्याः केन्द्रालयस्था वपुषि सुरगुरौ लग्नतो वा सुधांशो-
रायुर्युक्तं न दृष्टं न च गगनगतैः सप्ततिर्वत्सराणाम् ।
याता मूलत्रिकोणे शुभगगनचराः स्वीयतुङ्गे सुरेज्ये
लग्नाधीशेऽतिवीर्ये गगनवसुसमातुल्यमायुर्नराणाम् ॥ ३ ॥

अन्वयः—लग्नतो वा सुधांशोः सौम्याः केन्द्रालयस्था वपुषि सुरगुरौ गगनगतैः (क्रूरैः) आयुर्युक्तं दृष्टं न चेत्तदा वत्सराणाम् सप्ततिः आयु स्यात्, शुभगगनचरा मूलत्रिकोणे याता सुरेज्ये स्वीयतुङ्गे लग्नाधीशेऽतिवीर्ये तदा नराणाम् गगनवसुसमातुल्यमायुः स्यात् ॥ ३ ॥

लग्नाच्चन्द्राद्वा सौम्याः पूर्णचन्द्रबुधगुरुशुक्राः केन्द्रस्थास्तत्रापि गुरौ लग्नगे तत्र दशमस्थैः क्रूरैरायुरष्टमस्थानं दृष्टं युक्तं यदि न भवति तदा वत्सराणां सप्ततिरायुः स्यात् । शुभग्रहा मूलत्रिकोणस्थाः[1] गुरौ स्वोच्चगे लग्नेशे बहुबले सति नराणां

---

१. मूलत्रिकोणस्थानानि वृहज्जातके—

सिंहो वृषः प्रथमषष्ठहयाङ्गतौलिकुम्भास्त्रिकोणभवनानि भवन्ति सूर्यात् ॥ इति ।

सूर्य का सिंह, चन्द्रमा का वृष, मंगल का मेष बुध कन्या, गुरु का धन शुक्र का तुला और शनि का कुम्भ राशि मूलत्रिकोण होता है ।

गगनवसुसंख्यमशीतिवर्षोपलक्षितमायुः स्यात्। एतेषु योगेषु गुणगणयुक्तमित्यनुषञ्जनीयम् ॥ ३ ॥

यदि जन्म लग्न से या जन्मकालिक चन्द्रमा से शुभग्रह केन्द्र (१।४।७।१०) में बैठे हों उसमें भी बृहस्पति लग्न में हो अष्टम भाव दशम में बैठे हुए पापग्रहों से न देखा जाता हो तथा पापग्रहों से युक्त न हो तो मनुष्यों की ७० सत्तर वर्ष की आयु होती है। तथा शुभग्रह अपने मूल त्रिकोण में हों बृहस्पति अपने उच्च राशि में हो लग्नेश अत्यन्त बली हो तो उस मनुष्य की ८० वर्ष की आयु होती है। इन योगों में जन्मा हुआ बालक गुणवान् होता हुआ दीर्घायु होता है ॥ ३ ॥

सौम्ये केन्द्रेऽतिवीर्ये यदि निधनपदं खेटहीनं समाः स्यु-
स्त्रिंशत्सौम्येक्षितं चेद् गगनहिमकरैः संयुताथो स्वभे चेत्।
स्वत्र्यंशे चामरेज्ये मुनिनयनमितं स्वर्क्षगे लग्नगे वा
चन्द्रे द्यूने शुभश्चेद्गगनरसमितं कोणगाः सौम्यखेटाः ॥४॥

अन्वयः-सौम्येऽतिवीर्ये केन्द्रे यदि निधनपदं खेटहीनं त्रिंशत्समाः स्युः, चेत् (निधनपदं) सौम्येक्षितं तदा गगनहिमकरैः संयुता (त्रिंशत्) आयुः स्यात्, अथ अमरेज्ये चेत्स्वभे स्वत्र्यंशे च मुनिनयनमित मायुः स्यात्, चन्द्रे स्वर्क्षगे वा लग्नगे शुभश्चेद्द्यूने गगनरसमितम्, सौम्यखेटाः कोणगाः सुरेज्ये कीटे लग्ने यदि तदा खाष्टतुल्यमायुः भवतीत्यग्रिमेण सम्बन्धः ॥ ४ ॥

सौम्ये बुधेऽतिबले केन्द्रस्थे सति अष्टमपदं खेटहीनं यदि तदा वर्षाणां त्रिंशदायुः स्यात्। निधनं सौम्येक्षितं चेत् गगनहिमकरैर्दशभिः संयुता त्रिंशद्वर्षाणां चत्वारिंशदायुः स्यात्। अथ गुरौ स्वराशौ स्वद्रेष्काणे सति मुनिनयनमितं सप्तविंशद्वर्षाणि आयुः स्यात्। चन्द्रः स्वर्क्षगो लग्नगो वा सप्तमे शुभग्रहश्चेत्तदा

गगनाङ्कमितं षष्टिवर्षमितमायुः स्यात्। शुभग्रहाः पञ्चमनवम-स्थाः कर्कटे लग्ने सुरेज्यो यदि भवति तदा खाष्टतुल्यम-शीतिवर्षतुल्यमायुः स्यादित्यग्रिमश्लोकेनान्वयः ॥ ४ ॥

यदि बुध अत्यन्त बलवान् होकर केन्द्र (१।४।७।१०) में बैठा हो अष्टम-स्थान में कोई ग्रह न हो तो मनुष्य की तीस ३० वर्ष की आयु होती है। यदि अष्टम भाव को शुभ ग्रह देखते हों तो तीस में दश जोड़ने से जो हुआ उतने ही (४० चालीस) वर्ष की आयु होती है। यदि बृहस्पति अपनी राशि (धन या मीन) में वा अपने द्रेष्काण में पड़ा हो तो सत्ताईस २७ वर्ष की, यदि चन्द्रमा अपनी राशि में हो वा लग्न में हो और सप्तम भाव में शुभग्रह हों तो ६० साठ वर्ष की आयु होती है। यदि शुभग्रह त्रिकोण (५।९) में पड़े हों और कर्क लग्न हो उसी में बृहस्पति हो तो ८० अस्सी वर्ष की आयु होती है[1] ॥ ४ ॥

कीटे लग्ने सुरेज्ये यदि भवति तदा खाष्टतुल्यं लयेशो
धर्मेऽङ्के चाङ्गनाथे निधनभवनगे क्रूरदृष्टेऽब्धिहस्ताः ।
लग्नाधीशाष्टनाथौ लयभवनगतौ सप्तविंशद्विलग्ने
क्रूरेज्यौ चन्द्रदृष्टौ यदि निधनगतः कश्चनास्ते द्विपक्षाः ॥५॥

अन्वयः–यदि लयेशोधर्मेऽङ्केक्रूरदृष्टेऽङ्गनाथे निधनभवनगेऽब्धिहस्ताः, लग्नाधीशाष्टनाथौ लयभवनगतौ सप्तविंशत्, क्रूरेज्यौ चन्द्रदृष्टौ विलग्ने यदि कश्चन निधनगतः आस्ते तदा द्विपक्षाः ॥ ५ ॥

अष्टमेशो नवमे भावे लग्नेशे क्रूरदृष्टे अष्टमगते अब्धिहस्ता-श्चतुर्विंशतिरायुः स्यात् लग्नाष्टमेशौ अष्टमस्थौ यदि तदा सप्तविंशतिवर्षाण्यायुः । क्रूरसंयुतो गुरुः चन्द्रदृष्टो लग्ने यदि

---

१. इसका आगे के श्लोक से सम्बन्ध है ।

अन्यः कश्चिद्ग्रहः अष्टमस्थः तदा द्विपक्षा द्वाविंशतिरायुः स्यात् ॥ ५ ॥

यदि अष्टम भाव का स्वामी नवम स्थान में हो तथा पापग्रह से देखा जाता हुआ लग्नेश अष्टम भाव में बैठा हो तो २४ चौबीस वर्ष की आयु होती है। यदि लग्नाधीश और अष्टमेश दोनों अष्टम भाव में स्थित हों तो सत्ताइस २७ वर्ष की आयु होती है। तथा पापग्रह और बृहस्पति लग्न में हो और चन्द्रमा इनको देखता हो तथा अष्टम भाव मे कोई ग्रह बैठा हो तो २२ वर्ष की आयु होती है ॥ ५ ॥

लग्नेन्दू क्रूरहीनौ वपुषि सुरगुरौ रन्ध्रभं खेटहीनं
केन्द्रे सौम्ये खशैलाः सितविबुधगुरू स्याच्छतं केन्द्रगौ चेत्।
वागीशे कर्कलग्ने शतमिह भृगुजे केन्द्रगेऽथार्कसूनौ
धर्माङ्गस्थे सुधांशौ व्ययनवमगते हायनानां शतं स्यात् ॥६॥

अन्वयः—लग्नेन्दूक्रूरहीनौ सुरगुरौ वपुषि रन्ध्रभं खेटहीनं केन्द्रे सौम्ये खशैलाः, सितविबुधगुरू चेत्केन्द्रगौ शतं स्यात्, कर्कलग्ने वागीशे, भृगुजे केन्द्रगे इह शतमायुः, अथार्कसूनौ धर्माङ्गस्थे सुधांशौ व्ययनवमगते हायनानां शतमायुः स्यात् ॥ ६ ॥

लग्नचन्द्रौ क्रूरग्रहयोगरहितौ, लग्ने गुरौ, अष्टमं ग्रहरहितं केन्द्रे शुभग्रहे यदि तदा खशैलाः सप्ततिः। शुक्रबृहस्पती केन्द्रगौ चेत् शतं वर्षाणि। गुरौ कर्कलग्ने, भृगुजे केन्द्रगे च शतं वर्षाणि। एते विशिष्टयोगा इत्यर्थः। योगस्य वैशिष्ट्यं यशः—सम्पत्सूचकमिति भावः। अथ शनौ नवमगे लग्नस्थे वा चन्द्रे व्ययनवमगते वर्षाणां शतमायुः स्यात् ॥ ६ ॥

यदि लग्न और चन्द्रमा किसी पापग्रह से युक्त न हों, लग्न में बृहस्पति हो, अष्टम भवन में कोई ग्रह न हो, केन्द्र (१।४।७।१०) में शुभग्रह

हों तो ७० वर्ष की आयु होती है। तथा यदि शुक्र और बृहस्पति केन्द्र (१।४।७।१०) में हों तो सौ वर्ष एवं बृहस्पति कर्क लग्न मे शुक्र केन्द्र (१।४।७ १०) में हों तो भी सौ वर्ष की आयु होती है। यदि शनैश्चर नवमभाव में या लग्न में हो और चन्द्रमा द्वादश वा नवमभाव में हो तो भी सौ वर्ष की आयु होती है ॥ ६ ॥

धीकेन्द्रायुर्नवस्था यदि खलखचरा नो गुरोर्भे विलग्ने
केन्द्रे काव्ये गुरौ वा शुभमपि निधनं सौम्यदृष्टे शतं स्यात्।
लग्नादिन्दोर्न खेटा यदि निधनगता वीर्यभाजौ सितेज्यौ
पूर्णायुः स्वीयराशौ शुभगगनचराः षष्टिरङ्गोच्चगेऽब्जे ॥७॥

अन्वयः–यदि खलखचरा धीकेन्द्रायुर्नवस्थागुरोर्भे विलग्ने केन्द्रे-काव्ये वा गुरौ शुभमपि निधनं सौम्यदृष्टं तदा शतं स्यात्, लग्नादिन्दो-र्यदि निधनगता खेटा न सितेज्यौ वीर्यभाजौ तदा पूर्णायुः, शुभगगन-चरा स्वीयराशौ अब्जेऽङ्गोच्चगे षष्टिः आयुः स्यात् ॥ ७ ॥

क्रूरग्रहाः पञ्चमकेन्द्राष्टमनवमस्थाः नो भवेयुः धनुर्मीने लग्ने केन्द्रे शुक्रे गुरौ वा, नवमाष्टमं च शुभग्रहावलोकितं यदि तदा शत वर्षाणामायुः स्यात्। लग्नाच्चन्द्राच्च ग्रहा अष्टमस्था न स्युः शुक्रगुरू बलवन्तौ तदा पूर्णायुः व्योमार्क १२० वर्षायुः स्यात्। शुभग्रहाः स्वराशिस्थाः वृषे लग्ने वा चन्द्रे सति वर्षाणां षष्टिरायुः स्यात् ॥ ७ ॥

यदि पाँचवें भाव में केन्द्र में (१।४।७।१०) आठवें और नवें भाव में कोई पापग्रह न हो तथा धनु अथवा मीन राशि लग्न में जन्म हो, केन्द्र में शुक्र अथवा बृहस्पति बैठे हो, नवम अष्टम स्थान शुभग्रह से देखा जाता हो तो सौ वर्ष की आयु होती है। यदि लग्न से और चन्द्रमा से अष्टम भाव में कोई ग्रह न पड़ा हो और बृहस्पति शुक्र बलवान् हों तो

पूर्णायु (१२०) होती है। यदि शुभग्रह अपनी २ राशि में पडे हों वृष लग्न में चन्द्रमा हो तो साठ वर्ष की आयु होती है ॥ ७ ॥

कोदण्डान्त्यार्धमंगं यदि सकलखगाः स्वोच्चगा ज्ञजिनांशै-
र्गोस्थे पूर्णे च केन्द्रे सुरपतिभृगुजौ लाभगेऽब्जे परायुः।
शुक्रे मीने तनुस्थे निधनगृहगते सौम्यदृष्टे सुधांशौ
जीवे केन्द्रे शतं स्यादथ तनुगृहपे छिद्रगे पुष्करेऽब्जे ॥८॥

अन्वयः—यदि कोदण्डात्यार्द्धमङ्गं सकलखगाः स्वोच्चगाजिनांशै-र्ज्ञे गोस्थेपूर्णे, सुरपतिभृगुजौ केन्द्रे अब्जे लग्नगे च परायुः, शुक्रे मीने-तनुंस्थ सौम्यदृष्ट सुधांशौ निधनगृहगते जीवे केन्द्रे शतं स्यात्, अथतनु-गृहपे छिद्रगे अब्जे पुष्करे वागीशवीर्ययुक्ते सर्वखेटाः नवमभवनगाः शतायु स्यादित्यग्रिमश्लोकेनान्वयः ॥ ८ ॥

कोदण्डस्यान्त्यार्धलग्ने धनुर्लग्नाद्वितीयहोरायां बुधे जिनांशैर्वृषस्थे अन्ये सर्वे ग्रहाः स्वोच्चगाः तदा पूर्णमायुः स्यात्। गुरुशुक्रौ केन्द्रे सति लाभगे चन्द्रे परायुः पूर्णायुः शुक्रे मीनलग्नगे सौम्यग्रहदृष्टे चन्द्रे अष्टमस्थे, गुरौ केन्द्रे सति वर्षाणां शतमायुः स्यात्। अथवा तनुगृहपे इत्यग्रिमश्लोकेनान्वयः ॥ ८ ॥

यदि लग्न में धनुराशि की द्वितीय होरा हो बुध २४ अंश का होकर वृष में हो और समस्त ग्रह अपने २ उच्चराशि[1] में हों तो पूर्ण आयु होती है। अथवा बृहस्पति और शुक्र केन्द्र में हों, चन्द्रमा लाभ (११) स्थान में हो तो भी पूर्णायु होती है। मीनलग्न में जन्म हो उसी में शुक्र हो अष्टम स्थान में चन्द्रमा शुभग्रह से देखा जाता हो बृहस्पति केन्द्र (१।

---

१. सर्वे ग्रहाःस्व स्वोच्चगा न भवितुमर्हन्ति।
किन्त्विहाचार्येण पूर्वाचार्याऽनुरोधादिहेतादृशी स्थितिरुक्तेति।

४।७।१०) में हो तो सौ वर्ष की आयुर्दाय जानना। यदि जन्म लग्न का स्वामी अष्टम भाव में, चन्द्रमा दशम भाव[1] में हों॥ ८॥

वागीशे वीर्ययुक्ते नवमभवनगाः सर्वखेटाः शतायुः
कर्केऽङ्के जीवचन्द्रौ सहजरिपुभवे सत्कविज्ञौ च केन्द्रे।
केन्द्रे सूर्यारमन्दा गुरुनवलवगा वाक्पतौ लग्नयाते
व्यष्टस्थानेषु शेषाः शरगजतुलितं स्यान्नराणां तदायुः॥९॥

अन्वयः—कर्केऽङ्के जीवचन्द्रौ सहजरिपुभवे सत्कविज्ञौ च केन्द्रे तदा शतमायुः स्यात्, सूर्यारमन्दा गुरुनवलवगाः केन्द्रे वाक्पतौ-लग्नयाते शेषाः व्यष्टस्थानेषु तदा नराणां शरगजतुलितमायुः स्यात्॥९॥

लग्नपेऽष्टमस्थे चन्द्रे दशमस्थे गुरौ बलवति अन्ये ग्रहाः नवमभवनगाः तदा शतायुः। कर्के लग्ने चन्द्रजीवौ तृतीयषष्ठै-कादशे शुभग्रहयुक्तौ शुक्रबुधौ च केन्द्रे यदि तदापि शतायुः। शतायुरिति देहलीदीपकन्यायेनोभयत्रान्वेति। रविभौमशनयः गुरुनवमांशस्थाः केन्द्रे स्युः, लग्नस्थे गुरौ, शेषाः अष्टमरहित-भावस्थाः तदा नाराणां शरगजतुलितं पंचाशीतिवर्षमितमायुः स्यात्॥ ६॥

तथा बृहस्पति बलवान् हो शेष सब ग्रह नवम भाव में स्थित हों तो सौ (१००) वर्ष की आयु होती है। यदि कर्क राशि जन्मलग्न हो चन्द्रमा, बृहस्पति, तृतीय, षष्ठ, एकादश भाव में स्थित हों, बुध और शुक्र केन्द्र में पड़े हों तो भी (१००) वर्ष की आयु होती है। यदि रवि, मंगल और शनैश्चर बृहस्पति के नवांश में स्थित होकर केन्द्र में पड़े हों बृहस्पति जन्म लग्न में हो, शेष सब ग्रह अष्टम भाव को छोड़ दूसरे भावों में पड़े हों तो (८५) पचासी वर्ष की आयु होती है॥ ९॥

---

१. इसका सम्बन्ध आगे के श्लोक से है।

क्रूराः सौम्यांशयाता उपचयगृहगाः कातराः कण्टकस्थाः
सौम्या व्योमार्कसंख्यं यदि तनुपकुजौ रन्ध्रगौ नो परायुः।
केन्द्रे लग्नेशजीवौ नवसुतनिधने कण्टके नो खलाख्याः
संपूर्णं पापखेटा यदि गुरुजलगा जीवभावे च सौम्याः॥१०॥

अन्वयः—सौम्यांशयाता क्रूराः उपचयगृहगाः कातराः स्युः, सौम्याः कण्टकस्थास्तदा व्योमार्कसंख्यं, यदि तनुपकुजौ रन्ध्रगौ नो परायुः, लग्नेशजीवौ केन्द्रे खलाख्याः नवसुतनिधने कण्टके न स्युस्तदासंपूर्णं, यदि पापखेटा गुरुजलगा सौम्याः जीवभावे चेत्यग्रिमेण सम्बन्धः स्यात् ॥ १० ॥

शुभग्रहनवांशस्थाः क्रूराः उपचयस्थाः त्रिषट्दशमायस्थाः कातरा भीरवः युद्धे पराजिता इति यावत् शुभग्रहाः कंटकस्थाः केन्द्रस्थाः तदा व्योमार्कसंख्यं विंशदधिकं शतं वर्षाणि आयुः परायुः स्यात्। परायुयोगेषु लग्नेशकुजौ अष्टमस्थौ चेत्तदा नो परायुः परायुर्न भवतीत्यर्थः। लग्नेशगुरू केन्द्रस्थौ क्रूरास्त्रिकोणाष्टमकेन्द्रवर्जिताश्चेत्तदा पूर्णायुः स्यात्। क्रूरग्रहाः गुरुजलगा नवमचतुर्थगाः, शुभाः जीवनवांशस्थाः यद्वा समराशिनवांशस्थाः सन्तः व्ययधनगृहगाः शुभाः, पूर्णचन्द्रः लग्नस्थः इह योगे जातानां शतं वर्षाण्यायुः कथंभूतं इन्दिरामन्दिरं संपदा सहितमिति अग्रिमश्लोकपूर्वार्धेन सम्बन्धः ॥ १० ॥

यदि पापग्रह उपचयभवन [३।६।१०।११] में शुभग्रह के नवांश में हों तथा ग्रह युद्ध में पराजित हो, और शुभग्रह केन्द्र में हो

१. भौमादिक ग्रहों के युद्ध में जो ग्रह आकाश में दक्षिण तरफ रहने वाला रूक्षकान्ति वाला, छोटे बिम्ब वाला हो वह दूसरे ग्रहों से आकाश में पराजित कहे जाते हैं। जैसा कि वराहमिहिराचार्य ने कहा है।

तो १२० वर्ष की आयु होती है। यदि उपरोक्त परमायुयोग में लग्नेश और मङ्गल अष्टम स्थान में हो तो परमायु योग नहीं होता है। यदि लग्नश का स्वामी और बृहस्पति केन्द्र १।४।७।१० में बैठे हों तथा पापगृह पञ्चम, अष्टम, नवम और केन्द्र (१।४।७।१०) में नहीं हो तो परमायु (१२०) होती है। यदि पापग्रह नववें चौथे भवन में स्थित हों तथा शुभग्रह बृहस्पति के नवांश में पड़े हों ॥ १० ॥

युग्मर्क्षांशे गता वा व्ययधनगृहगाश्चेच्छुभाः शीतभानुः
संपूर्णो लग्नयायी शतमिह जनिनामिन्दिरामन्दिरं स्यात् ।
लग्नेशे सौम्ययुक्ते वपुषि च लयपे रन्ध्रगे नान्यदृष्टे
विंशत्केन्द्रे लयेशे बलवियुजि तथा लग्नपे त्रिंशदायुः ॥ ११ ॥

अन्वयः—यदि पापखेटा गुरुजलगा सौम्याः जीवभाव वा (इति पूर्वश्लोकेन सम्बन्धः) युग्मर्क्षांशे गताः (सन्तः) व्ययधनगृहगाः सम्पूर्णो शीतभानुः लग्नयायी इह जनिनामिन्दिरा मन्दिरं शतमायुः स्यात् सौम्ययुक्तेलग्नेशे वपुषि लयपेरन्ध्रगे नान्यदृष्टे विंशत्, बलवियुजि लयेशे तथा लग्नपे केन्द्रेत्रिंशदायुः स्यात् ॥ ११ ॥

शुभग्रहयुक्ते लग्नेशे लग्ने अन्यग्रहैर्न दृष्टेऽष्टमेशेऽष्टमगते सति वर्षाणां विंशतिरायुः स्यात्। अष्टमेशे लग्नेशे च केन्द्रस्थे बलरहिते च सति त्रिंशद्वर्षाण्यायुः स्यात् ॥ ११ ॥

यदि पापग्रह नवें और चौथे भाव में हों और शुभग्रह बृहस्पति के नवांश में अथवा सम राशि नवांश में होकर द्वादश अथवा द्वितीय भाव में हो और पूर्ण चन्द्रमा लग्न में हो तो जातक सर्व सम्पत्तियों से युक्त १०० वर्ष की आयु वाला होता है, यदि लग्न का स्वामी शुभग्रह से युक्त

दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य सन्निवृत्ताणुः । अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः ॥ इति ॥

होकर लग्न में हो तथा अन्य ग्रहों की दृष्टि से रहित अष्टमेश अष्टम भाव में स्थित हो तो बीस वर्ष तथा निर्बल अष्टमेश और लग्नेश केन्द्र (१।४।७।१०) में बैठा हो तो २० वर्ष की आयु जानना ॥ ११ ॥

इन्द्रावापोक्लिमस्थे तदनु तनुपतौ निर्बलं पापदृष्टे
दन्तैस्तुल्यं ततोऽर्कः खलखगविवरे लग्नगोऽब्जत्रिसंख्यम् ।
रिःफे केन्द्रे सुरेज्ये गुरुरिपुसहजे स्यात्सपापेऽङ्गनाथे
रामाब्दं कर्कलग्ने कुजतुहिनकरौ केन्द्ररन्ध्रं ग्रहोनम् ॥१२॥

अन्वयः—निर्बले इन्दौ तदनु तनुपतौ आपोक्लिमस्थे पापदृष्टे दन्तैस्तुल्यं, ततो खलखगविवरे लग्नगोऽर्कः अब्जत्रिसंख्यम् , सुरेज्ये रिःफे केन्द्र सपापेऽङ्गनाथे गुरुरिपुसहजे रामाब्दं स्यात्, कुजतुहिनकरौ कर्कलग्न केन्द्ररन्ध्रं ग्रहोनम् रामाब्दमायुः स्यादित्यग्रिमेण सम्बन्धः ॥ १२ ॥

चन्द्रे आपोक्लिमस्थे तृतीयषष्ठनवमद्वादशगते, तनुपतौ लग्नेशे आपोक्लिमस्थे उभये निर्बलं क्रूरदृष्टे च सति दन्तैस्तुल्यं द्वात्रिंशद्वर्षाण्यायुः स्यात् । क्रूरग्रहयोरन्तरे लग्नगोऽर्कश्चेत्तदाऽब्जत्रिसंख्यमेकत्रिंशद्वर्षाण्यायुः । गुरौ द्वादशे केन्द्रे वा सपापे लग्ननाथे नवमषष्ठतृतीये सति रामाब्दं त्रीणि वर्षाण्यायुः । कर्कलग्ने चन्द्रभौमौ, केन्द्राणि अष्टमभवनं च ग्रहरहितं यदि तदा रामाब्दं स्यादिति अग्रिमस्थेनान्वयः ॥ २ ॥

यदि निर्बल चन्द्रमा और लग्न के स्वामी ये दोनों पापग्रह से देखे जाते हुए आपोक्लिम (३।६।९।१२) में हों तो ३२ वर्ष की आयु होती है, पापग्रहों के बीच में होकर सूर्य लग्न में हो तो एकतीस ३१ वर्ष की आयु होती है। बृहस्पति केन्द्र (१।४।७।१०) अथवा द्वादश भाव में हो तथा पापग्रह से युक्त लग्नेश (९।६।३) इन भावों में हो तो तीन वर्ष की आयु

होती है यदि कर्कलग्न में चन्द्रमा और मंगल हो तथा केन्द्र (१।४।७।१०) और अष्टम भाव में कोई ग्रह न हो तो ३ वर्ष की आयु होती है ॥ १२ ॥

गमाब्दं स्याल्लयेशे वपुषि च निधनं सौम्यहीनं खवेदा
लग्नेशो रन्ध्रयातो वपुषि निधनपः स्यान्नृणां बाणसंख्यम् ।
नक्रे तिग्मांशुमन्दौ सहजरिपुगतौ कण्टके रन्ध्रनाथे
पारावाराब्धिसंख्यं तदनु शुभखगाःसल्लवर्क्षेऽत्र खाग्निः॥१३॥

अन्वयः—लयेशेवपुषि निधनञ्च सौम्यहीनं खवेदाः, लग्नेशोरन्ध्रयातो निधनपः वपुषिनृणांवाणसंख्यमायुः स्यात्, निग्मांशुमन्दौ नक्रे सहजरिपुगतौ रन्ध्रनाथे कण्टके पारावाराब्धिसंख्यमायुःस्यात्, तदनुशुभखगाः सल्लवर्क्षेऽन्त्रखाग्निः स्यात् ॥ १३ ॥

अष्टमेशे लग्नगते, अष्टमभवनं शुभग्रहरहितं खवेदाश्चत्वारिंशद्वर्षाण्यायुः स्यात् । लग्नेशेऽष्टमगेऽष्टमेशे च लग्नयाते नृणां बाणसंख्यं पञ्चवर्षाण्युः स्यात् । मकरस्थौ शनिरवी तृतीयषष्ठगौ अष्टमेशे केन्द्रगे पाराबाराब्धिसंख्यं चतुश्चत्वारिंशद्वर्षाण्यायुः स्यात् । तदनु शुभग्रहाः सल्लवर्क्षे शुभग्रहनवांशे राशौ वाऽत्र त्रिंशद्वर्षाण्यायुः स्यात् ॥ १३ ॥

यदि अष्टमेश लग्न में हो, अष्टम भाव में कोई शुभग्रह न हो तो ४० चालीस वर्ष की आयु होती है। तथा लग्नेश अष्टम भाव में और अष्टमेश लग्न में बैठा हो तो जातक की पाँच वर्ष की आयु होती है। यदि शनि और सूर्य मकरराशि मे होकर तृतीय अथवा षष्ठ भाव मे हो, अष्टमेश केन्द्र मे हो तो चौवालीस ४४ वर्ष की आयु होती है। यदि शुभग्रह, शुभग्रह के नवांश मे अथवा राशि मे हो तो तीस वर्ष की आयु जानना॥१३॥

---

१. इसका सम्बन्ध अग्रिम श्लोक से है।

क्रूरैर्दृष्टेऽङ्गनाथे यदि शुभविहगा वीर्यवन्तः सुधांशौ
संस्थे सौम्ये गणे चेद्गुणमुनितुलितं रन्ध्रगैर्मध्यमायुः ।
स्याच्चन्द्रादह्नि पापैरथ तपनसुते द्व्यङ्गलग्ने हि याते
रिःफेशे रन्ध्रनाथे यदि बलरहिते कङ्कपत्राक्षसंख्यम् ॥१४॥

अन्वयः—अङ्गनाथे क्रूरैर्दृष्टे यदि शुभविहगावीर्यवन्तः सुधांशौ सौम्ये गणे संस्थेचेद् गुणमुनितुलितमायुः स्यात् , अन्हि चन्द्राद्रन्ध्रगैः पापैः मध्यमायुः स्यात् , अथ तपनसुते द्यङ्गलग्ने याते यदि रिःफेशे रन्ध्रनाथे बलरहिते हि कङ्कपत्राक्षसंख्यमायुः स्यात् ॥ १४ ॥

लग्नेशे क्रूरदृष्टे शुभग्रहाः बलिनः, चन्द्रे शुभवर्गगे क्वापि भावे स्थिते सति गुणमुनितुलितं त्रिसप्ततिवर्षतुल्यमायुः स्यात् । चन्द्रादष्टमगैः पापैः दिवा जन्मनि मध्यमायुः स्यात् । अथ शनौ द्व्यङ्के द्विस्वभावसंज्ञके लग्ने स्थिते, द्वादशभावनाथे अष्टमनाथे च बलहीने सति कङ्कपत्राक्षिसंज्ञ्यं पंचविंशतिवर्षाण्यायुः स्यात् ॥ १४ ॥

यदि लग्न के स्वामी को पापग्रह देखता हो और शुभग्रह बलवान् हों, चन्द्रमा शुभग्रह के वर्ग में होकर किसी भाव मे हो तो ७३ तिहत्तर वर्ष की आयु जानना। यदि चन्द्रमा से अष्टम भाव में पापग्रह हों और दिन में जन्म हो तो मध्यमायु (३२ वर्ष से ६४ वर्ष के अन्दर) होती है। यदि शनैश्चर द्विस्वभाव (मिथुन, कन्या, धनु, और मीन) लग्न में हो तथा द्वादशेश, अष्टमेश बलहीन हों तो पच्चीस वर्ष की आयु होती है ॥ १४ ॥

कर्केऽङ्के सप्तसप्तौ खलविहगयुते पुष्करस्थे द्विजेशे
केन्द्रे याते सुरेज्ये शरविशिखमितं पुष्करे नीरगे वा ।

सौम्ये पीयूषभानौ व्ययनिधनगते देहगे वा कवीज्या-
वेकर्क्षे व्योमबाणैर्व्ययरिपुनिधने लग्ननाथाढ्यचन्द्रे ॥१५॥

अन्वयः—खलविहगयुते सप्तसप्तौ कर्केऽङ्के द्विजेशपुष्करस्थे सुरेज्येकेन्द्रेयाते शरविशिखमितमायुः स्यात्, सौम्ये पुष्करे वा नीरगे पीयूषभानौव्ययनिधनगते देहगेवा कवीज्यौ-एकर्क्षे व्योमबाणैः स्यात्, लग्ननाथाढ्यचन्द्रेव्ययरिपुनिधने लग्ननाथे शन्यंशे भुजगशरमितमायुः स्यात् ॥ १५ ॥

सूर्ये कर्कलग्ने क्रूरयुते चन्द्रे दशमगे, गुरौ केन्द्रस्थे शरविशिखमितं पञ्चपञ्चाशद्वर्षमितमायुः स्यात्। बुधे दशमे चतुर्थगे वा चन्द्रे व्ययेऽष्टमे लग्ने वा शुक्रगुरु एकराशिगौ क्वापि स्थितौ चेत्तदा व्योमबाणैः समं पञ्चाशद्वर्षमितमायुः स्यात् । लग्नेशयुक्ते चन्द्रे द्वादशषष्ठाष्टमे लग्नेशे शन्यंशे शनिनवांशगे भुजगशरमितं अष्टपञ्चशिन्मितमायुः स्यादित्यग्रिमश्लोकेनान्वयः॥

यदि पापग्रह से युक्त सूर्य कर्क लग्न मे बैठा हो तथा चन्द्रमा दशम भाव में हो, और बृहस्पति केन्द्र में पड़ा हो तो ५५ वर्ष की आयु होती है । यदि बुध दशम अथवा चतुर्थ भाव में हो चन्द्रमा द्वादश, अष्टम वा जन्मलग्न में हो, शुक्र और बृहस्पति एक ही राशि में किसी भाव में पड़े हों तो ५० पचास वर्ष की आयु होती है । तथा लग्नाधीश से युक्त होकर चन्द्रमा द्वादश, षष्ठ, वा अष्टम भाव में हो, लग्नेश शनि के नवांश में हो तो अट्ठावन ५८ वर्ष की आयु होती है ॥ १५ ॥

शन्यंशे लग्ननाथो भुजगशरमितं स्यादथो सौम्यखेटा
रन्ध्रोना देहनाथो व्ययरिपुनिधने पापयुक् षष्टिरायुः ।
राशीशो लग्ननाथो दिनमणिसहितो मृत्युगे वाक्पतिश्चे-
न्नोकेन्द्रे षष्टिरायुर्वपुषि दिनपतिः शत्रुभौमान्वितश्चेत् ॥१६॥

अन्वय.—अथ सौम्यखेटा रन्ध्रोना पापयुक् देहनाथो व्ययरिपुनिधने षष्टिरायुः स्यात् दिनमणिसहितो राशीशो लग्ननाथो मृत्युगे, वाक्पतिश्चेत् केन्द्रे न तदा षष्टिरायु. स्यात्, शत्रुभौमान्वितो दिनपतिः चेद्वपुषि वागीशे हीनवीर्ये, यामिनीशे व्ययतनुजगते खशैलेत्यग्रिमेण सम्बन्ध.॥ १८ ॥

शुभग्रहाः अष्टमव्यतिरिक्तभावस्थाः लग्नेशः पापयुक्तः त्रिकस्थस्तदा षष्टिवर्षाण्यायुः स्यात् । सूर्यसहितश्चन्द्रराशीशः लग्नेशश्च मृत्युगः, गुरुः केन्द्रगो न चेत् षष्टिवर्षाण्यायुः स्यात्। निजशत्रुभौमाभ्यां युक्तः सूर्यो लग्ने, गुरौ बलहीने, चन्द्रे व्ययपञ्चमस्थे खशैलाः सप्ततिवर्षाण्यायुः स्यादित्यग्रिम श्लोकेनान्वयः ॥ १६ ॥

यदि शुभग्रह अष्टम स्थान को छोड़ कर अन्य स्थानों में हों तथा पापग्रह से युक्त होकर लग्नेश बारहवें आठवें और छठे भावमें हों तो साठ वर्ष की आयु होती है। तथा सूर्य से युक्त राशि का स्वामी (चन्द्रराशीश) और लग्नेश अष्टम भाव में हों तथा बृहस्पति केन्द्र (१।४।७।१०) में न हो तो भी साठ वर्ष की आयु होती है। अपने शत्रु और मंगल से युक्त सूर्य लग्न में हो वागीश (गुरु) बलहीन हो चन्द्रमा द्वादश या पञ्चम भाव में हो तो सत्तर वर्ष की आयु जाननी चाहिये ॥ १६ ॥

वागीशे हीनवीर्ये व्ययतनुजगते यामिनीशे खशैला
धर्मे सर्वैः परायुः खलखगलवगैः केन्द्रयातैरशीतिः ।
क्रूरैः क्रूरर्क्षयातैः शुभभवनगतैः सौम्यखेटैः सवीर्ये
लग्नेशे स्यात्परायुः सुतभवनगतैः षष्टिरायुर्नराणाम् ॥१७॥

अन्वयः—सर्वैः धर्मे परायुः स्यात्, तथा सर्वैः खलखगलवगैः केन्द्रयातैरशीतिः, क्रूरैः क्रूरर्क्षयातैः सौम्यखेटैः शुभभवनगतैः लग्नेशे सवीर्ये परायुः स्यात् सर्वैः सुतभवनगतैः नराणाम् षष्टिरायुः स्यात्॥ १७॥

सर्वैः ग्रहैः धर्मे नवमे सद्भिः परायुः दीर्घायुः स्यात् खलखगलवर्गैः केन्द्रयातैः सर्वैरशीतिः अशीतिवर्षाण्यायु स्यात्। क्रूरराशिस्थैः क्रूरैः शुभैः शुभगृहगतैः, लग्नपतौ सबले परायुः स्यात्। सुतभवनगतैः सर्वैः नराणां षष्टिवर्षाण्यायु स्यात् ॥ १७ ॥

यदि सब ग्रह नवम भाव में हों तो जातक दीर्घायु होता है। सः ग्रह पापग्रह के नवांश में पडे हों तो अस्सी वर्ष की आयु होती है। यदि पापग्रह, पापग्रह की राशि में तथा शुभग्रह, शुभग्रह की राशि में बैठे हों और लग्नेश बलवान् होकर कहीं पर पडा हो तो परमायु (१२० वर्ष, एवं सम्पूर्ण ग्रह पंचम भाव में पडे हो तो जातक की साठ वर्ष की आयु होती है ॥ १७ ॥

सारङ्गस्यान्त्यभागे यदि वपुषि गते चाद्यभागे च केन्द्रे
सौम्यैः खेटैः शतं स्याद्वसुसहजसुखे स्याच्चिरायुः समस्तैः।
लग्नात्प्रालेयभानोर्निधनसदनपे रिःफकेन्द्रेऽष्टविंश-
केन्द्रेसौम्यग्रहोने यदि मृतिभवने कश्चिदास्ते खरामाः॥१८॥

अन्वयः—यदि वपुषि सारङ्गस्यान्त्यभागे गते सौम्यैः खेटैः केन्द्रे गते च शतं स्यात्, समस्तैः वसुसहजसुखे चिरायुः स्यात्, लग्नात्प्रालेयभानोर्निधन सदनपेरिःफकेन्द्रेऽष्टविंशत्, यदि सौम्यग्रहोने केन्द्रे कश्चिन्मृतिभवने आस्ते तदा खरामाः आयुः स्युः ॥ १८ ॥

धनुर्धरराश्यन्त्यनवांशे लग्नगे शुभैः प्रथमनवांशस्थैः केन्द्रगैवर्षाणां शतमायुः स्यात्। तृतीयचतुर्थाष्टमस्थैः सर्वैश्चिरायुः स्यात्। लग्नाच्चन्द्राच्च अष्टमेशे व्ययकेन्द्रस्थे अष्टाविंशतिवर्षाण्यायुः स्यात्। केन्द्रे शुभग्रहरहितं अष्टमस्थश्चेत्कश्चिद्ग्रहस्तदा खरामास्त्रिंशद्वर्षाण्यायुः स्यात् ॥ १८ ॥

यदि लग्न में धनराशि का अन्तिम नवांश हो तथा प्रथम नवांश में शुभग्रह केन्द्र में हो अर्थात् केन्द्रराशि के पहले नवांश में शुभग्रह हों तो सौ वर्ष की आयु होती है। यदि सब ग्रह तृतीय चतुर्थ अष्टम भाव में हों तो दीर्घायु समझना। यदि लग्न से वा चन्द्रमा से अष्टम स्थान का स्वामी लग्न से केन्द्र में वा द्वादश भाव में हो तो अट्ठाइस वर्ष की, यदि केन्द्र में कोई शुभग्रह न हों तथा अष्टम भाव में कोई ग्रह बैठा हो तो ३० वर्ष की आयु होती है ॥ १८ ॥

क्षीणे प्रालयभानौ यदि खलखचरो मृत्युगो मृत्युनाथः
केन्द्रस्थो लग्ननाथो निजबलरहितः खाश्वितुल्यं तदायुः ।
सौम्यैरापोक्लिमस्थैर्दिनमणिजविधू वैरिरन्ध्रालयस्थौ
तुल्यं कामाङ्कुशैः स्यादथ धनमृतिगौ रिःफगौ पापखेटौ ॥१९॥

अन्वयः—यदि प्रालेयभानौ क्षीणे खलखचरो मृत्युगो मृत्युनाथो केन्द्रस्थो लग्ननाथो निजबलरहितस्तदा खाश्वितुल्यमायुः स्यात्, सौम्यैरापोक्लिमस्थैः दिनमणिजविधू वैरिरन्ध्रालयस्थौ कामाङ्कुशैस्तुल्यमायुः स्यात्, अथेत्याद्यग्रिमश्लोकेनान्वयः ॥ १९ ॥

चन्द्रे क्षीणे सति क्रूरग्रहोऽष्टमस्थो मृत्युभावेशः केन्द्रस्थैः लग्नेशो निर्बलस्तदा खाश्वितुल्यं विंशतिवर्षाण्यायुः स्यात्। शुभग्रहैः आपोक्लिमगतैः शनिचन्द्रौ षष्ठाष्टमस्थौ तदा कामांकुशैर्नखैस्तुल्यं विंशतिवर्षाण्यायुः स्यात्। अथेत्यग्रिमश्लोकेनान्वयः ॥ १९ ॥

यदि चन्द्रमा क्षीण हो अर्थात् अमावस्या का जन्म हो पापग्रह अष्टम भाव में स्थित हो अष्टम स्थान का स्वामी केन्द्र में बैठा हो तथा लग्नेश निर्बल हो तो २० वर्ष की आयु होती है तथा शुभ ग्रह आपोक्लिम (३।

६।९।१२) भवन में स्थित हो, शनि-चन्द्रमा षष्ठ भाव में पडे हों, तो बीस वर्ष की आयु होती है ॥ १९ ॥

हीनौ स्वर्भानुना वा यदि हिममहसा व्योमनेत्रप्रमाणं
केन्द्रस्थौसूर्यमन्दौ यदि वपुषि कुजः पुष्पबाणाङ्कुशं स्यात् ।
शुक्रेज्यावङ्गयातौ तनयभवनगौ भौमपापावनायु-
र्जन्मेशः सार्कलग्ने खलशुभसहितश्चेक्षितः स्यादनायुः॥२०॥

अन्वयः—अथ यदि स्वर्भानुना वा हिममहसा हीनौ पापखेटौ धनमृतिरिःफगौ तदा व्योमनेत्रप्रमाणमायुः स्यात् , यदि सूर्यमन्दौ-केन्द्रस्थौ वपुषि कुजस्तदा पुष्पवाणाङ्कुशमायुः शुक्रेज्यौ अङ्गयातौ भौम पापौ तनयभवनगौ अनायुः, खलशुभसहितश्चेक्षितः सार्के जन्मेशः लग्ने अनायुः स्यात् ॥ २० ॥

अथ राहुचन्द्ररहितौ क्रूरग्रहौ द्वितीयाष्टद्वादशगौ तदा व्योमनेत्रप्रमाणं विंशतिसंख्यमायुः सूर्यशनी केन्द्रगौ कुजो लग्नगस्तदा पुष्पवाणांकुशं विंशद्वर्षाण्यायुः स्यात् । शुक्रगुरू लग्नस्थौ भौमपापौ पञ्चमस्थौ तदा अनायुः अल्पायुः स्यात् । सूर्ययुते लग्ने जन्मेशः जन्मराशीशः अन्यैर्युतो दृष्टश्चेत्तदा अनायुः अल्पायुः स्यात् ॥ २० ॥

यदि राहु और चन्द्रमा इन दोनों को छोड़कर दो पापग्रह दूसरे आठवें तथा बारहवें भाव में हों तो बीस वर्ष की आयु जानना । यदि सूर्य और शनि केन्द्र (१।४।७।१०) में मङ्गल लग्न में हों तो भी बीस वर्ष की आयु होती है, शुक्र और बृहस्पति जन्मलग्न में हो, तथा मङ्गल और कोई पापग्रह पञ्चम भाव में हो तो मनुष्य अल्पायु होता है, सूर्य से युक्त लग्न हो, तथा जन्मराशि का स्वामी दूसरे किसी पापग्रह वा शुभग्रह से युक्त हो वा देखा जाता हो तो मनुष्य अल्पायु होता है ॥ २० ॥

यत्संप्रोक्तं योगजं पूर्वमायुर्होरापारावारपारङ्गमज्ञैः ।
तस्मादायुः सारभूतं यदेतत्पुण्याचारश्लोकभाजां नराणाम् ।२१।

अन्वयः—होरापारावारपारङ्गमज्ञैः पूर्वं यत्योगजमायुः संप्रोक्तं तस्मात्सारभूतं यदेतदायुः तत् पुण्याचारश्लोकभाजां नराणाम् घटत इति॥

जातकशास्त्रसमुद्रोत्तीर्णैः समस्तजातकशास्त्रज्ञैरित्यर्थः पूर्वं यद्योगजमायुः प्रोक्तं प्रणीतं तस्मात्पूर्वोक्तात् सारभूतं दृढांशभूतं आयुर्यदेतदुक्तं तत्पुण्याचारश्लोकभाजां सदाचारोपलक्षितधर्मयशोयुक्तानां नराणां 'घटत' इत्यध्याहारः ॥ २१ ॥

ज्यौतिषशास्त्ररूप समुद्र से उत्तीर्ण हुए (समस्त जातकशास्त्र को जानने वाले) मुनियों ने पहले योगानुसार, जो आयुर्दाय कहे हैं, उसका सारभूत यह आयुर्दाय सदाचार पालन करने वाले और धर्म यश के भागी मनुष्यों को ही मिलता है, दूसरों को नहीं ॥ २१ ॥

---

१. जातकशास्त्र का लक्षण कश्यप ने यों लिखा है—

राशिभेदः खेटयोनिर्वियोनिर्जन्मलक्षणम् ।
निषेकजननं पुंसामरिष्टं ह्यङ्गलक्षणम् ॥
आयुर्दायो दशाभेदा ज्ञेया चान्तर्दशा तथा ।
अष्टौ रिष्टं कर्मजीवा राजयोगाश्च नाभसाः ॥
चन्द्रयोगा द्विग्रहाद्याः प्रव्रज्यायोगसम्भवः ।
राशिशीलं दृष्टिफलं ग्रहभावफलं तथा ॥
आश्रयाख्यास्तथा योगाः योगा संकीर्णसम्भवाः ।
स्त्रीजातकं नष्टयोगं निर्याणं नष्टजातकम् ॥
द्रेष्काणादिफलं सर्वं होरास्कन्धस्य सम्भवः ॥ इति ॥

२. केशवी में भी लिखा है—

'स्याद्धर्मिष्ठसुशीलपथ्यभुजां न स्यादिदं पापिनाम् इति ।

अथादेशविधिमनुष्टुब्वृत्तेनाह—

बलाबलविवेकेन पुष्करालयशालिनाम् ।
सुमनोभिरिदं देश्यमायुर्धर्मादिशालिनाम् ॥ २२ ॥

अन्वयः—सुमनोभिः पुष्करालयशालिनाम् बलाबलविवेकेन आयुर्धर्माविशालिनामिदमायुः आदेश्यम् ॥ २२ ॥

बलाबलविवेकेनेति । पुष्करालयशालिनां सूर्यादिग्रहाणां बलाबलविचारेण सुमनोभिरिदमायुः कथनीयं धर्मादिशालिनां भवति पापकर्मणां न भवतीति अर्थात् सिद्धम् ॥ २२ ॥

ज्यौतिषियों को चाहिये कि सूर्यादिक सब ग्रहों के बलाबल का विचार करके धर्म यश के भागी मनुष्यों को ही इस आयुर्दाय को कहे (पापियों को ऐसा फल नहीं मिलता, कम आयु हो जाती है) ॥ २२ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषे-
ऽलङ्कागाख्ये जातके मञ्जुलेऽस्मिन् ।
आयुर्दायः श्रीगणेशेन वर्यै-
र्वृत्तैर्युक्तो बाहुपक्षैः प्रणीतः ॥ २३ ॥

इति श्रीजातकालङ्कारे पञ्चमोऽध्यायः ॥ ५ ॥

अन्वयः—श्रीगणेशेन वर्यैः हृद्यैः पद्यैर्गुम्फिते सूरितोषे मञ्जुलेऽस्मिनलङ्काराख्ये जातके बाहुपक्षैर्वृत्तैर्युक्तो आयुर्दायः प्रणीतः ॥ २३ ॥

अध्यायं समापयति हृद्यैः पद्यैरिति ॥ २३ ॥

इति जातकालङ्कारटीकायामायुर्दायाध्यायः पञ्चमः ॥ ५ ॥

श्री गणेश दैवज्ञ ने इस मनोहर जातकालङ्कार नामक ग्रन्थ में उत्तमोत्तम बाईस श्लोकों से युक्त इस पञ्चम आयुर्दायाऽध्याय को बनाया ॥२३॥

इति जातकालङ्कारे भाषाटीकायां पञ्चमो आयुर्दायाध्यायः समाप्तः ॥ ५ ॥

वैपरीत्यस्थभावफलाध्यायः ६ ।

अथ लग्नेशधनेशादीनां व्यत्ययात्फलान्याह—

लग्नाधीशेऽर्थगे चेद्धनभवनपतौ लग्नयातेऽर्थवान्स्यात्
बुद्ध्याचारप्रवीणः परमसुकृतकृत्सारभृद्भोगशीलः ।
भ्रातृस्थानेऽङ्गनाथे सहजभवनपे लग्नयातेऽल्पशक्तिः
सद्बन्धू राजपूज्यः कुलजनसुखदो मातृपक्षेण युक्तः ॥ १ ॥

अन्वयः—चेल्लग्नाधीशेऽर्थगे धनभवनपतौ लग्नयातेऽर्थवान् बुद्ध्याचारप्रवीणः परमसुकृतकृत्सारभृद्भोगशीलः स्यात् , अङ्गनाथे भातृस्थाने सहजभवनपे लग्नयातेऽल्पशक्तिः सद्बन्धू राजपूज्यः कुलजनसुखदो-मातृपक्षेण युक्तः स्यात् ॥ १ ॥

लग्नेशे धनगे धनेशे लग्नगे सति जातो धनवान् बुद्ध्याचारप्रवीणः बुद्ध्याचारेण च निपुणः उत्कृष्टपुण्यकृत् बलवान् भोगैकशीलश्च स्यात्। लग्नेशे सहजेशे लग्नस्थे अल्पवीर्यः प्रशस्तबन्धुयुक्तः, कुलजातानां सुखदः मातृपक्षेण सहितश्च स्यात् ॥ १ ॥

अथ षष्ठाध्याय में लग्नेश धनेशादि के वैपरीत्य से फल कहते हैं-यदि लग्न का स्वामी द्वितीय भाव में और धनभाव का स्वामी लग्न में हो तो जातक धनवान् और आचार में निपुण, अत्युत्तम पुण्य करने वाला, शरीर से पुष्ट और भोगी होता है। यदि लग्नेश तृतीय भाव में तथा तृतीयेश लग्न में हो तो जातक अल्पशक्तिवाला, उत्तम बन्धुओं से युक्त, राजपूज्य अपने कुल में उत्पन्न जनों को सुख देने वाला और माता के पक्ष से युक्त, (नाना, नानी, मामी, मौसी इत्यादि वाला) होता है ॥ १ ॥

तुर्येशे लग्नयाते तदनु तनुपतौ तुर्यगे स्यात्क्षमावान्
ताताज्ञाराजकार्यप्रगुणमतियुतः सद्गुरुः स्वीयपक्षः ।
लग्नस्थे सूनुनाथे तनुजपदगते लग्ननाथे मनस्वी
विद्यालङ्कारयुक्तो निजकुलविदितो ज्ञानवान्मानसक्तः ॥ २ ॥

अन्वयः—तुर्येशे लग्नयाते तदनु तनुपतौ तुर्यगे क्षमावान् ताताज्ञाराजकार्यप्रगुणामतियुतः सद्गुरुः स्वीयपक्ष. स्यात् । सूनुनाथे लग्नस्थे लग्नाथे तनुजपदगते विद्यालङ्कारयुक्तो निजकुलविदितो ज्ञानवान्मान सक्तः स्यात् ॥ २ ॥

चतुर्थे लग्नेशे, लग्नगे चतुर्थेशे जातः क्षमतायुक्तः ताताज्ञाराजकार्यप्रगुणमतियुक्तः पितुराज्ञायां राजकार्ये च ऋजुमतिः सन् प्रशस्तो गुरुर्यस्य यद्वा सतो गुरुः स्वकीयपक्षे च स्थितः स्यात् । पञ्चमेशे लग्ने, लग्नेशे पञ्चमस्थे सति नरः प्रशस्तमनाः विद्यया[1] भूषितः स्वकुले विख्यातो ज्ञानवान् सदसद्वस्तुज्ञः माने अभिमाने सक्तः ॥ २ ॥

यदि लग्न का स्वामी चतुर्थ भ व में और चतुर्थ भाव का स्वामी लग्न में हो तो जातक क्षमाशील, पिता की आज्ञा मानने वाला, राजकार्य में निष्कपट बुद्धि रखने वाला, जिसके गुरु बड़े सज्जन हों अथवा सज्जनों का गुरु और अपने पक्ष में रखने वाला, अपने बन्धु वर्गों का रक्षक होता है। यदि लग्न का स्वामी पाँचवें भाव में हो पञ्चम भाव का स्वामी लग्न में हो तो जातक प्रसिद्ध विशिष्ट हृदय वाला (मनस्वी) विशेष विद्या से अपने कुल में प्रसिद्ध ज्ञानी और अभिमानी पुरुष होता है ॥ २ ॥

षष्ठेशे लग्नयाते तदनु तनुपतौ षष्ठगे व्याधिहीनो
नित्यं द्रोहादिसक्तो वपुषि सबलवान् द्रव्यवान् संग्रही स्यात् ।

---

१. वाग्भूषणं भूषणम् इति भावः ।

मूर्तीशे कामयाते मदनसदनपे मूर्तिगे तातसेवी
लोलस्वान्तोऽङ्गनायां भवति हि मनुजः सेवकः शालकस्य ॥३॥

अन्वयः—षष्ठेशे लग्नयाते तदनु तनुपतौ षष्ठगे व्याधिहीनो नित्यं द्रोहादिसक्तो वपुषि सबलवान् द्रव्यवान् संग्रही स्यात् मूर्त्तीशे कामयाते मदनसदनपे मूर्तिगे तातसेवी हि मनुजः अङ्गनायां लोलस्वान्तो शालकस्य सेवकः स्यात् ॥ ३ ॥

षष्ठेशे लग्नगे तदनु लग्नेशे षष्ठगे सति नित्यं रोगरहितः अतएव शरीरे बलवान्, द्रोहादौ सक्तः आदिशब्देन परानिग्रहकरणादि ज्ञेयं, संग्रहपरः अतो द्रव्यवान् स्यात् । लग्नेशे सप्तमस्थे सप्तमेशे लग्नस्थे सति तदा मनुजः पितुर्भक्तः स्त्रीविषये चञ्चलमनाः, शालकस्य भार्याभ्रातुः कार्यकरः स्यात् ॥ ३ ॥

यदि लग्न का स्वामी छठे भाव में और छठे का स्वामी लग्न में हो तो सर्वदा रोग से रहित, शरीर से बलवान् सर्वदा लड़ाई-झगड़ा, चुगल, खोरी इत्यादि करने वाला, धनवान् और वस्तुओं का संग्रह करने वाला होता है। यदि लग्न का स्वामी सप्तम भाव में और सप्तम का स्वामी लग्न में हो तो जातक पिता की सेवा करने वाला, स्त्रियों में चञ्चल अन्तःकरण वाला और अपने साले का सेवक (साले के अधीन रहने वाला) होता है ॥ ३ ॥

अङ्गेशे रन्ध्रयाते निधनगृहपतावङ्गगे द्यूतबुद्धिः
शूरश्चौर्यादिसक्तो निधनपदमियाद्भूपतेर्लोकतो वा ।
देहाधीशे शुभस्थे शुभभवनपतौ देहसंस्थे विदेशी
धर्मासक्तो नितान्तं सुरगुरुभजने तत्परो राजमान्यः ॥ ४ ॥

अन्वयः—अङ्गेशे रन्ध्रयाते निधनगृहपतावङ्गगे द्यूतबुद्धिः शूरश्चौर्या-

दिसक्तो भूपतेर्वा लोकतो निधनपदमियात् , देहाधीशे शुभस्थे शुभ-भवनपतौ देहसंस्थे विदेशी नितान्तं धर्मासक्तो सुरगुरुभजने तत्परो राजमान्यः स्यात् ॥ ४ ॥

लग्नेशेऽष्टमगेऽष्टमेशे लग्नगे द्यूतव्यवहारे निपुणः विक्रमवान् चौर्यादिसहितः आदिशब्देन वञ्चनासु निपुणः राजतो लोकतो वा निधनपदं मरणमाप्नुयात्। लग्नेशे नवमस्थे नवमेशे लग्नस्थे सति विदेशवासी नितान्तं धर्मे रतः देवाराधने गुरुसेवायां च तत्परः राजसत्कारभाजनं स्यात् ॥ ४ ॥

लग्न का स्वामी अष्टम भाव में और अष्टम भावाधिपति लग्न में हो तो जातक जूआ खेलने वाला (जुवाड़ी), पराक्रमी, चोरी करने में और दूसरे को ठगने में प्रवीण राजा अथवा प्रजा से मृत्यु को पाता है। यदि लग्नाधीश नवम भाव में और नवमाधीश लग्न में हो तो मनुष्य विदेश में रहने वाला, धर्मकार्य में आसक्त, देवता और गुरु की सेवा करने में अत्यन्त तत्पर और राजमान्य होता है ॥ ४ ॥

कर्मस्थे लग्ननाथे गगनभवनपे लग्नगे भूपतिः स्या-
त्ख्यातो लाभे च रूपे गुरुभजनरतो लोलुपो द्रव्यनाथः ।
लाभेशे लग्नयाते तनुभवनपतौ लाभसंस्थे सुकर्मा
दीर्घायुः क्षोणिनाथः शुभविभवयुतः कोविदो मानवः स्यात्॥५॥

अन्वयः—कर्मस्थे लग्ननाथे गगनभवनपे लग्नगे भूपतिः लाभे रूपे च ख्यातः गुरुभजनरतो लोलुपो द्रव्यनाथः स्यात् , लाभेशे लग्नयाते तनुभवनपतौ लाभसंस्थे तदा मानवः सुकर्मा दीर्घायुः क्षोणिनाथः शुभविभवयुतः कोविदः स्यात् ॥ ५ ॥

लग्नेशे कर्मस्थे, कर्मनाथे लग्नगे भूपालः लाभेन, तद्वत्सुरूपेण च विख्यातः गुरुसेवायां प्रीतिमान् लोलुपः चञ्चलचित्तः

द्रव्याणां स्वामी च स्यात्। लाभेशे लग्नस्थे लग्नेशे लाभस्थे शोभनकर्मा दीर्घायुः क्षोणिनाथो राजा शुभविभवयुतः कोविदो धीरश्च मानवः स्यात् ॥ ५ ॥

यदि लग्नाधीश दशम भावमें और दशमाधीश में लग्न हो तो जातक भूपाल (राजा), लाभ, तथा सौन्दर्य से प्रसिद्ध गुरुजनों की सेवा में चञ्चल (गुरुजनों की सेवा करने वाला) और धनवान् (बड़ा मालदार) होता है। लाभेश लग्न में और लग्नेश एकादश भाव में हो तो जातक सुकर्म करने वाला, दीर्घायुः, लम्बी चौड़ी जमीन का स्वामी (जमीदार), सम्पत्ति से युक्त और पण्डित होता है ॥ ५ ॥

लग्नेशे रिःफयाते व्ययसदनपतौ लग्नगे सर्वशत्रु-
र्बुद्ध्या हीनो नितान्तं कृपणतरमतिर्द्रव्यनाशी विलोलः।
इत्थं तातादिकानामपि जनुषि तथा खेचराणां हि योगा-
द्वाच्यं होरागमज्ञैस्तदनु तनुपयुग्भार्गवे राजपूज्यः ॥ ६ ॥

अन्वयः—लग्नेशेरिःफयाते व्ययसदनपतौ लग्नगे सर्वशत्रुर्नितान्तं बुद्ध्याहीनो कृपणतरमतिर्द्रव्यनाशो विलोलः, इत्थं होरागमज्ञैः जनुषि खेचराणां हि योगात् तातादिकानामपि तथा (फलं) वाच्यं, तदनु तनुपयुग्भार्गवे राजपूज्यस्यात् ॥ ६ ॥

लग्नेशे रिःफयाते, व्ययनाथे लग्नगे सति सर्वशत्रुः सर्वेषां जनानां शत्रुः सर्वे शत्रवो यस्येति वा यतो निरन्तरं बुद्ध्या हीनः बुद्धिरहितः कृपणतरमतिः अतश्च द्रव्यनाशी विलोल-निर्विचारः शीघ्रकारी च स्यात्। इत्थमुक्तप्रकारेण जातकजन्म-समये तातादिकानामपि खेचराणां योगात् फलं होरागमज्ञै-र्वक्तव्यम्। अयमर्थः—जातकस्य जन्मलग्नाद्दशमं भवनं तातगृहं तदेव लग्नं प्रकल्प्य तदग्रिमान् क्रमेण धनादिभावान् परिकल्प्य

तत्र लग्नभावेशयोर्व्यत्ययस्थितिमवलोक्य लग्नाधीशोऽर्थगे चेद्धनभवनपतौ लग्नयातेऽर्थवान्स्यादित्यादिना उक्तोदाहरणेन तातादीनामर्थवत्वादिफलं होराशास्त्रज्ञैर्वाच्यम्। अथ मङ्गलाय शुभफले आदेशं समापयति । तनुपृथक्भार्गवे लग्नेशयुक्ते शुक्रे त्रिकव्यतिरिक्तभावग इति शेषात्तत्र जातो राजपूज्यो भवति राजपूज्यशब्देन वाञ्छितपदार्थानां सौलभ्यं ध्वन्यते ॥ ६ ॥

यदि लग्नाधीश द्वादश भाव में और द्वादशाधीश लग्न में स्थित हो तो जातक सब लोगों का शत्रु, अथवा बहुत शत्रुओं वाला, व्यर्थ धन का नाश करने वाला, विचारहीन (कर्तव्याकर्तव्य का विचार न रखने वाला) होता है। जातकशास्त्र जानने वाले को चाहिये कि इसी प्रकार जन्मकालिक ग्रहों के योगों से जातक के पिता, माता, भ्राता, स्त्री, इत्यादि के फल कहे।

जैसे जातक के जन्मलग्न से दशवां स्थान पिता का स्थान है, उसी को लग्न कल्पना करके उससे अग्रिम (११।१२।१,..) भावों को द्वितीय तृतीय चतुर्थ इत्यादि भाव कल्पना करके उपरोक्त श्लोकों से जातक के पिता का फल कहे। इसी प्रकार भाई आदि का भी फल कहे। यदि लग्नाधीश से युक्त होकर शुक्र त्रिक भाव (६।८।१२) से भिन्न भाव में पडा हो तो जातक राजमान्य अर्थात् मनोवाञ्छित कार्यसिद्ध को पाने वाला होता है ॥ ६ ॥

एवं सुमत्या सुफलप्रबोधं श्रीजातकालङ्करणं मनोज्ञम् ।
वृत्तैरनन्तेशमितैर्निबद्धं मया मुदे दैवविदामुदारम् ॥ ७ ॥

अन्वयः—एवं मया उदारं सुफलप्रबोधं मनोज्ञं श्रीजातकालङ्करणम् अनन्तेशमितैर्वृत्तैर्दैवविदांमुदेनिबद्धम् ॥ ७ ॥

एवमुक्तप्रकारेण मया गणेशेन स्वबुद्ध्या उदारं सारनिरूपणं

मनोज्ञं पदपदार्थरुचिरं सुफलप्रबोधं स्फुटफलजनकं दैवज्ञानां प्रमोदाय अनन्तेशमितैर्दशाधिकशतप्रमितैर्वृत्तैः श्रीजातकालङ्करणं निबद्धं विरचितम् ॥ ७ ॥

मैं (गणेश कवि) ने इस प्रकार अपनी बुद्धि से ज्यौतिषियों के आनन्द के लिये फलों का स्पष्ट ज्ञान कराने वाले मनोज्ञ इस जातकालंकार को एक सौ दस ११० श्लोकों में बनाया ॥ ७ ॥

अथ स्वरचितग्रन्थस्य कविमनोरुचित्वं प्रार्थ्यते—

पुष्करालयवशा गुणसारा जातकोक्तिरमलेव मराला ।
संस्कृता विहरतां भवतां मे मानसेऽतिसरले सुकवीनाम्॥८॥

अन्वयः—भवतां सुकवीनामतिसरले मानसे मे पुष्करालवशागुणसारा संस्कृताजातकोक्ति अमला मराला इव विहरताम् ॥ ८ ॥

मे मम जातकोक्तिः भवतां पूज्यानां कवीनां अतिसरले मानसे निर्मला मराला हंसीव विहरतां । कथम्भूता जातकोक्तिः पुष्करमाकाशं तदेवालयो येषां ते पुष्करालयाः ग्रहाः तेषां वशाधीना शुभाशुभसूचकग्रहोपयोज्या इत्यर्थः । हंसीपक्षे पुष्करं जलं तस्यालयो मानसं सरः तद्वशा तद्वशवर्तिनीत्यर्थः । गुणसारा जातकगुणानां सारोपदेशोऽर्थो यस्यां सा । हंसीपक्षे गुणसारा विहितगुणाद्यैर्युक्ता 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः' इति अभिधानात् । अमला शुद्धा दोषरहिता इत्यर्थः । पक्षेऽमला निर्मलेत्यर्थः । संस्कृता मनोज्ञादिवाक्यपरिष्कृता हंसीपक्षे निसर्गरुचिरा इत्यर्थः ॥ ८ ॥

ग्रन्थकार कवियों से प्रार्थना करते हैं कि पूजनीय कविजनों के अति सरल मानस (हृदय) सरोवर में मेरी ग्रहों के अधीन रहनेवाली, शुभा-

शुभ फल को देने वाली, जातकगुणों की साररूपा संस्कृत अत्यन्त शुद्ध यह जातकोक्ति निर्मल मराली (हंसी के समान विहार करै ॥ ८ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषेऽ

लङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।

भावाध्यायः श्रीगणेशेन वय-

र्वृत्तैर्युक्तोऽष्टाभिरेष प्रणीतः ॥ ६ ॥

अथ शालिन्या अध्यायं समापयति । हृद्यैः पद्यैरिति स्पष्टार्थः ६

अन्वयः—श्रीगणेशेनवर्यैः हृद्यैः पद्यैः सूरितोषे मञ्जुलेऽस्मिनल- ङ्काराख्ये जातकेऽष्टाभिर्वृत्तैर्युक्तो एषः भावाध्यायः प्रणीतः ॥ ६ ॥

गणेश दैवज्ञ ने मनोहर पद्यों से बने हुये इस जातकालङ्कार में सुन्दर आठ श्लोकों द्वारा इस भावाध्याय को बनाया ॥ ९ ॥

इति भाषा टीकायां षष्ठो वैपरीत्यस्थभावाध्यायः ॥ ६ ॥

वंशाध्यायः ७ ।

अथ विशिष्टं स्ववंशं संख्यापयन् ग्रन्थसमाप्तौ देशकाल-विशेष प्रख्यापयति त्रिभिः पृथ्वीशार्दूलविक्रीडितैर्वृत्तैः—

अभूदवनिमण्डले गणकमण्डलाखण्डलेः
श्रुतिस्मृतिविहारभूर्विबुधमण्डलीमण्डनम् ।
प्रचण्डगुणगुर्जराधिपसभाप्रभातप्रभः
कवीन्द्रकुलभूषणं जगति कान्हजीकोविदः ॥ १ ॥

अन्वयः—अवनिमण्डले प्रचण्डगुणगुर्जराधिपसभाप्रभातप्रभः विबुधमण्डलीमण्डनम् कवीन्द्रकुलभूषणं श्रुतिस्मृतिविहारभूर्गणाकमण्डलाखण्डलेः भरद्वाजकुले (इत्यग्रिमश्लोकेन) जगति कान्हजीकोविदः अभूत् ॥ १ ॥

अवनिमण्डले भारद्वाजकुले नाम्ना कान्हजीकोविदः पण्डित अभूत् , स कीदृशः जगति लोके गणकमण्डलाऽखण्डलो ज्योतिर्विद्वृन्दे आचार्यः "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः" इत्यभिधानात् । श्रुतिस्मृतिविहारभूः प्रत्यहं श्रुतिस्मृतिप्रतिपादनद्वारा तासां विहारभूमिः विबुधमण्डलीमण्डनं पण्डितशोभादायकमित्यर्थः । प्रचण्डगुणगुर्जराधिपसभाप्रभातप्रभाः प्रचण्डा रिपुविजयशालिनो गुणाः[१] सन्धिविग्रहादयो यस्य स गुर्जराधिपः गुर्जरदेशाधिपः तस्य सभायाः प्रभातप्रभेव सभाप्रकाशक इत्यर्थः । कवीन्द्रकुलभूषणं कविश्रेष्ठसन्दोहस्य प्रभावहम् ॥ १ ॥

इस भूमण्डलमें प्रचण्डगुणवाले गुर्जराधीश के सभा को प्रकाशित करने वाले, पण्डितों के मण्डलीमें श्रेष्ठ, कविकुलभूषण, श्रुति

१. 'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' इत्यमरः ।

(वेद) स्मृति के जाननेवाले, गणकसमूह (ज्योतिषियों के) में सूर्य के समान श्रेष्ठ भारद्वाजमुनि के कुलमें संसारमें प्रसिद्ध कान्हजी पण्डित हुये ॥ १ ॥

भारद्वाजकुले बभूव परमं तस्मात्सुतानां त्रयं
ज्यायाँस्तेष्वभवद्ग्रहज्ञतिलकः श्रीसूर्यदासः सुधीः ।
श्रीमान् सर्वकलानिधिस्तदनुजो गोपालनामाऽभव-
च्छ्रीमद्दैवविदां वरस्तदनुजः श्रीरामकृष्णोऽभवत् ॥२॥

अन्वयः—तस्मात्परमं सुतानां त्रयं बभूव, तेषु ज्यायान् ग्रहज्ञ तिलकः श्रीसूर्यदासः सुधीः अभवत् , ततस्तदनुजो श्रीमान् सर्वकला· निधिः गोपालनामाऽभवत् , तदनुजः श्रीमद्दैवविदांवरः श्रीराम-कृष्णोऽभवत् ॥ २ ॥

तस्मात्कान्हजीकोविदात्परममुत्कृष्टं सुतानां त्रयं बभूव । तेषु ज्यायान् ज्येष्ठः ग्रहज्ञतिलकः गणकश्रेष्ठः सुधीः श्रीसूर्य दासः अभवत्तदनुजः ततः पश्चाज्जातः श्रीमान् वेदवित् सर्व-कलानिधि· सर्वकलाकुशलः गोपालनामा अभवत् । तदनुजः श्रीमतां दैवज्ञानां च श्रेष्ठः श्रीरामकृष्णोऽभवत् ॥ २ ॥

उन (कान्हजी) को तीन पुत्र हुए। उनमें ज्येष्ठ दैवज्ञतिलक सूर्य· दास नामक, दूसरे सर्वकलाओं में श्रेष्ठ गोपाल नामक तथा इनसे छोटे ज्यौतिषियों में श्रेष्ठ रामकृष्ण नामक, ये तीनों अतिबुद्धिमान् पुत्र हुए ॥२॥

शाके मार्गणरामसायकधरा १५३५ संख्ये नभस्ये तथा
मासे ब्रध्नपुरे सुजातकमिदं चक्रे गणेशः सुधीः ।
छन्दोऽलङ्कृतिकाव्यनाटककलाभिज्ञः शिवाध्यापक-
स्तत्र श्रीशिवविन्मुदे गणितभूगोपालसूनुः स्वयम् ॥ ३ ॥

ये पठिष्यन्ति दैवज्ञास्तेषामायुः सुखे शिवम् ।
भूयात्कैरवकुन्दाभा सुकीर्तिः सर्वतोदिशम् ॥ ४ ॥

अन्वयः—तत्र छन्दोऽलङ्कृतिकाव्यनाटककलाभिज्ञः गणितभूश्रीशिवविन्मुदे गोपालसुनुः शिवाध्यापकः गणेशः सुधीः मार्गण रामसायकधरासंख्येशाके तत्र नभस्ये मासे ब्रघ्नपुरे इदं सुजातकम् स्वयम् चक्रे । ये दैवज्ञाः पठिष्यन्ति तेषामायुः सुखे शिवम् भूयात् तथा सर्वतो दिशम् कैरवकुन्दाभासुकीर्त्तिः भूयात् ॥ ३ ॥ ४ ॥

तत्र गोपालसूनुः गणेशः मार्गणरामसायकधरासंख्ये शाके पञ्चत्रिंदशदधिकपंचदशमिते (१५३५) शाके नभस्ये भाद्रपदमासे ब्रध्नपुरे सूर्यपुरे इदं सुजातकं शोभनं जातकं श्रीशिवाख्यविदः प्रमोदाय चक्रे कृतवान्, कथम्भूतो गणेशः शिवाध्यापकः शिव अध्यापक उपाध्यायो यस्य । छन्दोऽलंकृत्यादिविद् छन्दांसि मात्रावर्णभेदभिन्नवृत्तानि अलंकृतयः उपमाद्यालङ्काराः काव्यानि गद्यादिभेदेन द्विविधानि नाटकानि संस्कृतप्राकृतभाषानिबद्धानि कलाश्चित्रकर्माद्याः गणितभूर्गणिताश्रयः सिद्धान्तविदित्यर्थः ।३४।

छन्द, अलङ्कार, काव्य, नाटक और कला (चित्र कर्मादि) और गणितसिद्धान्त को जानने वाले अपने गुरु श्रीशिवनामक के प्रसन्नार्थ गोपाल के पुत्र गणेश कवि ने इस जातकालङ्कार को १५३५ शाके भाद्रपद में सूर्यपुर ग्राममें स्वयं बनाया । जो ज्योतिषी इसे पढेंगे उनको आयु, सुख और कल्याण का लाभ होगा तथा सब दिशाओं में कुन्द के फूल के समान (स्वच्छ) सुयश फैलेगा ॥ ३-४ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषे
ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।

वंशाध्यायः श्रीगणेशेन वृत्तै-
युक्तो वेदैः सैकसंख्यैः प्रणीतः ॥ ५ ॥

इति श्रीगणेशकविना विरचिते जातकालङ्कारे
सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अन्वयः—श्रीगणेशेन हृद्यैः पद्यैर्गुम्फिते मञ्जुलेऽस्मिनलङ्काराख्ये जातके वेदैः सैकसंख्यैर्युक्तोवृत्तैर्वंशाध्यायः प्रणीतः ॥ ५ ॥

अध्यायं पूरयति हृद्यैः पद्यैरिति स्पष्टार्थः ॥ ५ ॥

श्रीमच्छुक्लकुले महीपतियशः शुक्लीकृते जातके
आसीत्कृष्णदयाभरप्रमुदितः कृष्णो जयाद्यः कृती ।
तत्पुत्रेण विभाविताऽतिरुचिरा सज्जातकालंकृति-
श्रीरेषा हरभानुना मतिमतां मोदाय भूयाच्चिरम् ॥

इति श्रीमच्छुक्लोपनामकहरभानुभाविता जातकाल-
ङ्कारटीका समाप्ता ॥

श्रीगणेश कवि ने मनोहर पद्यों से बने हुए इस सुन्दर जातकालङ्कार में ५ श्लोकों से वंशाध्याय को बनाया ॥ ५ ॥

गुणाङ्कनन्दभूवर्षैवैक्रमेऽब्दे शुभेदिने
आषाढस्यासिते पक्षे प्रदोषेगुरूवासरे
टीका समाप्तिमगमत्संतुष्टयैसज्जनो विदा-
यदत्रस्खलनं किञ्चित्तत्क्षमध्वं धिया बुधाः ॥ १ ॥

इति श्रीकाशीस्थश्रीचन्द्रमहाविद्यालय ज्योतिषशास्त्रप्रधानाध्यपक ज्यौ० आ० श्रीगणेशदत्त पाठक कृतायां जातकालङ्कारसान्वय भाषाटीकायां वंशाध्यायः सप्तमः समाप्तः ।

समाप्तोऽयं ग्रन्थः ॥